**अनुवाद**- (जो यजमान) श्रेष्ठ (अग्नि) के लिये अत्यन्त कठिनता से प्राप्त अन्न (प्रदान करते है।) (उनका) शरीर पापमुक्त होकर बढता है। नूतन उत्पन्न वह (अग्नि) क्रुद्ध सिह की भाँति एकत्र हुये शत्रुओ को नष्ट करे (और) चारो ओर (वर्तमान शत्रुओं को) हमसे दूर ले जाये।

मातेव यद्भरसे पप्रथानो जनंजनं धायसे चक्षसे च।
वयोवयो जरसे यद्दधानः परित्मना विषुरूपो जिगासि॥४॥

**अन्वय**- (अग्ने !) यत् (त्व) माता इव जन जन भरसे, चक्षसे धायसे च प्रप्रथान (असि)। (अग्ने !) यत् (त्व) दधान (भवसि) (तदा) वयोवय. जरसे विरूप. च त्मना (एव) परि जिगासि।

**अनुवाद**- (हे अग्ने !) (तुम) माता की भाँति समस्त लोगो का पोषण, दर्शन एव धारण करने के लिये विस्तृत हुये (हो)। (हे अग्ने !) जब (तुम) प्रदीप्त होते (हो) (तब) अन्नो को जीर्ण करते हो और नानारूपो वाले स्वय (ही) सर्वत्र व्याप्त होते हो।

वाजो नु ते शवसस्पात्वंतमुरुं दोघं धरुणं देव रायः।
पदं न तायुर्गुहा दधानो महो राये चितयन्नत्रिमस्पः॥५॥

**अन्वय** देव ! (अग्ने !) ऊरु दोघं, रायः धरुणं ते अन्त शवस वाजः नु पातु। गुहा दधान पद (रक्षक·) तायुः न महः राये (न· सन्मार्ग) चितयन् (अग्ने !) अत्रिमस्प·।

**अनुवाद** हे देव ! (अग्ने !) अत्यन्त पूरक, धनरक्षक तुम्हारे बल की आज अन्न रक्षा करे। गुफा मे स्थित धन के (रक्षक) तस्कर की भाँति महान धन के लिए (हमें सन्मार्ग) दिखाओ। (हे अग्ने !) अत्रि को प्रसन्न करो।

## सूक्त (१६)

***देवता*** अग्नि, **ऋषि**- पुरुरात्रेय, **छन्द**- अनुष्टुप्, ५, पङ्क्ति।

बृहद्वयो हि भानवेऽर्चा देवायाग्नये। यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः॥१॥

**अन्वय**- मर्तास· य मित्र न (अग्निम्) प्रशस्तिभिः पुनः दधिरे (यजमानः !) तस्मै भानवे देवाय अग्नये बृहत् वय· हि अर्च।

**अनुवाद** मनुष्य जिस सखास्वरूप (अग्नि) को प्रशस्तियों द्वारा आगे स्थापित करते है (हे यजमानो !) उस द्युतिमान दिव्य अग्नि को उत्तम अन्न प्रदान करो।

स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः। वि हव्यमग्निरानुषग्भगो न वारमृण्वति॥२॥

**अन्वय**- यः हव्यम् (देवान्) आनुषक्, बाह्वोः दक्षस्य द्युभिः सः हि (अग्निः) जानाना होता (अस्ति) भगः (च) न (मनुष्येभ्य·) वारं (धनम्) वि ऋण्वति।

**अनुवाद**- (जो) हव्य को (देवताओं के लिये) ले जाता है, बाहुबल के तेज से युक्त वही (अग्नि) लोगो का होता है (आर) सूर्य की भाँति (मनुष्यों को) वरणीय (धन) विशेष रूप से प्रदान करता है।

अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः।

विश्वा यस्मिन्तुविष्वणि समर्ये शुष्ममादधुः॥३॥

**अन्वय** विश्वा (ऋत्विजः) यस्मिन् तुविष्वणि अर्ये (अग्नौ) शुष्म सम् अदधुः (वयम्) अस्य मघोन वृद्धशोचिष (अग्ने) सख्ये स्तोमे (च) स्याम।

**अनुवाद**- समस्त (ऋत्विग्गण) जिस बहुशब्द विशिष्ट स्वामी (अग्नि) मे बल का भलीभाँति आधान करते है (हम) इस धनवान, प्रवृद्ध तेजवाले (अग्नि) के मित्र (एव) स्तुति बोलने वाले हो जाये।

अधा ह्यग्न एषां सुवीर्यस्य मंहना। तमिद्यह्वं न रोदसी परि श्रवो बभूवतुः॥४॥

**अन्वय** अग्ने । अद्य हि एषा (यजमानाना) सुवीर्यस्य मंहना (भव)। रोदसी यह्व न श्रवः तम् इत् (अग्नि) परिबभूवतु।

**अनुवाद** हे अग्ने ! अब हम (यजमानो) को उत्तम बल का दान देने वाले (होओ)। द्यावापृथिवी सूर्य की भाँति पूज्य उसी (अग्नि) को परिगृहीत करते हैं।

नू न एहि वार्यमग्ने गृणान आ भर।

ये वय ये च सूरयः स्वस्ति धामहे सचोतैधि पृत्सु नो वृधे॥५॥

**अन्वय** अग्ने ! नु नः (यज्ञम्) एहि। गृणानः (नः) वार्य (धनम्) आ भर। ये (यजमानाः) ये च वय सूरयः (ते हव्या) सचा स्वस्ति धामहे नः (त्वम्) पृत्सु वृधे एधि।

**अनुवाद** हे अग्ने ! शीघ्र ही हमारे (यज्ञ मे) आओ। स्तुति करते हुये (हमे) वरणीय (धन) प्रदान करो। जो (यजमान) और जो हम स्तोता (तुम्हारी) (हवि के) साथ स्तुति करते है। (उन) हमारे लिये (तुम) सङ्ग्राम मे वृद्धि के लिये होओ।

## सूक्त - (१७)

***देवता*** अग्नि, ***ऋषि***- पुरुरात्रेय, ***छन्द***- अनुष्टुप्, ५ पङ्क्ति।

आ यज्ञैर्देव मर्त्य इत्था तव्यांसमूतये। अग्निं कृते स्वध्वरे पूरुरीळीतावसे॥१॥

**अन्वय**- देवः ! मर्त्यः इत्था तव्यासम् (अग्निम्) यज्ञैः ऊतये आ (ह्वयति)। मनुष्यः पुरु कृते स्वध्वरे अवसे अग्निम् ईळीत।

**अनुवाद** हे देव ! मनुष्य इस प्रकार तेजोयुक्त अग्नि को स्तोत्रों द्वारा रक्षा के लिये आहूत (करते है)। मनुष्य प्रारम्भ किये हुये शोभन यज्ञ में रक्षा के लिए अग्नि की स्तुति करते हैं।

अस्य हि स्वयशस्तर आसा विधर्मन्मन्यसे।

त नाकं चित्रशोचिषं मंद्रं परो मनीषया॥२॥

**अन्वय**- विधर्मन् ! (स्तोतः !) स्वयशस्तरः (त्वम्) अस्य नाक चित्रशोचिष मन्द्र परः तम् (अग्निम्) मनीषया आसा मन्यसे।

**अनुवाद**- हे विधर्मन् ! (स्तोताओ !) श्रेष्ठ यश वाले (तुम) इस दुःखरहित, अद्भुत तेजवाले, स्तवनीय, श्रेष्ठ उस (अग्नि) की प्रबुद्धि युक्त वाणी से स्तुति करते हो।

अस्य वासा उ अर्चिषा च आयुक्त तुजा गिरा।
दिवो न यस्य रेतसा बृहच्छोचंत्यर्चयः॥३॥

**अन्वय** य (अग्निः) तुजा गिरा (च) अयुक्त (अस्ति)। दिवः न (द्योतमानः) यस्य रेतसा (कृत्स्न जगत् व्याप्त) (यस्य) बृहत् अर्चयः शोचन्ति अस्य वै (अग्नेः) अर्चिषा असौ (आदित्यः) (अर्चिष्मान भवति)।

**अनुवाद** - जो (अग्नि) बल और स्तुति से युक्त (है)। आदित्य की भाँति (द्योतमान) जिसकी प्रभा से (सम्पूर्ण जगत् व्याप्त है) (जिसकी) बृहती दीप्ति प्रकाशित होती है। इसी (अग्नि) की प्रभा से यह (आदित्य) (प्रभावान होता है)।

अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ।
अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते॥४॥

**अन्वय** विचेतसः (ऋत्विजः) दस्मस्य अस्य (अग्नेः) (यज्ञ) क्रत्वा वसु रथे (च) आ (भरन्ति)। हव्या अग्निः अधा विश्वासु विक्षु प्रशस्यते।

**अनुवाद**- सुमतियुक्त (ऋत्विक्गण) दर्शनीय इस (अग्नि) का (यज्ञ) कर्म, धन (और) रथ (प्राप्त करते है।) आह्वनीय अग्नि उत्पन्न होते ही समस्त प्रजाओ द्वारा स्तुत होता है।

नू न इद्धि वार्यमासा सचंत सूरयः
ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उतैधि पृत्सु नो वृधे॥५॥

**अन्वय**- (अग्ने !) नु नः (तत्) वर्यम् (धनम्) इद्धि (य) सूरयः आसा सचन्त। ऊर्जः नपात् ! (अग्ने !) (नः) पाहि। (वयम्) अभिष्टये स्वस्तये (च) (त्वा धनम्) शग्धि। उत पृत्सु नः वृधे एधि।

**अनुवाद**- (हे अग्ने !) शीघ्र ही हमें (वह) वरणीय (धन) प्रदान करो (जिसे) स्तोताओ ने स्तोत्र द्वारा प्राप्त किया था। हे बलपुत्र! (अग्ने !) (हमारी) रक्षा करो।(हम) अभीष्ट के लिये (और) कल्याण के लिये (तुमसे धन की) याचना करते है। सङ्ग्राम में हमारी समृद्धि के लिये होओ।

## सूक्त (१८)

**देवता**- अग्नि, **ऋषि**- द्वितात्रेय, **छन्द**- अनुष्टुप्, ५ पड्ति।

प्रातरग्निः पुरुप्रियो विशः स्तवेतातिथिः।
विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति॥१॥

**अन्वय**- पुरुप्रिय· अतिथिः (न पूज्यः) अग्निः प्रात· विश स्तवेत। यः अमर्त्यः (अस्ति) (स· अग्नि·) मर्त्येषु विश्वानि हव्या रण्यति।

**अनुवाद**- बहुप्रिय अतिथि (के समान पूज्य) अग्नि प्रातः लोगो द्वारा स्तुत होता है। जो अमत्यर्य (है) (वह अग्नि) यजमानो मे समस्त हव्य की कामना करता है।

द्विवताय मृक्तावहसे स्वस्य दक्षस्य महना। इदु स धत्त आनुषक्स्तोता चित्ते अमर्त्य॥२॥

**अन्वय** अग्ने ! मृक्तवाहसे द्विताय (त्वम्) स्वस्य दक्षस्य महना (भव)। अमर्त्यः ! (अग्ने !) (हि) सः आनुषक् ते इन्दु धत्ते। (स -ः) (न) स्तोता चित् अस्ति।

**अनुवाद** हे अग्ने ! विशुद्ध यज्ञ करने वाले द्वित को (तुम) अपने बल को देने वाले (होओ)। हे अमर्त्य ! (अग्ने !) (क्योंकि) वह तुम्हे सर्वदा तुम्हें सोम प्रदान करता है। (और वह) (तुम्हारी) स्तुति भी करने वाला है।

तं वो दीर्घायुशोचिषं गिरा हुवे मघोनाम्। अरिष्टो येषां रथो व्यश्वदावन्नीयते॥३॥

**अन्वय**- अश्वदावन् ! (अग्ने !) दीर्घायुशोचिषं ते (त्वाम्) मघोनां (यजमानानाम्) वः गिरा हुवे (येन) येषा (यजमानाना) रथ· (युद्धे) अरिष्ट. वि ईर्यते।

**अनुवाद**- हे अश्वदाता ! (अग्ने !) दीर्घकालिक दीप्ति वाले उस (तुम्हारा) धनी (यजमानो) के लिये हम स्तोत्र द्वारा आह्वान करते हैं। जिससे उन (यजमानो) का रथ (युद्ध में) अहिंसित होकर गमन करे।

चित्रा वा येषु दीधितिरासन्नुक्था पांति ये।
स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि॥४॥

**अन्वय**- येषु चित्रा दीधितिः (भवति) ये वा आसन् उक्था पान्ति (तैः ऋत्विजैः) (यज्ञे) स्तीर्ण बर्हि· परि श्रवासि दधिरे।

**अनुवाद**- जिनके द्वारा नानावधि यज्ञक्रिया (सम्पन्न होती है) और जो उच्चारण द्वारा स्तोत्रो की रक्षा करते है। (उन ऋत्विको द्वारा) स्वर्गप्रापक (यज्ञ) में विस्तीर्ण कुश के ऊपर अन्न स्थापित किया जाता है।

ये मे पंचाशतं ददुरश्वानां सधस्तुति।
द्युमदग्ने महि श्रवो बृहत्कृधि मघोनां नृवदमृत नृणाम्॥५॥

**अन्वय**- अमृत । अग्ने । (तव) सुधस्तुति (अनन्तरम्) य (यजमाना·) मे पञ्चाशतम् अश्वाना ददु (तेषा) मघोना नृणा (त्वम्) द्युमत् नृवत् महि बृहत् श्रव· कृधि।

**अनुवाद** हे अमर ! अग्ने । (तुम्हारी) सुस्तुति (के पश्चात्) जो (यजमान) मुझे पाँच सौ अश्व प्रदान करे (उन) दानी मनुष्यो को (तुम) दीप्तवान परिचारक युक्त अत्यन्त विशाल अन्न वाला बना दो।

## सूक्त - (१६)

***देवता*** अग्नि, ***ऋषि***- वव्रिरात्रेय, ***छन्द***- गायत्री, ३, ४, अनुष्टुप्, ५ विराड्रूपा।

अभ्यवस्थाः प्र जायन्ते प्र वव्रेर्वव्रिश्चिकेत। उपस्थे मातुर्वि चष्टे॥१॥

**अन्वय**- (य अग्निः) मातुः (पृथिव्याः) उपस्थे (सर्वान्) विचष्टे। वव्रिः सः (अग्निः) वव्रे अभि अवस्थाः प्रजायन्ते प्रचिकेत (च) (ज्ञात्वा च ताम् अपनयतु)।

**अनुवाद** (जो अग्नि) माता (पृथिवी) के समीपस्थ (सबको) भलीभाँति देखता है। हव्यवाहक वह (अग्नि) वव्रि की अशोभन अवस्था को जाने (और) भलीभाँति समझे (और जानकर उसका निदारण करे)।

जुहुरे वि चितयन्तोऽनिमिषं नृम्णं पान्ति। आ दृळ्हां पुरं विविशुः॥२॥

**अन्वय** (अग्ने !) (त्वाम्) विचिन्तन्तः (येजनाः) अनिमिष जुहुरे (त्वाम् आह्वन्ति) तव (च) नृम्ण पान्ति (ते) दृळहाम् (अ·।स्यम्) पुरम् आ विविशु·।

**अनुवाद**- (हे अग्ने!) (तुमको) भलीभाँति जानते हुये (जो लोग) सर्वदा यज्ञ के लिये (तुम्हारा आह्वान करते है)। (और) तुम्हारे बल की रक्षा करते हैं (वे) शत्रुओ के द्वारा (अगम्य) पुरी में प्रवेश करते है।

आश्वैत्रेयस्य जन्तवो द्युमद्वर्धन्त कृष्टयः।
निष्कग्रीवो बृहदुक्थ एना मध्वा न वाजयुः॥३॥

**अन्वय**- निष्कग्रीवः बृहदुक्थः वाजयुः कृष्टयः जन्तवः मध्वा न एना (स्तुत्या) श्वैत्रेयस्य (अग्नेः) द्युमत् आ वर्धन्त।

**अनुवाद**· स्वर्णयुक्त ग्रीवावाले, महान स्तोता, अन्नाभिलाषी उत्पन्न होने वाले मनुष्य मधु की भाँति इस (स्तुति) द्वारा अन्तरिक्षवर्ती (अग्नि) के बल को बढाते हैं।

प्रियं दुग्धं न काम्यमजामिजाम्योः सचा। घर्मो न वाजजठरोऽदब्धः शश्वतो दभः॥४॥

**अन्वय** धर्म न वाजजठर· अदब्ध. शश्वत दभः जाम्यो. सचा (अग्निः) दुग्ध न काम्य प्रियम् अजामि (अस्मदीय स्तोत्र शृणोतु)।

**अनुवाद** हव्य की भाँति अन्नयुक्त जठर वाला, अहिसित निरन्तर शत्रुहिसक, द्यावापृथिवी का सहायक (अग्नि) दुग्ध की भाँति कमनीय, प्रिय दोषरहित (हमारे स्तोतृ को सुने)।

क्रीळन्नो रश्म आ भुवः स भस्मना वायुना वेविदानः।
ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः॥५॥

**अन्वय** रश्मे ! (अग्ने !) (वनेषु) क्रीडन् वायुना (प्रेरकेण) (स्व-) भस्मना सवेविदान· (त्वम्) नः आ भुव.। (तव) वक्षणेस्था सुशसिता· धृषजः ताः वक्ष्यः मम यजमानस्य तिग्माः न सन्।

**अनुवाद** हे प्रदीप्त (अग्ने !) (वनो मे) क्रीडा करते हुये वायु द्वारा (उडायी गयी) (अपनी) भस्म से भलीभाँति जाने जाते हुये (तुम) हमारे अभिमुख होओ। (तुम्हारी) शिरा मे स्थित सुतीक्ष्ण शत्रुनाशक वे ज्वालाये इस (मुझ यजमान) के लिये तीक्ष्ण न हो।

## सूक्त - (२०)

*देवता* अग्नि, **ऋषि**- प्रयस्वतात्रेय, **छन्द**- अनुष्टुप्, ४ पङ्क्ति।

यमग्ने वाजसातम त्वं चिन्मन्यसे रयिम्। तं नो गीर्भिः श्रवाय्यं देवत्रा पनया युजम्॥१॥

**अन्वय** वाजसातम ! अग्ने ! (अस्माभिर्दीयमानम्) य (हविर्लक्षणम्) रयि त्वं चित् मन्यसे। नः गीर्भिः श्रावाय्य (च) यजु न (हविर्लक्षणं धनं) (त्वं) देवत्रा पनय।

**अनुवाद** हे सर्वाधिक अन्नप्रद ! अग्ने ! (हम लोगो द्वारा प्रदत्त) जिस (हविर्लक्षण) धन को तुम स्वीकार करते हो हमारी स्तुतियो (एवम्) प्रशस्ति के साथ उस (हविर्लक्षण धन) को (तुम) देवो के निकट ले जाओ॥

ये अग्ने नेरयंति ते वृद्धा उग्रस्य शवसः। अप द्वेषो अप ह्वरोऽन्यव्रतस्य सश्चिरे॥२॥

**अन्वय**- अग्ने ! वृद्धा (अपि) ये ते (हवींषि) न ईरयन्ति (त) उग्रस्य शवसः अप (नीता·) अन्य (अवैदिकस्य) व्रतस्य (पालकाः) द्वेषः ह्वरः (च) अप सश्चिरे।

**अनुवाद** हे अग्ने । समृद्ध होने पर (भी) जो तुम्हारे लिये (हवि) नही लाते (वे) तीव्र बल से रहित (होते है) अन्य (अवदिक) व्रत के (पालक) द्वेष (और) हिंसा से युक्त स्वय को पाते है।

होतार त्वा वृणीमहेऽग्ने दक्षस्य साधनम्। यज्ञेषु पूर्व्यं गिरा प्रयस्वतो हवामहे॥३॥

**अन्वय** अग्ने ! दक्षस्य साधन होतार त्वा प्रयस्वन्तः (वयम्) वृणीमहे। पूर्व्यं (त्वाम्) (वयम्) यज्ञेषु गिरा हवामहे।

**अनुवाद** हे अग्ने ! बल के साधयिता होता तुम्हारा अन्नवान (हम) वरण करते है। श्रेष्ठ (तुम्हारी) (हम) यज्ञ मे स्तुति करते है।

इत्था यथा त ऊतये सहसावन्दिवेदिवे।

राय ऋताय सुक्रतो गोभिः ष्याम सधमादो वीरैः स्याम सधमादः॥४॥

**अन्वय** सहसावन् ! अग्ने ! यथा दिवे दिवे ते ऊतये (वयम्) स्याम (इत्था कुरु) सुक्रतो ! अग्ने ! (येन) वय राये ऋताय च स्याम (तथा कुरु) (येन) गोभिः वीरैः (वयम्) सधमादः स्याम (तथ कुरु)।

**अनुवाद** हे बलवान ! अग्ने ! जिससे प्रतिदिन तुम्हारा रक्षण हम प्राप्त करे (वैसा करो) हे सुक्रतु ! अग्ने ! (जिससे) हम धन और यज्ञ को प्राप्त करे (वैसा करो) (जिससे) गायो पुत्रो द्वारा (हम) आनन्दित हो (वैसा करो)।

## सूक्त - (२१)

***देवता*** अग्नि, ***ऋषि***- ससात्रेय, ***छन्द***- अनुष्टुप्, ४ पङ्क्ति।

मनुष्वत्त्वा नि धीमहि मनुष्वत्समिधीमहि। अग्ने मनुष्वदङ्गिरो देवान्देवयते यज॥१॥

**अन्वय** (अग्ने !) (वयम्) मनुष्वत् त्वा निधीमहि मनुष्वत् त्वा समिधीमहि। अङ्गिरः ! अग्ने ! देवयते (यजमानाय) (त्व) मनुष्वत् देवान् यज।

**अनुवाद**- (हे अग्ने !) (हम) मनु की भाँति तुम्हें स्थापित करते है। मनु की भाँति तुम्हे प्रदीप्त करते है। हे अङ्गिरा ! अग्ने ! देवकामी (यजमान) के लिये (तुम) मनुष्यरूप देवताओ का यजन करो।

त्वं हि मानुषे जनेऽग्ने सुप्रीत इध्यसे। स्रुचस्त्वा यंत्यानुषक्सुजात सर्पिरासुते॥२॥

**अन्वय**- अग्ने ! (स्तोत्रैः) सुप्रीतः त्वं मानुषे जने इध्यसे। सुजातः! अग्ने ! सर्पिरासुते स्रुच: त्वा आनुषक् यन्ति।

**अनुवाद**- हे अग्ने ! (स्तोत्रों द्वारा) प्रशंसित तुम मानव लोगों के लिये प्रदीप्त होते हो। हे सुजन्मा अग्ने ! घृतयुक्त चम्मच तुम्हे निरतर प्राप्त करते हैं।

त्वां विश्वे सजोषसो देवासो दूतमक्रत। सपर्यंतस्त्वा कवे यज्ञेषु देवमीळते॥३॥

**अन्वय** (अग्ने !) सजोषसः विश्वे देवासः त्वां दूतम् अक्रम। कवे ! (अग्ने !) देव त्वा सर्पयन्तः यजमाना (देवानामाह्वयातु त्वाम्) यज्ञेषु ईडते।

**अनुवाद**- हे अग्ने ! प्रीतियुक्त समस्त देवताओ ने तुम्हे दूत बनाया। हे कान्तप्रज्ञ ! (अग्ने !) दिव्य तुम्हारी सेवा करते हुये यजमान (देवाह्वान के लिये तुम्हारी) यज्ञ मे स्तुति करते है।

देवं वो देवयज्ययाग्निमीळीत मर्त्यः

समिद्धः शुक्र दीदिह्यृतस्य योनिमासदः ससस्य योनिमासदः॥४॥

**अन्वय**- देवयज्यया व मर्त्यः देवम् अग्निम् ईळीत्। शुक्र ! (अग्ने !) समिद्धः त्व (अस्माभि) दीदिहि। ऋतस्य योनिम् आ असद। ससस्य योनिम् आ ससद.।

**अनुवाद** देवयजन के लिये हम मनुष्य देव अग्नि की स्तुति करते है। हे तेजस्वी ! (अग्ने !) समिद्ध तुम (हमारे द्वारा) प्रदीप्त होओ। स्वर्ग की साधनभूत वेदी पर आकर बैठो। सस की वेदी पर आकर बैठो।

## सूक्त - (२२)

***देवता***- अग्नि, ***ऋषि***- विश्वसामात्रेय, ***छन्द***- अनुष्टुप्, ४ पङ्क्ति।

प्र विश्वसामात्रिवदर्चा पावकशोचिषे। यो अध्वरेष्वीड्यो होता मंद्रतमो विशि॥१॥

**अन्वय**- विश्वसामन् ! (ऋषे !) अत्रिवत् पावकशोचिषे (अग्नये) प्र अर्च। य अध्वरेषु ईड्य· होता, विशि मन्द्रतम (अस्ति)।

**अनुवाद**- हे विश्वसामन् ! (ऋषे) अत्रि की भाँति पवित्र दीप्ति वाले (अग्नि) की अर्चना करो जो यज्ञ मे स्तुत्य, होता, प्रजाओ मे सर्वाधिक स्तुत (होता है)।

न्यग्निं जातवेदसं दधाता देवमृत्विजम्। प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः॥२॥

**अन्वय**- (यजमानाः !) (यूय) जातवेदसं देवम्, ऋत्विजम् अग्नि नि दधात। अद्य देवव्यचस्तमः यज्ञः (अग्नि.) (नः दीयमान हवि) (देवान्) आनुषक् प्रएतु।

**अनुवाद**- (हे यजमानो !) तुम जातवेदस, दिव्य, ऋत्विज अग्नि को सुस्थापित करो। आज देवताओ का अतिप्रिय यजनीय (अग्नि) (हमारे द्वारा प्रदत्त हवि को) (देवताओं) के समक्ष निरन्त ले जाये।

चिकित्विन्मनसं त्वा देवं मर्तास ऊतये। वरेण्यस्य तेऽवस इयानासो अमन्महि॥३॥

**अन्वय**- चिकित्वमनसः ! (अग्ने !) (वयं) मर्तासः देवं त्वा ऊतये (हुवे)। इयनासः (वय) वरेण्यस्य ते अवसः अमन्महि।

**अनुवाद**- हे ज्ञानमनस् ! (अग्ने !) (हम) मनुष्य दिव्य तुम्हें रक्षा के लिये (बुलाते है)। समीप आते हुये (हम) वरणीय तुम्हारी रक्षा के लिये स्तुति करते हैं।

अग्ने चिकिद्ध्य१स्य न इदं वचः सहस्य।

तं त्वा सुशिप्र दम्पते स्तोमैर्वर्धन्त्यत्रयो गीर्भिः शुम्भन्त्यत्रयः॥४॥

**अन्वय** सहस्य ! अग्ने ! नः अस्य (स्तोत्रस्य) इद वचः चिकिद्धि। सुशिप्र ! दम्पते ! (अग्ने !) त त्वाम् अत्रयः (स्तोमैः) वर्धन्ति अत्रय च गीर्भि (त्वाम्) शुम्भन्ति।

**अनुवाद**- हे बलपुत्र ! अग्ने ! हमारे इस (स्तोत्र) की वाणी को जानो। हे सुन्दर कपोल वाले ! गृहपते ! (अग्ने !) उस तुम्हे अत्रिपुत्र (स्तोत्रो द्वारा) बढाते है और अत्रिपुत्र स्तुति द्वारा (तुम्हे) अलङ्कृत करते है।

## सूक्त - (२३)

***देवता*** अग्नि, **ऋषि** द्युम्नात्रेय, **छन्द**- अनुष्टुप्, ४ पङ्क्ति।

अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम्। विश्वा यश्चर्षणीरभ्या३सा वाजेषु सासहत्॥१॥

**अन्वय** अग्ने ! (मह्य) द्युम्नस्य प्रासहा (शत्रून्) सहन्त (पुत्र न) रयिम् आ भर यः आसा वाजेषु विश्वाः चर्षणीः अभि ससहत्।

**अनुवाद** हे अग्ने ! (मुझ) द्युम्न को प्रकृष्ट बल से (शत्रुओं को) पराभूत करने वाला (पुत्ररूप) धन दो। जो स्तोत्रो द्वारा युद्धो मे समस्त शत्रुओ को अभीभूत करे।

तमग्ने पृतनाषहं रयिं सहस्व आ भर। त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमतः॥२॥

**अन्वय**- सहस्वः ! अग्ने ! त्वं हि सत्यः अद्भुतः गोमतः (च) वाजस्य दाता असि। (मह्य) (त्वम्) (शत्रूणा) पृतनासह त (पुत्र न) रयिम् आ भर।

**अनुवाद**- हे बलवान ! अग्ने ! तुम सत्यरूप, अद्भुत (और) गोयुक्त धन के दाता हो। (मुझे) (तुम) (शत्रुओ की) सेनाओ को परास्त करने में समर्थ (पुत्ररूप) धन प्रदान करो।

विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिषः। होतारं सद्मसु प्रियं व्यन्ति वार्या पुरु॥३॥

**अन्वय** (अग्ने !) होतार प्रियं (च) त्वा सजोषसः वृक्तबर्हिषः विश्वे जनासः सद्मसु पुरु वार्या (धनानि) व्यन्ति।

**अनुवाद**- हे अग्ने ! होता (और) प्रिय तुमसे समान प्रीतिवाले कुशच्छेदक समस्त ऋत्विक यज्ञगृह मे बहुविध वरणीय (धन) की याचना करते हैं।

स हि ष्मा विश्वचर्षणिरभिमाति सहो दधे।

अग्न एषु क्षयेष्वा रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि॥४॥

**अन्वय**- (अग्ने !) सः हि विश्वचर्षणिः (ऋषि.) अभिमाति सहः दधे। शुक्र ! अग्ने ! न एषु क्षयेषु रेवत् आ दीदिहि। पावक ! (अग्ने !) (त्वम्) द्युमत् दीदिहि।

**अनुवाद** (हे अग्ने !) वह सबको देखने वाला (ऋषि) शत्रुओ के हिंसक बल को धारण करे। हे दीप्त ! अग्ने ! हमारे इस घर मे धनयुक्त प्रकाश दो। हे पापशोधक ! (अग्ने !) (तुम) प्रकाशित होते हुये प्रदीप्त होओ।

## सूक्त - (२४)

***देवता***- अग्नि, ***ऋषि***- गौपायन लौपायन वा बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्च, ***छन्द***- द्विपदा विराट्।

अग्ने त्वं नो अंतम उत त्राता शिवो भवा वरूथ्यः।

वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं रयिं दाः॥१॥२॥

**अन्वय** अग्ने ! त्व त्राता, शिवः, वरुथ्य नः अन्तम. उत भव।

**अनुवाद** हे अग्ने ! तुम रक्षक, कल्याणकारी, वरणीय और हमारे निकटतम होओ।

**अन्वय** वसुः वसुश्रवा (च) अग्निः (नः) अच्छ नक्षि। (सः) (नः) द्युमन्तम रयि दाः।

**अनुवाद** निवासप्रद (और) प्रभूतअन्नवान अग्नि हमारी ओर व्याप्त हो। (वह) (हमे) दीप्ततम धन दे।

स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्।

तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः॥३॥४॥

**अन्वय**- अग्ने ! स· (त्वम्) नः बोधि (नः) हव श्रुधि। अघायतः समस्मात् नः उरुष्य।

**अनुवाद** (हे अग्ने !) वह (तुम) हमे जानो (हमारे) आह्वान को सुनो। पापेच्छुक समस्त लोगों से हमारी रक्षा करो।

**अन्वय** शोचिष्ठ ! दीदिवः ! (अग्ने !) (वयं) सुम्नाय सखिभ्यः च नून त त्वा ईमहे।

**अनुवाद**- हे शोधकतम ! प्रदीप्त (अग्ने !) (हम) सुख एव मित्रता के लिये उस तुमसे याचना करते हैं।

## सूक्त - (२५)

***देवता*** अग्नि, ***ऋषि***- वसुयवात्रेय, ***छन्द***- अनुष्टुप्।

अच्छा वो अग्निमवसे देवं गासि स नो वसुः।

रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः॥१॥

**अन्वय**- (वसुयवः !) वः अवसे देवम् अग्निम् अच्छ गासि। वसुः ऋषूणां पुत्रः ऋतावा सः (अग्निः) नः (कामनाम्) रासत् द्विषः च (अस्मान्) पर्षति।

**अनुवाद**- (हे वसुयवो !) तुम लोग रक्षा के लिये देव अग्नि का भलीभाँति स्तवन करो। निवासप्रद ऋषियो का पुत्र सत्यवान वह (अग्नि) हमारी (कामनाओ) को पूर्ण करे और शत्रुओ से (हमारी) रक्षा करे।

स हि सत्यो यं पूर्वे चिद्देवासश्चिद्यमीधिरे। होतारं मंद्रजिह्वमित्सुदीतिभिर्विभावसुम्॥२॥

**अन्वय**- होतार मन्द्रजिहव सुदीतिभिः विभावसु यम् अग्नि पूर्वे (ऋषयः) य (च) देवास ईधिरे स हि सत्य· (अस्ति)।

**अनुवाद**- होता, मादक जिह्वा वाले, सुदीप्ति से प्रभायुक्त जिस अग्नि को पूर्ववर्ती (ऋषि) (और) जिसको देवता प्रदीप्त करते ह वही सत्य है।

स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या। अग्ने रायो दिदीहि नः सुवृक्तिभिर्वरेण्य॥३॥

**अन्वय** वरेण्यः ! अग्ने ! स. (त्वम्) नः वरिष्ठया श्रेष्ठया धीती सुमत्या सुवृक्तिभिः च (प्रीतः सन्) नः रायः दिदीह।

**अनुवाद** हे वरणीय ! अग्ने ! वह (तुम) हमारी स्वीकारयोग्य श्रेष्ठ परिचर्या से, सुमति से और सुस्तुतियों से (प्रसन्न होकर) हमे धन प्रदान करो।

अग्निर्देवेषु राजत्यग्निर्मर्तेष्वाविशन। अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत॥४॥

**अन्वय** यः अग्नि. देवेषु राजति (यः) अग्निः मर्तेषु (मध्ये) अविशन् (यः) अग्निः नः हव्यवाहनः (अस्ति) (यजमाना ! यूय) (त) अग्नि धीभिः सर्पयत।

**अनुवाद** जो अग्नि देवताओं में प्रकाशित होता है (जो) अग्नि मनुष्यो के (मध्य) प्रविष्ट होता है (जो) अग्नि हमारा हव्यवाहन (ह) (हे यजमानो ! तुम) (उस) अग्नि की स्तुतियो द्वारा परिचर्या करो।

अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमम्। अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे॥५॥

**अन्वय**- दाशुषे (यजमानाय) अग्निः तुविश्रवस्तमं तुविब्रह्मणम् उत्तमम् (शत्रुभ्यः) अतूर्त श्रवयत्पति पुत्र ददाति।

**अनुवाद**- दाता (यजमान) को अग्नि बहुविधअन्नयुक्त, बहुत स्तोत्र वाला उत्तम (शत्रुओ द्वारा) अहिसित पितरो के यश को फलाने वाला पुत्र देता है।

अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः। अग्निरत्यं रघुष्यदं जेतारमपराजितम्॥६॥

**अन्वय**- अग्निः (नः) सत्पतिं (पुत्रं) दादाति यः युधा नृभिः ससाह। अग्निः (नः) रघुस्यदम्, जेतारम् अपराजितम् अत्यम् (अपि ददाति)।

**अनुवाद**- अग्नि (हमें) सत्य का पालन करने वाला (पुत्र) देता है। जो युद्ध मे शत्रुओ को पराभूत करता है। अग्नि (हमें) तीव्र वेगवाला, जयनीय अपराजित अश्व (भी प्रदान करता है)।

यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो। महिषीव त्वद्रयिस्त्वद्वाजा उदीरते॥७॥

**अन्वय** यत् वाहिष्ठ (स्तोत्रम् अस्ति) तत् अग्नये (अस्ति) विभावसो ! (अग्ने!) अस्मभ्य बृहत् (धनम्) अर्च। महिषी इव त्वत् रयि (ईरते) त्वत् वाज· उत् ईरते।

**अनुवाद**- जो श्रेष्ठतम (स्तोत्र है) वह अग्नि के लिये (है) हे विभावसु ! (अग्ने !) (हमे) बहुत (धन) प्रदान करो। महिषी की भाँति तुमसे धन (उत्पन्न होता है) तुमसे अन्न भी उत्पन्न होता है।

तव द्युमंतो अर्चयो ग्रावेवोच्यते बृहत्।

उतो ते तन्यतुर्यथा स्वानो अर्त त्मना दिवः॥८॥

**अन्वय** अग्ने ! तव अर्चय· द्युमन्तः (सन्ति) ग्रावा इव बृहत् उच्यते। दिवः ते स्वानः तन्यतु· यथा त्मना अर्त।

**अनुवाद** हे अग्ने। तुम्हारी शिखाये दीप्तिमती (है) प्रस्तर की भाँति विशाल कही जाती है। दिव्य तुम्हारा शब्द मेघगर्जन की भाँति स्वय व्याप्त होता है।

एवाँ अग्निं वसूयवः सहसान ववंदिम। स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः॥६॥

**अन्वय** (वय) वसुयवः एवं सहसानम् अग्निं ववन्दिम। सुक्रतुः सः (अग्निः) नावा इव न· विश्वा द्विष· अति पर्षत्।

**अनुवाद**- (हम) वसुयुगण इस प्रकार से बलवान अग्नि का स्तवन करते है। सुकर्मा वह (अग्नि) नौका की भाँति हमे समस्त शत्रुओ से पार ले जाये।

## सूक्त - (२६)

***देवता***- अग्नि, ***ऋषि***- वसुयवात्रेय, ***छन्द***- गायत्री।

अग्ने पावक रोचिषा मंद्रया देव जिह्वया। आ देवान्वक्षि यक्षि च॥१॥

**अन्वय**- पावक ! अग्ने ! (त्व) (स्व) रोचिषा देव मन्द्रया (च) जिह्वया देवान् (यज्ञे) आ वक्ष यक्षि च।

**अनुवाद**- हे शोधक ! अग्ने ! (तुम) (अपनी) दीप्ति से (और) देवों की मधुरवाणी से देवताओ को (यज्ञ मे) ले आओ और यजन करो।

तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम्। देवाँ आ वीतये वह॥२॥

**अन्वय**- घृतस्नो ! चित्रभानो ! (अग्ने !) तं स्व· दृशं त्वाम् (वयम्) ईमहे। (हविम्) वीतये देवान् आ वह।

**अनुवाद**- हे घृतोत्पन्न ! बहुविधरश्मिवाले ! (अग्ने !) उस सर्वद्रष्टा तुमसे (हम) याचना करते है। (हव्य) भक्षण के लिये देवताओं को लाओं।

वीतिहोत्रं त्वा कवे द्युमंतं समिधीमहि। अग्ने बृहतमध्वरे॥३॥

**अन्वय** - कवे ! अग्ने! वीतिहोत्र, द्युमन्त (च) त्वा (वयम्) अध्वरे समिधीमहि।

**अनुवाद** - हे कान्तप्रज्ञ! अग्ने! हव्यभक्षक, दीप्तिवान (और) महान तुम्हे (हम) यज्ञ मे प्रदीप्त करते है।

अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये। होतारं त्वा वृणीमहे।।४।।

**अन्वय**- अग्ने ! विश्वेभिः देवेभिः (सह) हव्यदातये (यजमानस्य यज्ञे) आ गहि। (वयम्) होतार त्वा वृणीमहे।

**अनुवाद**- हे अग्ने ! समस्त देवताओ के (साथ) हविप्रदाता (यजमान के यज्ञ) मे आओ। (हम) होता तुमसे प्रार्थना करते है।

यजमानाय सुन्वत आग्ने सुवीर्यं वह। देवैरा सत्सि बर्हिषि।।५।।

**अन्वय**- अग्ने ! सुन्वते यजमानाय (त्वम्) सुवीर्यम् आ वह। देवैः (च) (सह) बर्हिषि आ सत्सि।

**अनुवाद**- हे अग्ने ! अभिषव करने वाले यजमान को (तुम) शोभन बल प्रदान करो (और) देवताओ के साथ कुश पर बठो।

समिधानः सहस्रजिदग्ने धर्माणि पुष्यसि। देवानां दूत उक्थ्यः।।६।।

**अन्वय** सहस्रजित् ! अग्ने ! (त्वम्) समिधानः उक्थ्य· देवाना (च) दूतः (सन्) (नः यगादि) धर्माणि पुष्यसि।

**अनुवाद**- हे सहस्रजेता ! अग्ने ! (तुम) प्रदीप्त, प्रशंसनीय (एवम्) देवताओ के दूत (होकर) (हमारी यज्ञादि) क्रिया का पोषण करते हो।

न्यग्निं जातवेदसं होत्रवाहं यविष्ठ्यम्। दधाता देवमृत्विजम्।।७।।

**अन्वय**- (यजमाना !) (यूयं) जातवेदस, होत्र वाहन, यविष्ठय, देवम् ऋत्विजम् अग्नि नि दधात।

**अनुवाद**- (हे यजमानो !) (तुम), जातवेदस, यज्ञप्रापक, युवतम, दिव्य, ऋत्विक् अग्नि को सस्थापित करो।

प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः। स्तृणीत बर्हिरासदे।।८।।

**अन्वय**- देवव्यचस्तमः यज्ञः अद्य (देवान्) आनुषक् प्र एतु। (ऋत्विजः !) (अग्नेः) आसदे बर्हिः स्तृणीत।

**अनुवाद**- दिव्य स्तोताओं द्वारा हवि आज (देवताओ के पास) निरन्तर पहुंचे। (हे ऋत्विजो !) (अग्नि के) बैठने के लिये कुश बिछाओ।

एदं मरुतो अश्विना मित्रः सीदंतु वरुणः। देवासः सर्वया विशा।।६।।

**अन्वय** मरुतः, अश्विना, मित्रः, वरुणः (इति) देवासः सर्वया विशा (सह) इद (बर्हिः) आ सदन्तु।

**अनुवाद** मरुत, अश्विनौ, मित्र, वरुण (आदि) देवता समस्त प्रजाओ के (साथ) इस (कुश) पर आकर बैठे।

## सूक्त - (२७)

*देवता*- अग्नि, ६ इन्द्राग्नी, ***ऋषि***- त्र्यरुण, त्रिसदस्यु भरत आदि राजा, ***छन्द***- त्रिष्टुप्, ४, ५, अनुष्टुप्।

अनस्वन्ता सत्पतिर्मामहे मे गावा चेतिष्ठो असुरो मघोनः।
त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर त्र्यरुणश्चिकेत॥१॥

**अन्वय**- वैश्वानर ! अग्ने ! (त्वम्) सत्पतिः, चेतिष्ठः, असुरः मघोनः (असि), त्रैवृष्णः त्र्यरुणः मे अनस्वन्ता गावा, (च) दशभिः सहस्रैः (हिरण्य)ममहे चिकेत।

**अनुवाद** हे वैश्वानर ! अग्ने ! (तुम) सत्पति, सर्वाधिक ज्ञानवान, बलशाली, धनवान (हो)। त्रिवृष्णु के पुत्र त्र्यरुण ने मुझे शकटयुक्त दो वृषभ (और) दस सहस्र (सुवर्ण) प्रदान कर ख्याति प्राप्ति की।

यो मे शता च विंशतिं च गोनां हरी च युक्ता सुधुरा ददाति।
वैश्वानर सुष्टुतो वावृधानोऽग्ने यच्छ त्र्यरुणाय शर्म॥२॥

**अन्वय** यः (त्र्यरुणः) मे शता (हिरण्य) विंशति च गोना (रथेन) युक्ता सुधुरा च हरी ददाति। वैश्वानर ! अग्ने ! (अस्माभिः) सुस्तुतः ववृधानः (त्वं) (तस्मै) त्र्यरुणाय शर्म यच्छ।

**अनुवाद** जिस (त्र्यरुण) ने मुझे सौ (सुवर्ण) और बीस गायें और (रथ) से युक्त भारवहन करने वाले दो अश्व प्रदान किया था। हे वैश्वानर ! अग्ने ! (हमारे द्वारा) भलीभाँति स्तुत, प्रवृद्ध होते हुये (तुम) (उस) त्र्यरुणः को सुख प्रदान करो।

एवा ते अग्ने सुमतिं चकानो नविष्ठाय नवमं त्रसदस्युः।
यो मे गिरस्तुविजातस्य पूर्वीर्युक्तेनाभि त्र्यरुणो गृणाति॥३॥

अन्वय यः त्र्यरुण तुविजातस्य मे पूर्वीः गिरः अभियुक्तेन (चेतसा) गृणाति। अग्ने ! नविष्ठाय त्रसदस्युः एव नवमं सुमतिं चकान।

**अनुवाद**- जो त्र्यरुण बहुसन्तति वाले मेरी अनेक स्तुतियाँ एकाग्रता से ग्रहण करता है। हे अग्ने। अत्यन्त स्तुत्य तुम्हारे लिये त्रिसदस्यु ने भी नूतन स्तुति को बनाया है।

यो म इति प्रवोचत्यश्वमेधाय सूरये। ददृचा सनिं यते ददन्मेधामृतायते॥४॥

**अन्वय**- (अग्ने !) (त्वाम्) सूरये ऋतायते मे अश्वमेधस्य (धन देहि) यः इति प्रवोचति (तस्मै त्वम्) ऋचा ददत् सनि यते मेधा (च) ददत्।

**अनुवाद** (हे अग्ने!) (तुमसे) दानशील यज्ञकामी मुझको अश्वमेध के लिये (धन दो) जो ऐसा बोलता है (उसे तुम) स्तोत्र देते हो, धन प्रदान करते हो (और) बुद्धि देते हो।

यस्य मा परुषाः शतमुद्धर्षयन्त्युक्षणः। अश्वमेधस्य दानाः सोमा इव त्र्याशिरः॥५॥

**अन्वय**- यस्य अश्वमेध दाना· परुषा· शतम् उक्षण मा उद्धर्षयन्ति (अग्ने !) त्र्याशिर सोमा· इव (ते उक्षणः तव प्रीणनाय भवन्तु)।

**अनुवाद**- जिसके अश्वमेध मे दिये गये कामनापूरक सौ बैल मुझे प्रसन्न करते है (हे अग्ने !) तीन पदार्थो (दही, सत्तू, दुग्ध) से निर्मित सोम की भाँति (वे बैल तुम्हे प्रसन्न करे)।

इंद्राग्नी शतदाव्न्यश्वमेधे सुवीर्यं। क्षत्रं धारयत बृहद्दिवि सूर्यमिवाजरम्॥६॥

**अन्वय** इन्द्राग्नी ! (युवाम्) शतदाव्नी (असि)। अश्वमेध (यज्ञे) सुवीर्य बृहत् दिवि सूर्यम् इव अजर क्षत्र धारयतम्।

**अनुवाद**- हे इन्द्राग्नी ! (तुम दोनो) अपरिमित धन के दाता (हो)। अश्वमेध (यज्ञ) मे श्रेष्ठ बलयुक्त, विशाल अन्तरिक्ष मे सूर्य की भाँति जरारहित धन प्रदान करो।

## सूक्त - (२८)

**देवता**- अग्नि, **ऋषि**- विश्ववारात्रेयी, **छन्द**- १, ३, त्रिष्टुप्, २ जगती, ४ अनुष्टुप्, ५ ६ गायत्री।

समिद्धो अग्निर्दिवि शोचिरश्रेत्प्रत्यङ्ङुषसमुर्विया वि भाति।
एति प्राची विश्ववारा नमोभिर्देवाँ ईळाना हविषा घृताची॥१॥

**अन्वय**- समिद्ध· अग्नि· दिवि शोचिः अश्रेत्। उषसम् (च) प्रत्यङ् उर्विया विभाति। नमोभिः देवान् ईळाना हविषा घृताची (च) (आदाय) विश्ववारा (अग्निं) प्राची एति।

**अनुवाद** समिद्ध अग्नि द्युलोक में तेज को फैलाता है (और) उषा के अभिमुख विस्तृत होकर शेभित होता है। नमस्कार द्वारा देवताओं का स्तवन करती हुयी हवि (एव) घृतयुक्त स्रुवा (लेकर) विश्ववारा (अग्नि) के अभिमुख जाती है।

समिध्यमानो अमृतस्य राजसि हविष्कृण्वंतं सचसे स्वस्तये।
विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः॥२॥

**अन्वय**- (अग्ने !) समिध्यमानः (त्वम्) अमृतस्य राजसि। हविः कृणवन्तं (यजमानै) स्वस्तये सचसे। य (समीपं त्वम्) इन्वसि स· विश्वं द्रविण धत्ते। अग्ने ! च (यजमानः) अतिथ्य (हव्यं) (तव) पुरः इत् नि धत्ते।

**अनुवाद** (हे अग्ने !) समृद्ध होते हुये तुम जल पर प्रभुत्व करते हो। जिसके (समीप) (तुम) जाते हो वह समस्त धन को धारण करता है और हे अग्ने ! (यजमान) अतिथि के योग्य (हव्य) (तुम्हारे) समक्ष रखता है।

अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।
स जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि॥३॥

**अन्वय**- अग्ने ! (अस्माकं) महते सौभगाय (शत्रून्) शर्ध। तव द्युम्नानि उत्तमानि सन्तु। (अग्ने !) जास्पत्यं सम् सुयमम् आ कृणुष्व। (न) शत्रुयता महांसि अभितिष्ठ।

**अनुवाद**- हे अग्ने ! (हम लोगो के) प्रभूत ऐश्वर्य के लिये (शत्रुओ का) दमन करो। तुम्हारा धन उत्कृष्ट हो। (हे अग्ने !) दाम्पत्य कार्य को अच्छी तरह सुनियमित करो। (हमसे) शत्रुता का भाव रखने वालो के तेज को आक्रान्त करो।

समिद्धस्य प्रमहसोऽग्ने वंदे तव श्रियम्। वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे॥४॥

**अन्वय** अग्ने ! प्रमहसः (अहं) समिद्धस्य तव श्रियं वन्दे। (अग्ने !) (त्वम्) वृषभः, द्युम्नवान्, अध्वरेषु सम इध्यसे असि।

**अनुवाद** हे अग्ने ! प्रकृष्ट तेजयुक्त (मै) समिद्ध तुम्हारी दीप्ति की वन्दना करती हूँ। (हे अग्ने !) (तुम) कामनापूरक, धनवान यज्ञो मे भलीभाँति प्रदीप्त होने वाले हो।

समिद्धो अग्न आहुत देवान्यक्षि स्वध्वर। त्वं हि हव्यवाळसि॥५॥

**अन्वय** (यजमानैः) आहुत ! स्वध्वर अग्ने ! समिद्धः (त्वम्) देवान् यक्षि हि त्व हव्यवाट् असि।

**अनुवाद**- हे (यजमानो द्वारा) आहूत ! शोभनयज्ञ वाले अग्ने ! भलीभाँति प्रदीप्त तुम देवताओ का यजन करो क्योंकि तुम हव्यवहन करने वाले हो।

आ जुहोता दुवस्यताग्निं प्रयत्यध्वरे। वृणीध्वं हव्यवाहनम्॥६॥

**अन्वय**- (ऋत्विजः !) (यूयं) (नः) अध्वरे प्रयति हव्यवाहनम् अग्निम् आ जुहोत (त) दुवस्यत वृणीध्वम् च।

**अनुवाद** (हे ऋत्विजो !) (तुम) (हमारे) यज्ञ मे प्रवृत्त होकर हव्यवाहन अग्नि मे भलीभाँति हवन करो (उसकी) परिचर्या और वरण करो।

## सूक्त - (२६)

***देवता***- अग्नि, ६ (प्रथमपादस्य) उशना वा, ***ऋषि***- गौरवीति शाक्त्य, ***छन्द***- त्रिष्टुप्।

त्र्यर्यमा मनुषो देवताता त्री रोचना दिव्या धारयंत।
अर्चंति त्वा मरुतः पूतदक्षास्त्वमेषामृषिरिद्रासि धीरः॥१॥

**अन्वय**- देवताता (यज्ञे) मुनषः त्री अर्यमा दिव्या (च) (अन्तरिक्षे) त्री रोचना (मरुतः) धारयन्ति। इन्द्र. । धीरः त्वा पूतदक्षा मरुत. अर्चन्ति। त्वम् एषाम् ऋषिः असि।

**अनुवाद**- देवताओ के (यज्ञ मे) मनुष्य सम्बन्धी तीन तेज (और) दिव्य (अन्तरिक्ष) मे तीन तेज को (मरुद्गण) धारण करते है। हे इन्द्र ! बुद्धिमान तुम्हारी पवित्र बल वाले मरुद्गण अर्चना करते है। तुम इनके द्रष्टा होओ।

अनु यदीं मरुतो मंदसानमार्चन्निंद्रं पपिवांसं सुतस्य।
आदत्त वज्रमभि यदहिं हन्नपो यह्वीरसृजत्सर्तवा उ॥२॥

**अन्वय**- यत् मरुत· सुतस्य पपिवास मन्दसानम् ईम् इन्द्रम् अनु आर्चन् (तदा इन्द्रः) वज्रम् आ अदत्त (तेन) अहिम् अभि हन यह्वीः च अप· सर्तवै (गन्तुम्) असृजत्।

**अनुवाद**- जब मरुतों ने सोम के पान से तृप्त हुये इस इन्द्र की अर्चना की (तब इन्द्र ने) वज्र आकर ग्रहण किया (उससे) वृत्र को मारा और विशाल जलराशि को स्वेच्छा से (बहने के लिये) मुक्त कर दिया।

उत ब्रह्मणो मरुतो मे अस्येंद्रः सोमस्य सुषुतस्य पेयाः।
तद्धि हव्यं मनुषे गा अविंददहन्नहिं पपिवाँ इंद्रो अस्य॥३॥

**अन्वय**- ब्रह्माणः ! मरुतः ! इन्द्र ! उत् (यूयम्) मे अस्य सुषुतस्य सोमस्य पेयाः। तत् हि हव्य मानुषे गा. अविन्दत्। अस्य च (सोमस्य) पपिवान् इन्द्रः अहिम् अहन्।

**अनुवाद**- हे मन्त्रज्ञाता ! मरुतो ! और इन्द्र ! (तुम) मेरे इस भलीभाँति अभिषुत सोम का पान करो। इस हव्य से मनुष्य गाये प्राप्त करते है और इस (सोम) का पान करने वाले इन्द्र ने वृत्र को मारा।

आद्रोदसी वितरं वि ष्कंभायत्संविव्यानश्चिद्भियसे मृगं कः।
जिगर्तिमिंद्रो अपजर्गुराणः प्रति श्वसंतमव दानवं हन्॥४॥

**अन्वय**- (इन्द्र :) (सोमपानस्य) आत् रोदसी वितर विस्कभायत् सम्व्यानः (इन्द्रः) मृग चित् (पलायमान वृत्र) श्वसन्त दानवं (वृत्रम्) अपजर्गुराणः प्रति अव हन्।

**अनुवाद**- (इन्द्र ने) (सोमपान के) पश्चात् द्यावापृथिवी को अत्यधिक स्थिर कर दिया। गमनशील (इन्द्र) ने मृग की भाँति (पलायमान वृत्र को) भयभीत कर दिया। इन्द्र ने छिप रहे (भय से) श्वास लेते हुये दानुपुत्र (वृत्र) को आच्छादन विहीन करते हुये जाकर मारा।

अध क्रत्वा मघवन्तुभ्यं देवा अनु विश्वे अददुः सोमपेयम्।
यत्सूर्यस्य हरितः पतंतीः पुरः सतीरुपरा एतशे कः॥५॥

**अन्वय**- मघवन् ! (इन्द्र !) यत् (त्वम्) एतशे पतन्ती· पुरः सतीः सूर्यस्य हरिव· उपराः कः अद्य (तव एन) क्रत्वा विश्वे देवा अनु तुभ्यम् सोमपेयम् आददु·।

**अनुवाद**- हे धनवान ! (इन्द्र !) जब (तुमने) एतश के लिये आते हुये सम्मुखवर्ती सूर्य के अश्वो को मन्दगति किया था तब (तुम्हारे इस) कर्म के कारण समस्त देवताओ ने क्रमशः तुम्हे सोमरस पीने के लिये दिया था।

नव यदस्य नवतिं च भोगान्त्साकं वज्रेण मघवा विवृश्चत्।
अर्चन्तीन्द्रं मरुतः सधस्थे त्रैष्टुभेन वचसा बाधत द्याम्॥६॥

**अन्वय** यत् मघवा (इन्द्र :) अस्य (शम्बरस्य) नव नवति च भोगान् साक वज्रेण विवृश्चत् (तदा) मरुतः सधस्थे त्रैष्टुभेन वचसा इन्द्रम् अर्चन्ति (तस्य च स्तोत्रस्य) द्याम् (शम्बरं) बाधत।

**अनुवाद** जब धनवान (इन्द्र) ने इस (शम्बर) के निन्यानवे नगरो को एक साथ वज्र से नष्ट किया (तब) मरुतो ने युद्धभूमि मे त्रिष्टुप् छन्द के द्वारा इन्द्र की अर्चना की (और उस स्तोत्र की) दीप्ति से (शम्बर को) पीडित किया।

सखा सख्ये अपचत्तूयमग्निरस्य क्रत्वा महिषा त्री शतानि।
त्री साकमिन्द्रो मनुषः सरांसि सुतं पिबद्वृत्रहत्याय सोमम्॥७॥

**अन्वय**- सखा (अग्निः) सख्ये अस्य इन्द्रस्य क्रत्वा त्रि शतानि महिषा तूयम् अपचत्। इन्द्रः वृत्रहन्याय मनुष· त्री सरासि सुत सोम साकं पिबत्।

**अनुवाद**- मित्रभूत (अग्नि) ने सखा इस इन्द्र के निमित्त तीन सौ वृषभो को शीघ्र पकाया। इन्द्र ने वृत्र को मारने के लिये मनुष्यो के तीन पात्रों में अभिसुत सोम एक साथ पिया।

त्री यच्छता महिषाणामघो मास्त्री सरांसि मघवा सोम्यापाः।
कारं न विश्वे अह्वंत देवा भरमिन्द्राय यदहिं जघान॥८॥

**अन्वय**- मघवा (इन्द्रः) यत् त्री शता महिषाणा माः अघः त्री च सरांसि सोम्यापाः (तदा) अहि जघान। कार न विश्वे देवाः (सोमेन) भरम् इन्द्राय आह्वन्त।

**अनुवाद** धनवान (इन्द्र) ने जब तीन सौ वृषभो का मास खाया (और) तीन पात्रो मे स्थित सोम का पान किया (तब) (उसने) अहि को मारा। स्वामी की भाँति समस्त देवताअें ने (सोम) से पूर्ण इन्द्र का आह्वान किया।

उशना यत्सहस्यैरयातं गृहमिन्द्र जूजुवानेभिरश्वैः।
वन्वानो अत्र सरथं ययाथ कुत्सेन देवैरवनोर्ह शुष्णम्॥९॥

**अन्वय**- इन्द्र । यत् (त्वम्) उशना (च) सहस्यैः जूजुवानेभिः अश्वैः (कुत्सस्य) ग्रहम् अयातम् (तदा) अत्र वन्वानः (त्वम्) कुत्सेन देवैं (च सह) सरथ ययाथ। (इन्द्र !) (त्वम्) हि शुष्मणम् अवनोः।

**अनुवाद**- हे इन्द्र । जब (तुम) (और) उशना अभिभवशील द्रुतगामी अश्वो द्वारा (कुत्स के) घर मे आये (तब) यहाँ मारकर (तुम) (और) देवताओ (के साथ) समान रथ पर आरूढ हुये। (हे इन्द्र !) (तुम) ही शुष्म को मारने वाले हो।

प्रान्यच्चक्रमवृहः सूर्यस्य कुत्सायान्यद्वरिवो यातवेऽकः।

अनासो दस्यूँरमृणो वधेन नि दुर्योण आवृणङ्मृध्रवाचः॥१०॥

**अन्वय**- (इन्द्र । त्वम्) सूर्यस्य (द्विचक्रस्य) अन्यत् चक्र प्र अवृहः। अन्यत् च वारिवः यातवे कुत्साय अकरित्यकः। अनास दस्यून (त्वम्) दुर्योणे मृघवचः नि अवृणक् वधेन (च) अमृणः।

**अनुवाद**- (हे इन्द्र !) (तुमने) सूर्य के (दो चक्रो मे से) एक चक्र को पृथक् कर दिया (और) दूसरा धन प्राप्ति के लिये कुत्स को दे दिया शब्दरहित शत्रुओं को (तुमने) सङ्ग्राम मे हतबुद्धि कर छिन्न भिन्न कर दिया (और) वज्र से मार डाला।

स्तोमासस्त्वा गौरिवातेरवर्धन्नरंधयो वैदथिनाय पिप्रुं।

आ त्वामृजिश्वा सख्याय चक्रे पचन्पक्तीरपिबः सोममस्य॥११॥

**अन्वय**- (इन्द्र !) गौरिवीते. स्तोमासः त्वा अवर्धयन् (त्वम्) वैदथिनाय (ऋजिष्वाय) पिप्रुम् अरन्धयः। ऋजिष्वा त्वा सख्याय पक्ती पचन् (त्वाम्) आ चक्रे। (त्वम्) अस्य सोमम् अपिबः।

**अनुवाद**- (हे इन्द्र !) गौरिवीति के स्तोत्र तुम्हे वर्धित करे। तुमने विदथि पुत्र (ऋजीष्वा) के लिये पिप्रु को हिसित किया। ऋजीष्वा तुम्हारी मित्रता के लिए पुरोडाश पकाकर (तुम्हारे) सम्मुख रखता है। (तुमने) इस (ऋजीष्वा) के सोम का पान किया।

नवग्वासः सुतसोमास इद्रं दशग्वासो अभ्यर्चत्यर्कैः।

गव्यं चिदूर्वमपिधनवतं तं चिन्नरः शशमाना अप वृन्॥१२॥

**अन्वय**- नवग्वासः दशग्वासः (च) (यज्ञासः) सुतसोमासः (अङ्गिरसः) अर्कैः इन्द्रम् अभि अर्चन्त। शशमानाः (अङ्गिरसः) नरः (असुरैः) अपिधानवन्त तं चित् गव्यम् ऊर्वम् अपवृन्।

**अनुवाद**- नौ महीने में समाप्त होने वाले (और) दस महीने मे समाप्त होने वाले (यज्ञ के कर्त्ता) सोमाभिषव करने वाले (अङ्गिरा) स्तोत्रो द्वारा इन्द्र की अर्चना करते हैं। स्तुति करते हुये (अङ्गिरा) लोगो ने (असुरो द्वारा) आच्छादित उस गो समूह को उन्मुक्त किया।

कथोनु ते परि चराणि विद्वान्वीर्या मघवन्या चकर्थ।
या चो नु नव्या कृणवः शविष्ठ प्रेदु ता ते विदथेषु ब्रवाम॥१३॥

**अन्वय**- मघवन् ! (इन्द्र !) (त्वम्) या वीर्या चकर्थ (तान्) विद्वान् (वय) कथ नु ते परि चराणि। शविष्ठ ! (त्वम्) या नु नव्या (वीर्याणि) कृणव· ते ता (वीर्याणि) (अहम्) विदथेषु प्र ब्रवाम।

**अनुवाद**- हे धनवान ! (इन्द्र !) (तुमने) जिन वीरतापूर्ण कार्यों को किया (उन्हे) जानते हुये हम कैसे शीघ्र तुम्हारी परिचर्या करे। हे बलशाली ! तुमने जो नूतन (पराक्रम) दिखाये है तुम्हारे उन (पराक्रमो) को मै यज्ञ मे वर्णित करता हूँ।

एता विश्वा चकृवाँ इंद्र भूर्यपरीतो जनुषा वीर्येण।
या चिन्नु वज्रिन्कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः॥१४॥

**अन्वय**- इन्द्र ! अपरित· (त्वम्) जनुषा वीर्येण एता विश्वा भूरि (वीर्याणि) चकृवान्। दधृष्वान वज्रिन ! (त्वम्) नु या चित् कृणव ते तस्याः तविष्याः वर्ता (कोऽपि) न अस्ति।

**अनुवाद** हे इन्द्र ! अजातशत्रु (तुमने) जन्मजात पराक्रम से इन समस्त प्रभूत (वीरता का कार्य) किया है। हे धर्षक वज्रधारी ! निश्चय ही (तुमने) जो किया है तुम्हारे उस बल का निवारयिता (कोई भी) नही है।

इद्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म।
वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षम्॥१५॥

**अन्वय**- शविष्ठ ! इन्द्र ! ते या नव्या (ब्रह्म) अकर्म (अस्माभिः) क्रियामाणा ब्रह्म जुषस्व। धीरः स्वपाः वसुयुः (अहम्) भद्रा सुकृता (स्तोत्राणि) वस्त्रा इव रथ (च) न अतक्षम्।

**अनुवाद**- हे बलशाली ! इन्द्र ! तुम्हारे लिये जो नूतन (स्तोत्र) बनाये गये है (हमारे द्वारा) बनाये स्तोत्र का सेवन करो। धीर, सुकर्मा, धनेच्छुक (मैंने) भजनीय सुकृत (स्तोत्रो) को वस्त्र की भांति (और) रथ की भांति बनाया है।

## सूक्त - (३०)

***देवता***- इन्द्र, १२ - १५ ऋणञ्चयेन्द्रौ, ***ऋषि***- बभ्रुरात्रेय, ***छन्द***- त्रिष्टुप्।

क्व१स्य वीरः को अपश्यदिंद्रं सुखरथमीयमानं हरिभ्याम्।
यो राया वज्री सुतसोममिच्छन्तदोको गंता पुरुहूत ऊती॥१॥

**अन्वय**- य (इन्द्र·) वज्री पुरुहूतः राया सुतसोमम् (यजमान) इच्छन् तत् ओकः गन्ता (अस्ति) स्य वीरः (इन्द्रः) कः (अस्ति) हरिभ्यां सुखरथम् ईयमानम् इन्द्र कः अपश्यत् ?

**अनुवाद**- जो इन्द्र बलवान, बहुतो द्वारा आहूत, धन के साथ सोमाभिषव करने वाले (यजमान) की इच्छा करता हुआ उसके घर मे जाने वाला है वह वीर (इन्द्र) कहाँ है ? अश्वो से युक्त सुखकर रथ पर जाते हुये इन्द्र को किसने देखा ?

अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमिच्छन्।
अपृच्छमन्याँ उत ते म आहुरिंद्रं नरो बुबुधाना अशेम॥२॥

**अन्वय**- (इन्द्रम्) इच्छन् (वय) (तम्) अनु आयम् निधातु च अस्य (इन्द्रस्य) सस्वः उग्र (च) पदम् अचचक्षम्। अहम् अन्यान् उत् अपृच्छम् (तदा) नरः बुबुधानाः ते मे आहूः (यत् वयम्) इन्द्रम् अशेम।

**अनुवाद**- (इन्द्र की) इच्छा करते हुये (हमने) (उसका) अन्वेषण किया और स्थापयिता इस (इन्द्र) के अन्तर्निहित और उग्र स्थान को देखा। मैने अन्य से भी पूछा (तब) नेता और ज्ञानाभिलाषी उन्होने मुझसे कहा (कि हमने) इन्द्र को प्राप्त किया है।

प्र नु वयं सुते या ते कृतानींद्र ब्रवाम यानि नो जुजोषः।
वेददविद्वाञ्छृणवच्च विद्वान्वहतेऽयं मघवा सर्वसेनः॥३॥

**अन्वय**- इन्द्र ! सुते नु वयं यानि नः जुजोषः या (च) ते कृतानि (तानि) ब्रवाम। शृण्वत् विद्वान् च अविद्वान् (तव विषये) वेदत्। मघवा सर्वसेन· अयम् (इन्द्रः) (अश्वैः जनान्) वहते।

**अनुवाद**- हे इन्द्र ! अभिषव के समय आज जिनसे हमारी सेवा की है (और) जो तुम्हारे कर्म (है) (उन्हे) बोलेगे। सुनने वाले और विद्वान् न जानने वाले को (तुम्हारे विषय में) समझाये। धनवान् समस्त सेनाओ से युक्त यह (इन्द्र) (अश्वो द्वारा) (लोगो के पास) ले जाया जाता है।

स्थिरं मनश्चकृषे जात इंद्र वेषीदेको युधये भूयसश्चित्।
अश्मानं चिच्छवसा दिद्युतो वि विदो गवामूर्वमुस्रियाणाम्॥४॥

**अन्वय** - इन्द्र ! जातः (त्वम्) मनः स्थिरं चकृषे। एकः इत् भूयसः चित् युधये वेषि। (गवाम्) अश्मान (पर्वत) चित् शवसा वि दिद्युतः उस्रियाणा (च) गवाम् उर्व विद·।

**अनुवाद**- हे इन्द्र ! उत्पन्न होते (तुमने) मन को स्थिर कर लिया। अकेले ही अनेको के साथ युद्ध के लिये गमन किया। (गायो को) छिपाने वाले (पर्वत) को बल से (तुमने) विदीर्ण किया (और) क्षीरदायिनी गायो के समूह को प्राप्त किया'

परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत्।
अतश्चिदिंद्रादभयंत देवा विश्वा अपो अजयद्दासपत्नीः॥५॥

**अन्वय**- (इन्द्र !) परः परमः (च) यत् त्व परावति श्रुत्य नाम बिभ्रत् अजनिष्ठा। अतः चित् देवाः इन्द्रात् अभयन्त। (इन्द्र) दासपत्नी विश्वाः अप अजयत्।

**अनुवाद**- (हे इन्द्र !) प्रधान (और) उत्कृष्टतम जो तुम दूर से श्रवणीय नाम को धारण करते हुये उत्पन्न हुये इसीलिये देवता इन्द्र से डरने लगे (इन्द्र ने) दास (वृत्र) द्वारा पालित समस्त जल को जीत लिया।

तुभ्येदेते मरुतः सुशेवा अर्चंत्यर्कं सुन्वंत्यंधः।

अहिमोहानमप आशयान प्र मायाभिर्मायिनं सक्षदिंद्रः॥६॥

**अन्वय**- इन्द्र ! सुशेवाः एते मरुतः तुभ्यम् इत् अर्कम् अर्चन्ति अन्धः (च) सुन्वन्ति। इन्द्र ! अपः ओहानम् आशयान मायिनम् अहि (त्वम्) मायाभिः प्र सक्षत्।

**अनुवाद**- हे इन्द्र ! शोभन सुखप्रद ये मरुत् तुम्हारे लिये स्तवनीय स्तोत्र बनाते है (और) सोम अभिसुत करते है। हे इन्द्र! जलाच्छादक सोते हुये मायावी अहिपुत्र को (तुमने) माया के द्वारा अभीभूत कर लिया।

वि षू मृधो जनुषा दानमिन्वन्हन्गवा मघवन्त्संचकानः।

अत्रा दासस्य नमुचेः शिरो यदवर्तयो मनवे गातुमिच्छन्॥७॥

**अन्वय**- मघवन् ! (इन्द्र !) सचकानः (त्वम्) गवा दानम् (वृत्रम्) इन्वन्। (त्वम) जनुषा मृधः सु वि अहन्। अत्र (युद्धे) गातुम् इच्छन् मनवे दासस्य नमुचेः शिरः यत् अवर्तयः।

**अनुवाद**- हे धनवान ! (इन्द्र !) सुस्तुत (तुम) वज्र द्वारा बाधक (वृत्र) को पीडित करो। (तुमने) जन्म से शत्रुओ का सहार किया है। इस (युद्ध) मे सुख की इच्छा करने वाले मेरे लिये दास नमुचि के सिर को चूर्ण करो।

युजं हि मामकृथा आदिदिंद्र शिरो दासस्य नमुचेर्मथायन्।

अश्मान चित्स्वर्यं१ वर्तमानं प्र चक्रियेव रोदसी मरुद्भ्यः॥८॥

**अन्वय**- इन्द्र ! स्वर्य वर्तमानम् अश्मान चित् (त्वम्) दासस्य नमुचेः शिरः मथायन् आत् इत् मा यजु हि अकृथाः (तदानी) मरुद्भ्यः रोदसी चक्रिया इव प्र (आस्ताम्)।

**अनुवाद**- हे इन्द्र ! गर्जनयुक्त भ्रमणशील मेघ की भाँति (तुमने) दास नमुचि का मस्तक चूर्ण करने के पश्चात् मुझसे मैत्री की (तब) मरुतो द्वारा द्यावापृथिवी चक्र की भाँति घूमने (लगे)।

स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य सेनाः।

अतर्ह्यख्यदुभे अस्य धेने अथोप प्रैद्युधये दस्युमिंद्रः॥९॥

**अन्वय**- दास (नमुचि) स्त्रिय हि आयुधानि चक्रे। अस्य अबलाः सेनाः किं मा करन् (इति मन्यमान.) इन्द्र· अस्य उभे धने (गृहस्य) अन्त हि अख्यत् अथ दस्यु युधये उप प्र ऐत्।

**अनुवाद**- दास (नमुचि) ने स्त्रियो को युद्धसाधन बनाया। इसकी निर्बल सेना मेरा क्या कर लेगी (ऐसा सोचते हुये) इन्द्र ने इस (नमुचि) की दो प्रेयसियो को (घर के) मध्य रखा तत्पश्चात् दस्यु (नमुचि) से युद्ध के लिये प्रस्थान किया।

समत्र गावोऽभितोऽनवंतेहेह वत्सैर्वियुता यदासन्।

स ता इंद्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमंदन्॥१०॥

**अन्वय**- यत् गावः वत्सै· वियुताः आसन् अत्र इह अभितः सम् अनवन्तः यत् सुसुता· सोमास. (इन्द्रम्) अमन्दन् (तदा) इन्द्र· अस्य शाकै. ताः (गा.) (वत्सै.) सम् असृजत्।

**अनुवाद**- जब गायें बछडो से अलग हो गयी उस समय इधर उधर चारो ओर भटकने लगी जब भलीभाँति अभिसुत सोम ने (इन्द्र को) आनन्दित किया (तब) इन्द्र ने अपने बल से उन गायो को (बछड़ो से) मिला दिया।

यदीं सोमा बभ्रुधूता अमदन्नरोरवीद्वृषभः सादनेषु।

पुरंदरः पपिवाँ इंद्रो अस्य पुनर्गवामददादुस्रियाणाम्॥११॥

**अन्वय**- यत् ईम् बभ्रुधूताः सोमा· (इन्द्रम्) अमन्दन् (तदा) बृषभः (इन्द्र·) सदनेषु अरोरवीत्। पुरन्दरः इन्द्रः (सोम) पपिवान् अस्यू (च) (बभ्रोः) पुनः उस्रियाणा गवाम् अददत्।

**अनुवाद**- जब बभ्रु द्वारा अभिसुत सोम ने (इन्द्र को) आनन्दित किया (तब) कामनासेचक (इन्द्र) ने युद्ध मे महान शब्द किया। नगर-विनाशक इन्द्र ने (सोम-) पान किया (और) इस (बभ्रु) को पुन· क्षीरदायिनी गाये दी।

भद्रमिदं रुशमा अग्न अक्रन्गवां चत्वारि ददतः सहस्रा।

ऋणंचयस्य प्रयता मघानि प्रत्यग्रभीष्म नृतमस्य नृणाम्॥१२॥

**अन्वय**- अग्ने । रुशमाः (मह्यम्) चत्वारि सहस्राः गवा ददतः इद भद्रं (कर्म) अक्रन्। नृणा नृतमस्य ऋणञ्चयस्य प्रयता मघानि प्रति अग्रभीष्म।

**अनुवाद**- हे अग्ने ! रुशमवासियो ने (मुझे) चार हजार गाये देकर यह कल्याणकारी (कर्म) किया। मनुष्यो मे उत्तम मनुष्य ऋणञ्चय के दिये गये धन को (मैने) ग्रहण किया।

सुपेशसं माव सृजंत्यस्तं गवां सहस्रै रुशमासो अग्ने।

तीव्रा इंद्रममंदुः सुतासोऽक्तोर्व्युष्टौ परितक्म्यायाः॥१३॥

**अन्वय**- अग्ने ! रुशमास· मा सहस्रे गवा सुपेशसम् (च) अस्तम् अव सृजन्ति। परितम्या अक्तो व्युष्टौ तीव्रा· सुतास इन्द्रम् अममन्दु·।

**अनुवाद**- हे अग्ने ! रुशमवासियो ने मुझे हजार गाये (और) सुसज्जित घर प्रदान किया। अन्धकारमय रात्रि के व्यतीत हो जाने पर सरस अभिषुत सोम ने इन्द्र को आनन्दित किया।

औच्छत्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानाम्।
अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत्सहस्रा॥१४॥

**अन्वय**- रुशमाना राजनि ऋणञ्चये (समीपे) या परितक्म्या रात्री सा औच्छत्। अज्यमानः बभ्रु· अत्यः रघु· वाजी न चत्वारि सहस्रा (गवाम्) असनत्।

**अनुवाद**- रुशमवासियो के राजा ऋणञ्चय के (समीप) जो अन्धकारयुक्त रात्रि (है) वह व्यतीत हो गयी है। बुलाये जाने पर बभ्रु ने सततगामी अश्वो की भाँति चार हजार (गाये) प्राप्त की।

चतुःसहस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने।
घर्मश्चित्तप्तः प्रवृजे य आसीदयस्मयस्तम्वादाम विप्राः॥१५॥

**अन्वय**- अग्ने ! रुशमेषु (वय) चतुः सहस्र गव्यस्य पशवः प्रति अग्रगीष्म। प्रवृजे य. तप्त· अयस्मयः धर्मः आसीत् त चित् (वय) विप्रा. आदाम।

**अनुवाद**- हे अग्ने ! रुशमदेश मे (हमने) चार हजार गोरूप पशु प्राप्त किये। यज्ञ मे जो तप्त स्वर्णमय पात्र था उसे भी (हम) मेधावियो ने प्राप्त किया।

## सूक्त - (३१)

***देवता***- इन्द्र, ८ तृतीयपादस्य कुत्सो वा चतुर्थपादस्य उशना वा, ९ इन्द्रकुत्सौ, ***ऋषि***- अवस्युरात्रेय, **छन्द**- त्रिष्टुप्।

इन्द्रो रथाय प्रवतं कृणोति यमध्यस्थान्मघवा वाजयंतम्।
यूथेव पश्वो व्युनोति गोपा अरिष्टो याति प्रथमः सिषासन्॥१॥

**अन्वय**- मघवा इन्द्र वाजयन्त य (रथम्) अध्यस्थात् (तस्मै) रथाय प्रवत कृणोति। पशवः यूथा. (प्रेरक·) गोपाः इव (इन्द्र·) (जनान्) व्युनोति। प्रथमः (इन्द्रः) अरिष्टः (सन्) सिसासन् याति।

**अनुवाद**- धनवान इन्द्र अन्न की इच्छा करता हुआ जिस रथ पर बैठता है (उस) रथ का सञ्चालन करता है। पशुओ के समूह के (प्रेरक) गोपालक की भाँति (इन्द्र) (लोगो को) प्रेरित करता है। सर्वश्रेष्ठ (इन्द्र) अहिंसित (होकर) धन की इच्छा करता हुआ जाता है।

आ प्र द्रव हरिवो मा वि वेनः पिशंगराते अभि नः सचस्व।

नहि त्वदिंद्र वस्यो अन्यदस्त्यमेनाश्चिज्जनिवतश्चकर्थ॥२॥

**अन्वय**- हरिव ! (इन्द्र !) (अस्मान्) आ प्र द्रव (नः) वि वेनः मा (भव)। पिशङ्गराते ! (त्व) नः अभि सचस्व। इन्द्र ! (कोऽपि) वस्य त्वत् अन्यत् नहि अस्ति। (इन्द्र !) अमेनात् चित् जनिवत चकर्थ।

**अनुवाद**- हे अश्वयुक्त! (इन्द्र !) (हमारे) अभिमुख भलीभाँति गमन करो (हमसे) विरत न (होओ)। हे बहुविधधनवाले ! (तुम) हमारी सेवा करो। हे इन्द्र ! (कोई भी) वस्तु तुमसे श्रेष्ठ नही है। (हे इन्द्र !) पत्नीहीनो को पत्नीयुक्त कर दो।

उद्यत्सहः सहस आजनिष्ट देदिष्ट इंद्र इंद्रियाणि विश्वा।

प्राचोदयत्सुदुघा वव्रे अतर्वि ज्योतिषा सववृत्वत्तमोऽवः॥३॥

**अन्वय**- यत् (उषसः) सहसः (सूर्यस्य) सहः उत् आ अजनिष्ट (तदा) इन्द्रः (यजमानेभ्यः) विश्वा इन्द्रियाणि देदिष्ट। वव्रे अन्तः सुदुघा (गाः) प्र अचोदयत्। ज्योतिषा सववृत्वत् तमः वि अरवित्यवः।

**अनुवाद**- जब (उषा के) तेज से (सूर्य का) तेज उत्पन्न होता है (तब) इन्द्र (यजमानो को) समस्त धन प्रदान करता है। पर्वत के मध्य से सुदुग्धदायिनी (गायो) को मुक्त करता है। तेज द्वारा संवरणशील अन्धकार को दूर करता है।

अनवस्ते रथमश्वाय तक्षन्त्वष्टा वज्रं पुरुहूत द्युमंतम्।

ब्रह्माण इंद्रं महयंतो अर्केरवर्धयन्नहये हंतवा उ॥४॥

**अन्वय**- पुरुहूत ! (इन्द्र !) अनवः ते अश्वाय रथ तक्षन् त्वष्टा (ते) वज्रं द्युमन्तम् (अकरोत्) मध्यन्तः ब्राह्मण अहये हन्तवै इन्द्रम् अर्कैः अवर्धयन्।

**अनुवाद**- हे बहुस्तुत ! (इन्द्र !) मनुष्यों ने तुम्हारे अश्वयुक्त रथ को बनाया त्वष्टा ने (तुम्हारे) वज्र को दीप्तिमान (किया)। पूजा करने वाले अङ्गिराओ ने वृत्र को मारने के लिये इन्द्र को स्तोत्रो द्वारा सवर्धित किया।

वृष्णे यत्ते वृषणो अर्कमर्चानिंद्र ग्रावाणो अदितिः सजोषा.।

अनश्वासो ये पवयोऽरथा इंद्रेषिता अभ्यवर्तंत दस्यून्॥५॥

**अन्वय**- इन्द्र ! वृषणः (मरुत.) यत् वृषणे ते अर्कम् अर्चन् (तदा) अदितिः ग्रावाणः सजोषाः (सगता बभूवुः) इन्द्रेषिताः अनश्वास अरथाः य (मरुतः) पवयः (ते) दस्यून् अभि अवर्तन्त।

**अनुवाद**- हे इन्द्र ! कामनासेचक (मरुतो) ने जब कामनासेचक तुम्हारे लिये स्तोत्र की रचना की (तब) अभिषव करने वाले प्रस्तर (भी) प्रीतियुक्त होकर (सङ्गत हुये) इन्द्र के द्वारा प्रेषित अश्वहीन रथहीन जिन (मरुतो) ने गमन किया (उन्होने) शत्रुओ को अभीभूत किया।

प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघवन्या चकर्थ।
शक्तीवो यद्विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः॥६॥

**अन्वय**- मघवन् ! (इन्द्र !) (त्वम्) या पूर्वाणि नूतना (च) करणानि चकर्थ ते (अहम्) प्रवोचम्। शक्तिवः ! (इन्द्र !) यत् (त्वम्) उभे रोदसी जयन् मनवे दानुचित्राः अपः विभराः।

**अनुवाद**- हे दानशील ! (इन्द्र !) (तुमने) जो पुरातन (और) नूतन कार्य किये है उन्हे (मै) बोलूँगा। हे शक्तिशाली ! (इन्द्र !) जो (तुम) दोनो द्यावापृथिवी को जीतकर मनुष्य के लिये विचित्र जल धारण करते हो।

तदिन्नु ते करणं दस्म विप्राहिं यद्घ्नोजो अत्रामिमीथाः।
शुष्णस्य चित्परि माया अगृम्णाः प्रपित्वं यन्नप दस्यूँरसेधः॥७॥

**अन्वय**- दस्म ! विप्र ! (इन्द्र !) अहि घ्नन् यत् ओजः (त्वम्) अत्र अमिमीथाः तत् इत् नु ते करणम्। (इन्द्र !) (त्वम्) शुष्णस्य मायाः चित् परि अगृम्णाः प्रपित्व यत् (त्वम्) दस्यून् अप असेध।

**अनुवाद**- हे दर्शनीय ! बुद्धिमान ! (इन्द्र !) वृत्र को मारकार जिस बल को (तुमने) यहाँ प्रकाशित किया वह निश्चय ही तुम्हारा कार्य है। (हे इन्द्र !) (तुमने) शुष्ण की माया को भी ग्रहण किया। युद्धस्थल मे जाकर (तुमने) दस्युओ को विनष्ट किया।

त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इंद्र।
उग्रमयातमवहो ह कुत्सं सं ह यद्वामुशनारंत देवाः॥८॥

**अन्वय**- इन्द्र ! पारः त्व यदवे तुर्वशाय (वनस्पतीन्) सुदुघाः अपः अरमयः। यत् अयातम् उग्र (शुष्ण हत्वा) कुत्स सम् अवहः (तदा) वाम् उशनाः देवाः (च) अरन्त।

**अनुवाद**- हे इन्द्र ! तट पर तुमने यदु, तुर्वश को (वनस्पतियो को) बढाने वाला जल दिया। जब आते हुये भयंकर (शुष्ण) को (मारकर) कुत्स को (अपने घर मे) स्थापित किया (तब) तुम दोनो का उशना (और) देवताओ ने सम्भजन किया।

इद्राकुत्सा वहमाना रथेना वामत्या अपि कर्णे वहतु।
निः षीमद्भ्यो धमथो निः षधस्थान्मघोनो हृदो वरथस्तमांसि॥९॥

**अन्वय**- इन्द्रकुत्सा ! रथेन वहमाना वाम् अत्या· कर्णे अपि आ वहन्तु। (वाम्) सीम् (शुष्ण) सधस्थात् अदभ्य· नि धमथ मघोन (च) हृदः तमांसि वरथ·।

**अनुवाद**- हे इन्द्रकुत्सा ! रथ द्वारा वहन किये जाते हुये तुम दोनो को अश्व स्तोताओ के समीप ले आये (तुम दोनो ने) इस (शुष्ण) को निवासभूत जल से दूर किया (और) दानी के हृदय से अन्धकार को दूर किया।

वातस्य युक्तान्त्सुयुजश्चिदश्वान्कविश्चिदेषो अजगन्नवस्युः।

विश्वे ते अत्र मरुतः सखाय इन्द्र ब्रह्माणि तविषीमवर्धन्॥१०॥

**अन्वय**- कविः एषः अवस्युः चित् वातस्य चित् युक्तान् सुयुजः अश्वान् अजगन्। इन्द्र ! (अवस्योः) सखायः विश्वे मरुत अत्र ते तविषी ब्रह्माणि अवर्धयन्।

**अनुवाद**- मेधावी इस अवस्यु ने वायु की भाँति वेगवान सुष्ठु योजनीय अश्वो को प्राप्त किया। हे इन्द्र ! (अवस्यु के) सखाभूत स्तोताओ ने यहा तुम्हारे बल को स्तोत्रो द्वारा बढाया।

सूरश्चिद्रथं परितक्म्यायां पूर्वं करदुपरं जूजुवांसम्।

भरच्चक्रमेतशः सं रिणाति पुरो दधत्सनिष्यति क्रतुं नः॥११॥

**अन्वय**- पूर्व परितक्म्याया (इन्द्रः) सूरः चित् जूजुवास रथम् उपर करत्। (तस्य) चक्रम् एतशः भरत्। (इन्द्रः) (शत्रून्) सम् रिणाति (सः) न· पुरः दधत् क्रतुं (च) सनिष्यति।

**अनुवाद**- पहले सग्राम मे (इन्द्र ने) सूर्य के वेगवान रथ को गतिहीन कर दिया था। (उसका) चक्र एतश को दिया। (इन्द्र) (शत्रुओ को) भलीभाँति हिंसित करता है (वह) हमे पुरस्कार दे (और) यज्ञ का सम्भजन करे।

आयं जना अभिचक्षे जगामेंद्रः सखायं सुतसोममिच्छन्।

वदन्ग्रावाव वेदिं भ्रियाते यस्य जीरमध्वर्यवश्चरंति॥१२॥

**अन्वय**- जना ! (यूयम्) अभिचक्षे अयम् इन्द्रः सुतसोम सखाय (यजमानम्) इच्छन् आ जगाम। अध्वर्यवः यस्य जीर चरन्ति (स.) ग्रावा वदन् वेदिम् अव भ्रियाते।

**अनुवाद**- हे लोगो ! (तुम लोगों को) देखने के लिये यह इन्द्र सोमाभिषव करने वाले सखारूप (यजमानो) की इच्छा करता हुआ अया है॥ अध्वर्यु जिसको तीव्रता से चलाते है (वह) प्रस्तर शब्द करता हुआ वेदी पर स्थापित किया जाता है,

ये चाकनंत चाकनंत नू ते मार्ता अमृत मो ते अह आरन्।

वार्वधि यज्यूँरुत तेषु धेह्योजो जनेषु येषु ते स्याम॥१३॥

**अन्वय**- अमृत! (इन्द्र !) ये (ते) चाकनन्त नु ते चाकनन्त ते मर्ताः (समीपे) अहः मा आ अरन्। उत (त्व) यज्यून् ववन्धि येषु जनेषु (वय स्तोतारः सन्ति) तेषु ओजः धेहि ते (त्वदीयः) स्याम।

**अनुवाद**- हे अमर ! (इन्द्र !) जो (तुम्हारी) कामना करते है, शीघ्र तुम्हारी अभिलाषा करते है (उन मनुष्यो के) (समीप) पाप न जाये। और (तुम) यजमानो का सम्भजन करो। जिन मनुष्यो के (हम स्तोता है) उन्हे बल दो वे (तुम्हारे) हो।

## सूक्त - (३२)

***देवता***- इन्द्र, ***ऋषि***- गातुरात्रेय, ***छन्द***- त्रिष्टुप्।

अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः।

महांतमिंद्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन्॥१॥

**अन्वय**- इन्द्र ! त्वम् उत्सम् अर्ददः (जल) खानि (च) वि असृजः बद्धानान् अर्णवान् अरम्णाः यत् (त्वम्) महन्त पर्वत वरिति व दानवम् अव हन् धाराः वि सृजः।

**अनुवाद**- हे इन्द्र ! तुमने मेघ को विदीर्ण किया (और) (जल के) द्वार को बनाया। बँधे हुये जल को विसर्जित किया जो (तुमने) विशाल मेघ को उद्घाटित कर दानुपुत्र को मारकर जल बरसाया।

त्वमुत्साँ ऋतुभिर्बद्बधानाँ अरंह ऊधः पर्वतस्य वज्रिन्।

अहिं चिदुग्र प्रयुतं शयानं जघन्वाँ इंद्र तविषीमधत्थाः॥२॥

**अन्वय**- वज्रिन ! (इन्द्र !) त्वं (वर्षा) ऋतुभिः बद्धानान् उत्सान् (मोचयित्वा) पर्वतस्य अधः अरहः। उग्र। इन्द्र ! (त्व) शयान प्रयुतम् अहि (वृत्रम्) चित् जघन्वान तविषी (च) अधत्थाः।

**अनुवाद**- हे वज्रवान ! (इन्द्र !) तुम (वर्षा) ऋतु मे निरुद्ध मेघो को (मुक्तकर) मेघ के जल को निकालो। हे उग्र। इन्द्र ! तुमने सोते हुये बलवान शत्रु (वृत्र) को मार दिया और बल धारण किया।

त्यस्य चिन्महतो निर्मृगस्य वधर्जघान तविषीभिरिंद्रः।

य एक इदप्रतिर्मन्यमान आदस्मादन्यो अजनिष्ट तव्यान्॥३॥

**अन्वय**- अप्रति. मन्यमानः यः एक इन्द्रः (अस्ति) (सः) महतः मृगस्य चित् (शीघ्रगाामिनस्य) त्यस्य (वृत्रस्य) वध (विनष्ट्य) (तम्) (स्व) तविषीभि. नि जघान। आत् अस्मात् (वृत्रात्) अन्यः तव्यान् (असुरः) अजनिष्ट।

**अनुवाद**- अप्रद्विन्दी मानता हुआ जो अद्वितीय इन्द्र (है) (उसने) महान मृग की भाँति (शीघ्रगामी) इस (वृत्र) के आयुध को (नष्टकर) (उसको) (अपने) बल से मार डाला। ततपश्चात् इस (वृत्र) से अन्य बलवान (असुर) उत्पन्न हुआ।

त्यं चिदेषा स्वधया मदंतं मिहो नपातं सुवृधं तमोगाम्।

वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री नि जघान शुष्णम्॥४॥

**अन्वय**- वृषपृभर्मा वज्री (इन्द्रः) एषा (प्रणिना) स्वधया मदन्त मिहः निपात सुवृध तम· गा दानवस्य भाम त्य चित् शुष्ण वज्रेण नि जघान।

**अनुवाद**- वर्षणशील वज्रधर (इन्द्र) ने इन (प्राणियो) के अन्न से प्रसन्न होते हुये सेचनसमर्थ (मेघ) के पालक, प्रवृद्ध अन्धकार में गमन करने वाले दानव (वृत्र) के क्रोध से उत्पन्न उस शुष्ण को वज्र से मारा था।

त्य चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म।

यदीं सुक्षत्र प्रभृता मदस्य युयुत्संतं तमसि हर्म्ये धाः॥५॥

**अन्वय**- सुक्षत्र ! (इन्द्र !) मदस्य (सोमस्य) प्रभृता त्य चित् अमर्मणः विदत् अस्य (वृत्रस्य) निसत्तं मर्म अस्य क्रतुभि विदत् युतुत्स यत् ईम् (वृत्रं) तमांसि हर्म्ये धाः।

**अनुवाद**- हे बलवान ! (इन्द्र !) मादक (सोम) से प्रबृद्ध तुमने अबध्य इस (वृत्र) के छुपे हुये मर्म को इसके कार्यो द्वारा जाना (और) युद्ध की इच्छा कने वालाा जो इस (वृत्र को) अन्धकारपूर्ण स्थान मे रख दिया।

त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानम्।

तं चिन्मंदानो वृषभः सुतस्योच्चैरिंद्रो अपगूर्या जघान॥६॥

**अन्वय**- सुतस्य (सोमेन) मन्दानः वृषभः इन्द्रः त्य चित् इत्था कत्पयं शयान असुर्ये तमसि ववृधान त (वृत्र) चित् (वज्रेण) उच्चैः अपगूर्य जघान।

**अनुवाद**- अभिषुत(सोम) से मस्त होते हुये कामना सेचक इन्द्र ने इस लोक मे सुखपूर्वक सोते हुये सूर्यरहित अन्धकार मे प्रवृद्ध उस (वृत्र) को (वज्र द्वारा) ऊपर उठाकर मारा।

उद्यदिंद्रो महते दानवाय वधर्यमिष्ट सहो अप्रतीतम्।

यदीं वज्रस्य प्रभृतौ ददाभ विश्वस्य जंतोरधम चकार॥७॥

**अन्वय**- यत् इन्द्र· महते दानवाय सहः अप्रतीत वधः उत् यमिष्ट यत् वज्रस्य प्रभृतौ ईम् (वृत्र) ददाभ (तदा) विश्वस्य जन्तो (तम्) अधम चकार।

**अनुवाद**- जब इन्द्र ने विशाल दानुपुत्र (वृत्र) को विनाशक अजेय वज्र से ऊपर उठाया जब वज्र के प्रहार से इस (वृत्र) को हिंसित किया (तब) समस्त प्राणियो के मध्य (उसे) अधम बनाया।

त्य चिदर्णं मधुपं शयानमसिन्व वव्रं मह्याददुग्रः।

अपादमत्रं महता वधेन नि दुर्योण आवृणङ्मृध्रवाचम्॥८॥

**अन्वय**- उग्र इन्द्र अर्ण (वावृत्य) शयान मधुपम् असिन्व वव्र महि त्य चित् (वृत्र) अदात् (तदन्तरम् इन्द्रः) दुर्योणे अपादम् अत्र मृध्रवाच (वृत्र) महता वधेन नि अवृणक्।

**अनुवाद**- उग्र (इन्द्र) ने जल को (घेरकर) शयन करने वाले, जलरक्षक, शत्रु-सहारक, आच्छादक, विशाल उस (वृत्र) को ग्रहण किया। (तत्पश्चात् इन्द्र ने) सङ्ग्राम मे पादरहित परिणाम रहित, हिंसितवागिन्द्रिय वाले (वृत्र) को विशाल वज्र से पूर्णत. हिंसित किया।

को अस्य शुष्मं तविषी वरात एको धना भरते अप्रतीतः।
इमे चिदस्य ज्रयसो नु देवी इद्रस्यौजसो भियसा जिहाते॥९॥

**अन्वय**- अस्य इन्द्रस्य शुष्म तविषी कः वराते ? अप्रतीतः (इन्द्रः) एकः (शत्रूणा) धना भरते। देवी इमे (द्यावापृथिवी) चित् ज्रयस. अस्य इन्द्रस्य ओजसः भियसा नु जिहाते।

**अनुवाद**- इस इन्द्र के शोषक बल का कौन निवारण कर सकता है? पीछे न हटने वाला (इन्द्र) अकेले (शत्रुओ के) धन का हरण करता है। द्युतिमान ये (द्यावापृथिवी) वेगवान इस इन्द्र के ओज से भयभीत होकर शीघ्र चलायमान होते है।

न्यस्मै देवी स्वधितिर्जिहीत इंद्राय गातुरुशतीव येमे।
सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमंत॥१०॥

**अन्वय**- स्वधितिः देवी (द्यौः) अस्मै इन्द्रायः नि जिहीते। उशती गातुः इव येमे। यत् (इन्द्रः) विश्वम् ओजः आभि· सम् युवते (तदा) क्षितयः अनु स्वधाव्ने (इन्द्राय) नमन्त।

**अनुवाद**- स्वय धार्यमाण द्युतिमान (द्युलोक) इस इन्द्र के लिये नीचे गमन करता है और अभिलाषिणी भूमि की भाँति आत्मसमर्पण करता है। जब (इन्द्र) समस्त बल को प्रजाओ के साथसयुक्त करता है (तब) मनुष्यगण क्रमशः बलवान (इन्द्र) को नमन करते है।

एकं नु त्वा सत्पतिं पांचजन्यं जातं शृणोमि यशसं जनेषु।
तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इद्रम्॥११॥

**अन्वय**- (इन्द्र !) जनेषु एक नु सत्पति, पाञ्चजन्य जात यशस त्वा श्रणोमि। दोषा वस्तोः हवमानस· आशसः मे (प्रजा) नविष्ठ तम् इन्द्र जगृभ्रे।

**अनुवाद**- (हे इन्द्र !) मनुष्यो के मध्य मुख्य, सज्जनो के पालक, पाञ्चजन्यो के लिये उत्पन्न, यशस्वी तुम्हे सुनता हूँ। दिनरात स्तुति करने वाली कामनायुक्त मेरी (प्रजायें) स्तुतियोग्य उस इन्द्र को प्राप्त करे।

एवा हि त्वामृतुथा यातयंत मघा विप्रेभ्यो ददतं शृणोमि।

किं ते ब्रह्माणो गृहते सखायो ये त्वाया निदधुः काममिंद्र॥१२॥

**अन्वय**- इन्द्र ! ऋतुथा यातयन्त त्वा विप्रेभ्यः मघा ददतम् एव हि शृणोमि। इन्द्र ! ये सखायः ब्राह्माण त्वया (स्व) काम निदधु ते कि गृहते ?

**अनुवाद**- (हे इन्द्र !) समयानुसार प्रेरक तुमको स्तोताओ को धन देने वाला ही सुनता हूँ। हे इन्द्र ! जो मित्रभूत स्तोता तुममे (अपनी) कामना स्थापित करते है वे क्या प्राप्त करते है ?

## सूक्त - (३३)

*देवता*- इन्द्र, ***ऋषि***- सम्वरण प्रजापत्य, ***छन्द***- त्रिष्टुप्।

महिं महे तवसे दीध्ये नृनिद्रायेत्था तवसे अतव्यान्।

यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत॥१॥

**अन्वय**- य. (इन्द्रः) स्तुत· अस्मै जने सुमति (ददाति) वाजसातौ (च) समर्य. चिकेत। अतव्यान् (अह सम्वरण·) महे इन्द्राय तवसे नृन् (च) तवसे इत्था महि (स्तोत्र) दीध्ये।

**अनुवाद**- जो (इन्द्र) स्तुत होकर हम लोगो को उत्तम बुद्धि (देता है) (और) युद्ध में श्रेष्ठ वीरों को जानता है। अत्यन्त दुर्बल (मै स्मवरण) महान इन्द्र के बल के लिये (और) मनुष्यो के बल के लिये इस प्रकार महान (स्तोत्र) उद्घाटित करता हूँ।

स त्वं न इंद्र धियसानो अर्कैर्हरीणां वृषन्योक्त्रमश्रेः।

या इत्था मघवन्ननु जोषं वक्षो अभि प्रार्यः सक्षि जनान्॥२॥

**अन्वय**- वृषन् ! इन्द्र ! नः धियसानः अर्कैः जोषम् अनु वक्षः सः त्वं हरीणा योक्त्रम् अश्रेः। मघवन् ! इत्था याः अरय (सन्ति) (तान्) जनान् अभि प्र सक्षि।

**अनुवाद**- हे कामनासेचक ! इन्द्र ! हमारा ध्यान करते हुये, स्तोत्रो द्वारा प्रीति प्राप्त करते हुये वह तुम अश्वो की लगाम ग्रहण करते हो। हे ऐश्वर्यवान ! इस प्रकार जो शत्रु (है) (उन) लोगो को पराभूत करो।

न ते त इंद्राभ्यस्मदृष्वायुक्तासो अब्रह्माता यदसन्।

तिष्ठा रथमधि तं वज्रहस्ता रश्मिं देव यमसे स्वश्वः॥३॥

**अन्वय**- ऋष्व ! इन्द्र ! यत् अस्मत् अयुक्तासः अब्रहमाता अभि आसन् ते (नराः) ते न (सन्ति)। वज्रहस्त ! देव! (इन्द्र !) स्वाश्वः (त्व) त रथम् अधितिष्ठ (यस्य) रश्मि (त्वम्) आ यामसे।

**अनुवाद**- हे महान ! इन्द्र ! जो हमसे अलग हुये है वे (मनुष्य) तेरे नही (है)। हे वज्रहस्त ! हे द्युतिमान ! (इन्द्र !) शोभन अश्वो वाले (तुम) उस रथ पर बैठो (जिसकी) लगाम (तुम) नियन्त्रित करते हो।

पुरु यत्त इंद्र सत्युक्था गवे चकर्थोर्वरासु युध्यन्।

ततक्षे सूर्याय चिदोकसि स्वे वृषा समत्सु दासस्य नाम चित्॥४॥

**अन्वय**- इन्द्र ! यत् ते पुरु उक्था सन्ति (तत्र प्राप्यते यत्) (त्वम्) युध्यन् उर्वरासु भूमौ गवे (मार्गं) चकर्थ। (त्व) सूर्याय चित् स्व- ओकसि (स्थापितवान) समत्सु वृषा (प्रतिबन्धकः) दासस्य नाम (असुर) चित् ततक्षे।

**अनुवाद**- हे इन्द्र । जो तुम्हारे बहुत से स्तोत्र मिलते है (उनमे मिला है कि) (तुमने) युद्ध करते हुये उर्वरा (भूमि) मे जल के लिये (मार्ग) बनाया। (तुम) सूर्य को अपने स्थान मे स्थापित करते हो। युद्ध मे वृष्टि के (प्रतिबन्धक) दास नाम के (असुर को) नष्ट करते हो।

वय ते त इंद्र ये च नरः शर्धो जज्ञाना याताश्च रथाः॥

आस्माञ्जगम्यादहिशुष्म सत्वा भगो न हव्यः प्रभृथेषु चारुः॥५॥

**अन्वय**- इन्द्र । ये शर्धः जज्ञानः रथाः च याताः (सन्ति) ते वय नरः ते (सन्ति)। अहिशुष्म ! (इन्द्र !) भागः न हव्य चारुः (त्वम्) अस्मान् प्रभृथेषु आ जगम्यात्।

**अनुवाद**- हे इन्द्र ! जो बल उत्पन्न करने वाले और रथ से आने वाले (है) वे हम ऋत्विग्गण तेरे (है)। हे अहिशोषक ! (इन्द्र !) धन की भाँति स्तवनीय सुन्दर (तुम) हमारे यज्ञ मे आओ।

पपृक्षेण्यमिंद्र त्वे ह्योजो नृम्णानि च नृतमानो अमर्तः।

स न एनीं वसवानो रयिं दाः प्रार्यः स्तुषे तुविमघस्य दानम्॥६॥

**अन्वय**- इन्द्र ! त्व हि ओजः पपृक्षेण्यम् (अस्ति) (त्व) नृम्णानि नृतमानः अमर्तः च (असि) सः (त्वं) (जगत्) वस्वानः नः एनी रयि दा। तुविमघस्य अर्यः (दातुः इन्द्रस्य) दान प्र स्तुषे।

**अनुवाद**- हे इन्द्र ! तुम्हारा बल स्तवनीय (है) तुम धन के सरक्षक (तथा) अमर (हो)। वह (तुम) (ससार को) आच्छादित करते हुये हमे ऐसा धन दो। प्रभूत धन के श्रेष्ठ (दायक इन्द्र) के दान की स्तुति करता हूँ।

एवा न इद्रोतिभिरव पाहि गृणतः शूर कारून्।

उत त्वचं ददतो वाजसातौ पिप्रीहि मध्वः सुषुतस्य चारोः॥७॥

**अन्वय**- शूर ! इन्द्र ! एव नः गृणतः (त्वम्) ऊतिभिः कारून् (अस्मान्) अव पाहि उत् वाजसातौ (नः आच्छादक) त्वच ददत सुसुतस्य चारोः मध्वः पिप्रीहि।

**अनुवाद**- हे शूर ! इन्द्र ! इस प्रकार हमारे द्वारा स्तुत होते हुये (तुम) रक्षा द्वारा (हम) यज्ञ करने वालो की सेवा करो। और सङ्ग्राम मे (हमे) (आच्छादक) रूप देते हुये अभिषुत मधुर सोम का पान करो।

उत त्ये मा पौरुकुत्स्यस्य सूरेस्त्रसदस्योर्हिरणिनो रराणाः।
वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे॥८॥

**अन्वय**- अस्य गैरिक्षितस्य पौरुकुत्स्यस्य सूरेः हिरणिनः त्रसदस्योः मा रराणाः त्ये दश श्येतासः (अश्वा) मा वहन्तु (अहम्) उत् (रथनियोजनादि -) क्रतुभिः नु सश्चे।

**अनुवाद**- इस गुरुक्षितगोत्रोत्पन्न पुरुकुत्स के पुत्र प्रेरक हिरण्यवान त्रिसदस्यु के द्वारा मुझे प्रदान किये गये ये दस श्वेत (अश्व) मेरा वहन करे और (मैं) (रथनियोजनादि) कार्यो द्वारा शीघ्र गमन करूँ।

उत त्ये मा मरुताश्वस्य शोणाः क्रत्वामघासो विदथस्य रातौ।
सहस्रा मे च्यवतानो ददान आनूकमर्यो वपुषे नार्चत्॥६॥

**अन्वय**- मरुताश्वस्य विदथस्य (यज्ञे) रातौ मा शोणाः ऋत्वामघासः त्ये (अश्वाः) (दत्तानि) (विदथः) अर्यः मे च्यवतानः सहस्रा (धनानि) ददानः वपुर्षे आनूकम् आर्चत्।

**अनुवाद**- मरुताश्व के पुत्र विदथ के (यज्ञा मे) दान मे मुझे रक्तवर्ण (शीघ्र) गमन के कारण महान ये अश्व (दिये गये) (विदथ ने) श्रेष्ठ मुझको प्रवृद्ध करने वाला अपरिमित (धन) देते हुये शरीर का आभूषण दिया।

उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः।
मह्ना रायः संवरणस्य ऋषेर्व्रजं न गावः प्रयता अपि ग्मन्॥१०॥

**अन्वय**- लक्ष्मण्यस्य ध्वन्यस्य त्ये यतानाः सुरुचः (अश्वाः) मा जुष्टाः। व्रज (गन्तारः) गावः न प्रयताः महना रायः सवरणस्य ऋषेः अपि ग्मन्।

**अनुवाद**- लक्ष्मण के पुत्र ध्वन्य के ये ले जाने वाले सुन्दर (अश्व) मुझे प्राप्त हुये है। गोशाले मे (जाने वाली) गायो की भाँति प्रदान किया हुआ धन सम्वरण ऋषि की ओर जाये।

## सूक्त - (३४)

***देवता***- इन्द्र, ***ऋषि***- सम्वरणप्रजापत्य, ***छन्द***- त्रिष्टुप्, ६ जगती।

अजातशत्रुमजरा स्वर्वत्यनु स्वधामिता दस्ममीयते।
सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतर दधातन॥१॥

**अन्वय**- अजातशत्रु दस्मम् (इन्द्रम् प्रति) अजरा स्वर्वतीः अमिता स्वधा अनु ईयते। (ऋत्विज !) ब्रह्मवाहसे पुरुस्तुताय (इन्द्राय) (सोम) सुनोतन (पुरोडाश) पचत प्रतरं (हव्य) दधातन।

**अनुवाद**- अजातशत्रु दर्शनीय (इन्द्र की ओर) अक्षुण्ण, स्वर्गीय अपरिमित हव्य गमन करता है। (हे ऋत्विजो !) स्तोत्र-वाहक बहुस्तुत (इन्द्र) के लिए (सोम) अभिषुत करो। (पुरोडाश) पकाओ। प्रकृष्ट (हव्य) अर्पण करो।

आ यः सोमेन जठरमपिप्रतामंदत मघवा मध्वो अधंसः।
यदीं मृगाय हंतवे महावधः सहस्रभृष्टमुशना वधं यमत्॥२॥

**अन्वय**- मघवा यः (इन्द्रः) सोमेन जठरम् आ अपिप्रत। मध्वः अन्धसः (पानेन) अमन्दत। यत् महावध. (शत्रु) उशना (इन्द्रः) ईम् मृगाय हन्तवे सहस्रभृष्टि वध यमत्।

**अनुवाद**- धनवान जो (इन्द्र) सोम से जठर को परिपूर्ण करता है। मधुर सोम के (पान से) तृप्त होता है। महान वज्र धारक (शत्रु की) कमाना करता हुआ (इन्द्र) इस मृग को मारने के लिये अपरिमित तेजवाला वज्र उठाता है।

यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह।
अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः॥३॥

**अन्वय**- यः (यजमानः) अस्मै (इन्द्राय) घ्रंसे उत वा यः ऊधानि सोमं सुनोति (सः) अह द्युमान् भवति। यः कवसखः (अस्ति) (त) ततनुष्टि तनूनं शुभ्र (मनुष्य) शक्रः मघवा (इन्द्रः) अप ऊहति।

**अनुवाद**- जो (यजमान) इस (इन्द्र) के लिये दिन और जो रात मे सोम का अभिषव करता है (वह) निश्चय ही द्युतिमान होता है। जो कुत्सितों का मित्र (है) (उस) धर्मसन्तति की कामना करने वाले शोभन अलङ्कार वाले (मनुष्य) को तेजस्वी धनवान इन्द्र तिरस्कृत करता है।

यस्यावधीत्पितर यस्य मातर यस्य शक्रो भ्रातरं नात ईषते।
वेतीद्वस्य प्रयता यतंकरो न किल्बिषादीषते वस्व आकरः॥४॥

**अन्वय**- शक्र. (इन्द्रः) यस्य पितर यस्य मातर यस्य भ्रातरम् अवधीत् अतः (दूर) न ईषते। इत् अस्य प्रयता (हवींषि) वेत। यतकर वस्व (इन्द्रः) किल्विषात् न ईषते।

**अनुवाद**- समर्थ (इन्द्र) ने जिसके पिता जिसकी माता जिसके भाई को मार डाला उससे (दूर) नही जाता। अपितु इसके प्रदान किये गये (हव्य) की कामना करता है। शासक धनवान (इन्द्र) पाप से भयभीत नही होता।

न पंचभिर्दशभिर्वष्ट्यारभं नासुन्वता सचते पुष्यता चन।
जिनाति वेदमुया हति वा धुनिरा देववुं भजति गोमति व्रजे॥५॥

**अन्वय**- इन्द्र (शत्रुहननाय) पञ्चभिः दशभि· (जनाना) आरभ न वष्टि (सोमम्) असुन्वता (बन्धून्) च न पुष्यता (यजमान) न सचते वाधुनिः अमुया जिनाति इत् हन्ति वा देवयुत (यजमान) गोमति व्रजे आ भजति।

**अनुवाद**- इन्द्र (शत्रुओ को मारने के लिये) पाँच दस (लोगो की) सहायता की कामना नही करता। (सोम) अभिषुत न करने वाले और (बन्धुओ का) पोषण न करने वाले (यजमान) के साथ संयुक्त नही होता अपितु इसे जीतता है और मारता है। देवता की कामना करने वाले (यजमान) को गोयुक्त गोशाला से सयुक्त करता है।

वित्वक्षणः समृतौ चक्रमासजोऽसुन्वतो विषुणः सुन्वतो वृधः।
इद्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः॥६॥

**अन्वय**- समृतौ (शत्रून्) वित्वक्षणः (रथ-) चक्रमासज· (सोमम्) असुन्वता विषुण· सुन्वत· वृधः, विश्वस्य दमिता, विभीषणः अर्यः इन्द्रः दास यथावश नयति।

**अनुवाद**- युद्ध मे (शत्रुओ को) क्षीण करने वाला, (रथ) चक्र को संयुक्त करने वाला (सोम) अभिषव न करने वाले से पराङ्मुख, अभिषव करने वाले को बढाने वाला, सबका दमन करने वाला, अत्यन्त भयकर, श्रेष्ठ इन्द्र दास को इच्छानुसार वश मे करता है।

समीं पणेरजति भोजनं मुषे वि दाशुषे भजति सूनर वसु।
दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत्॥७॥

**अन्वय**- ईम् (इन्द्रः) पणेः भोजन मुषे सम् अजति। दाशुषे सूरिनं वसु वि भजति। यः जनः अस्य तविषीम् अचुक्रुधत् (तान्) विश्व· पुरु दुर्गे चन आ ध्रियते।

**अनुवाद**- यह (इन्द्र) पणि के भोजन को चुराने के लिये जाता है। दानशील मेधावी को धन देता है। जो इसके बल को क्रोधित करता है (उन) सबको बहुत से दुर्ग मे डाल देता है।

सं यज्जनौ सुधनौ विश्वशर्धसाववेदिंद्रो मघवा गोषु शुभ्रिषु।
युज ह्यऽन्यमकृत प्रवेपन्युदी गव्यं सृजते सत्वभिर्धुनिः॥८॥

**अन्वय**- यत् सुधनौ विश्वशर्धसौ जनौ शुभ्रिषु गोषु (प्रतिद्वन्द्विनौ) सम् उषेत् मघवा इन्द्रः अन्यत् हि (याज्ञिक) यजुम् अकृत। सत्त्वभिः (मेघ) धुनिः (शत्रून) प्रवेपनी (इन्द्रः) ईम् गव्यम् उत् सृजते।

**अनुवाद**- जब शोभनधन वाले, व्याप्त बल वाले दो लोगो को शुभ्र गायो के लिये (प्रतिद्वन्दी) समझकर धनवान इन्द्र अन्य (यज्ञ करने वाले) की सहायता करता है। बलद्वारा (मेघ) को कँपाने वाला (शत्रुओ को) कॅपाने वाला (इन्द्र) इस (यजमान) को गोसमूह देता है।

सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः।
तस्मा आपः संयतः पीपयंत तस्मिंन्क्षत्रममवत्त्वेषमस्तु॥६॥

**अन्वय**- अग्ने ! (इन्द्र !) अर्यः (अहम्) सहस्रासाम् उपमा केतुम् अग्निवेश शत्रिं गृणीषे। आपः तस्मै सयतः पीपयन्त तस्मिन् क्षत्रम् अभवत् त्वेषम् अस्तु।

**अनुवाद**- हे दीप्तिवान ! (इन्द्र!) श्रेष्ठ (मैं) अपरिमित धन के दाता, उपमायोग्य, प्रज्ञापक अग्निवेश के पुत्र शत्रि की स्तुति करता हूँ। जल उसे भलीभाँति जाकर तृप्त करे। उसका धन बलयुक्त दीप्तिवान हो।

## सूक्त - (३५)

***देवता***- इन्द्र, ***ऋषि***- प्रभुवसुराङ्गिरस, ***छन्द***- अनुष्टुप्, ८ पङ्क्ति।

यस्ते साधिष्ठोऽवंस इंद्र क्रतुष्टमा भंर। अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम्॥१॥

**अन्वय**- इन्द्र ! ते यः साधिष्ठः क्रतुः (अस्ति) चर्षणिसह, सस्निं, वाजेषु दुस्तर तम् अस्मभ्यम् आ भर।

**अनुवाद**- हे इन्द्र ! तुम्हारा जो साधकतम कर्म (है) मनुष्यो को अभीभूत करने वाले, शुद्ध, युद्ध मे अनभिभनीय उसको हमे भलीभाँति दो।

यदिंद्र ते चतंस्रो यच्छूर संति तिस्रः। यद्वा पंच क्षितीनामवस्तत्सु न आ भंर॥२॥

**अन्वय**- शूर ! इन्द्र ! यत् ते चतस्रः (वर्णेषु) यत् तिस्रः (लोकेषु) यत् वा पञ्चक्षितीनाम् अवः (साधनानि) सन्ति तत् सु न आ भर।

**अनुवाद**- हे वीर ! इन्द्र ! जो तुम्हारा चार (वर्णो) मे जो तीन (लोको) मे और जो पञ्चजनो मे रक्षा (साधन) है उन्हे भलीभाँति हमे प्रदान करो।

आतेऽवो वरेण्यं वृषंतमस्य हूमहे। वृषजूतिर्हि जज्ञिष आभूभिरिंद्र तुर्वणिः॥३॥

**अन्वय**- इन्द्र ! वृषन्तमस्य ते वरेण्यम् अवः (वयम्) आ हूमहे। वृषजूतिः (शत्रून) तुर्वाणिः (इन्द्र) आभूमि (मरुद्भिः सह) हि जज्ञिस।

**अनुवाद**- हे इन्द्र ! कामनासेचक तुम्हारे वरणीय रक्षा का (हम) आह्वान करते है। वृष्टिकर्ता (शत्रु-) हिंसक (इन्द्र) सर्वव्यापी (मरुतो के साथ) प्रकट होता है।

वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः। स्वक्षत्रं ते धृषन्मनः सत्राहमिंद्र पौंस्यम्॥४॥

**अन्वय**- (इन्द्र !) (त्व) वृषा हि असि। वृष्णि ! ते शवः राधसे जज्ञिषे। इन्द्र ! मनः ते स्वक्षत्रम् (अस्ति) (ते) पौस्य (शत्रूणा) धृषन् सत्राह (च) (अस्ति)।

**अनुवाद**- हे इन्द्र ! (तुम) वर्षा कराने वाले हो। हे कामनासेचक ! तुम्हारा बल समृद्धि के लिये उत्पन्न हुआ। हे इन्द्र ! मन तुम्हारे अपने नियन्त्रण मे (है) (तुम्हारा) पौरुष (शत्रुओ का) दमन करने वाला है (और) सघविनाशक (है)।

त्वं तमिंद्र मर्त्यममित्रयंतमद्रिवः। सर्वरथा शतक्रतो नि याहि शवसस्पते॥५॥

**अन्वय**- अद्रिवः ! शतक्रतो ! शवस्पते ! इन्द्र ! त्वम् अमित्रयता मर्त्य (विरुद्ध) सर्वरथा नि याहि।

**अनुवाद**- हे वज्रधारिन् ! हे शतक्रतो ! हे बलपते ! इन्द्र ! तुम मित्रता न रखने वाले मनुष्य के (विरुद्ध) सर्वव्यापक रथ से जाते हो।

त्वामिद्वृत्रहतम जनासो वृक्तबर्हिषः। उग्रं पूर्वीषु पूर्व्यं हवंते वाजसातये॥६॥

**अन्वय**- वृत्रहन्तम् ! (इन्द्र !) उग्र पूर्वीषु पूर्व्य त्वम् इत् वृक्तबर्हिषः जनासः वाजसातये हवन्ते।

**अनुवाद**- हे वृत्रहन्ता (इन्द्र !) उग्र, प्राचीनो मे प्राचीन तुम्हारा कुशासन बिछाने वाले मनुष्य युद्ध मे आह्वान करते है।

अस्माकमिंद्र दुष्टरं पुरोयावानमाजिषु। सयावानं धनेधने वाजयंतमवा रथम्॥७॥

**अन्वय**- इन्द्र ! दुस्तरम् आजिषु पुरोयावान सयावान धने धने वाजयन्तम् अस्माक रथम् अव (रक्ष)।

**अनुवाद**- हे इन्द्र ! कठिनाई से पार होने योग्य, युद्ध मे अग्रगामी, अनुचरो के साथ जाने वाले, धन की इच्छा करने वाले हमारे रथ की (रक्षा करो)।

अस्माकमिंद्रेहि नो रथमवा पुरंध्या।

वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तोमं मनामहे॥८॥

**अन्वय**- इन्द्र ! अस्माकम् आ इहि। पुरध्या नः रथम् अव (रक्ष)। शविष्ठ ! वय दिवि त्वयि वार्य श्रव. दधीमहि दिवि (च) (त्वयि) स्तोत्र मनामहे।

**अनुवाद**- हे इन्द्र ! हमारी ओर आओ। शोभन वृद्धि से हमारे रथ की (रक्षा करो)। हे बलशालिन् ! हम प्रदीप्त तुममे वरणीय अन्न स्थापित करते हैं (और) प्रदीप्त (तुम्हारे लिये) स्तोत्र बनाते है।

## सूक्त - (३६)

*देवता*- इन्द्र, ***ऋषि***- प्रभुवसुराङ्गरस, ***छन्द***- त्रिष्टुप्, ३ जगती।

स आ गमदिंद्रो यो वसूनां चिकेतद्दातुं दामनो रयीणम्।
धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुम्॥१॥

**अन्वय**- य वसूना दातु चिकितत्, रयीणा दामनः (अस्ति) सः इन्द्रः (अस्मद्यज्ञम्) आ गमत्। धन्वचरः वसगः न तृषाणः चकमान (इन्द्रः) दुग्धम् अशु पिबतु।

**अनुवाद**- जो धन देना जानता है, धन का दाता (है) वह इन्द्र (हमारे यज्ञ मे) आये। धनुषयुक्त, वन मे जाने वाले की भाति तृषित, मस्त होता हुआ (इन्द्र) अभिषुत सोम का पान करे।

आ ते हनू हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे।
अनु त्वा राजन्नर्वतो न हिन्वन् गीर्भिर्मदेम पुरुहूत विश्वे॥२॥

**अन्वय**- हरिव! शूर ! (इन्द्र !) पर्वतस्य पृष्ठे न शिप्रे ते हनू सोमः आ रुहत्। पुरुहूत ! राजन् ! (तृणादिभिः तृप्तः) अर्वत न गीभिः त्वा अनु हिन्वन् विश्वे (वय) मदेम।

**अनुवाद**- हे अश्वयुक्त ! वीर ! (इन्द्र !) पर्वत के शिखर की भाँति सहारक तुम्हारे कपोल पर सोम आरोहण करे। हे बहुस्तुत ! हे राजन ! (तृणादि से तृप्त हुये) अश्व की भाँति स्तुतियो द्वारा तुझे तृप्त करते हुये (हम) हर्षित हो।

चक्र न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः।
रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरुवसुः॥३॥

**अन्वय**- पुरुहूत ! अद्रिवः ! (इन्द्र !) वृत चक्र न मे मनः अमतेः भिया वेपते। सदावृध ! पुरुवसुः ! रथात् अधि (स्थित) त्वा कुवित् स्तोत्रेन जरिता नु स्तोषत्।

**अनुवाद**- हे बहुस्तुत ! वज्रवान ! इन्द्र ! गोल चक्र की भाँति मेरा मन दरिद्रता के भय से काँपता है। हे सर्वदा वर्धमान ! प्रभूत धनवाले ! रथ पर (स्थित) तुम्हारी बहुत (स्तोत्रो) से स्तोत ! स्तुति करता है।

एष ग्रावेव जरिता त इंद्रेयर्ति वाचं बृहदाशुषाणः।
प्र सव्येन मघवन्यंसि राय. प्र दक्षिणिद्धरिवो मा वि वेनः॥४॥

**अन्वय**- इन्द्र ! एषः जरिता ग्रावा इव ते वाचम् इयर्ति। मघवन् ! हरिवः (इन्द्र !) बृहत् (फलम्) आशुषाणः (त्व) सत्येन रायः प्र यासि दक्षिणात् प्र (यासि) (अस्मान्) विवेनः मा कुरु।

**अनुवाद**- हे इन्द्र ! यह स्तोता प्रस्तर की भाँति तेरी स्तुति करता है। हे धनवान ! अश्वयुक्त (इन्द्र !) बहुत से (फल) प्रदान करने वाला (तू) दाहिने हाथ से धन देता है, दाहिने से (देता है) (हमे) विफलमनोरथ मत करो।

वृषो त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्याम्।

स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन्भरे धाः॥५॥

**अन्वय**- (इन्द्र.) वृषा द्यौः वृषण त्वा वर्धतु। वृषा (त्व) वृषभ्या हरिभ्या (यज्ञ) वहसे। सुशिप्र ! वृषक्रतो ! वज्रिन ! सः वृषा वृषरथ. (त्व) भरे नः वृषा धा.।

**अनुवाद**- (इन्द्र !) वर्षक द्युलोक कामनासेचक तुम्हे बढाये। बलवान (तुम) बलवान अश्वो द्वारा (यज्ञ मे) लाये जाते हो ! हे सुशिप्र ! वर्षणकारी ! वज्रधर ! वह बलवान, बलवान रथ वाले (तुम) सङ्ग्राम मे हमे बल दो।

यो रोहितौ वाजिनौ वाजिनीवान्त्रिभिः शतैः सचमानावदिष्ट।

यूने समस्मै क्षितयो नमंता श्रुतरथाय मरुतो दुवोया॥६॥

**अन्वय**- मरुत· ! वाजिनीवान! यः (श्रुतरथः) सचमानौ रोहितौ वाजिनौ त्रिभि· शतै· (गवाम्) अदिष्ट। अस्मै यून श्रुतरथाय क्षितय दुवोया सम् नमन्ताम्।

**अनुवाद**- हे मरुतो ! अन्नवान जिस (श्रुतरथ) ने साथ चलने वाले लोहित वर्ण के दो अश्व, तीन सौ (गाये) दी। उस तरुण श्रुतरथ को प्रजाये सेवाभाव से नमस्कार करे।

## सूक्त - (३७)

**देवता**- इन्द्र, **ऋषि**- भौमोऽत्रि, **छन्द**- त्रिष्टुप्।

सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वञ्चाः।

तस्मा अमृध्रा उषसो व्युच्छान्य इन्द्राय सुनवामेत्याह॥१॥

**अन्वय**- घृतपृष्ठ· स्वञ्चाः आजुहवानः (अग्निः) सूर्यस्य भानुना सम् यतते। यः 'इन्द्राय सुनवाम' इति आह तस्मै उषस अमृधाः (सन्) वि उच्छन्।

**अनुवाद**- तेजस्वी ज्वालाओ वाला, शोभनगति वाला, भलीभाँति आहूत (अग्नि) सूर्य की किरणो से प्रतिस्पर्धा करता है। जो 'इन्द्र के लिये होम करो' यह कहता है उसके लिये उषा अहिंसित (होकर) प्रकाशित होती है।

समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो जराते।

ग्रावाणो यस्येषिरं वदत्ययदध्वर्युर्हविषाव सिंधुम्॥२॥

**अन्वय**- समिद्धाग्नि. स्तीर्णबर्हिः (यजमानः) वनवत् युक्तग्रावा सुतसोमः जराते। यस्य ग्रावाण· इषिर वदन्ति (स) अध्वर्यु हविषा सिन्धुम् अव (गच्छति)।

**अनुवाद**- अग्नि को समिद्ध करने वाला कुश बिछाने वाला (यजमान) सम्भजन करता है। प्रस्तर को सयुक्त करने वाला स्तुति करता है। जिसका प्रस्तर मधुर शब्द करता है (वह) अध्वर्यु हवि के साथ नदी मे अवगाहन (करता है)।

वधूरियं पतिमिच्छंत्येति य ईं वहाते महिषीमिषिराम्।
आस्य श्रवस्याद्रथ आ च घोषात्पुरु सहस्रा परि वर्तयाते॥३॥

**अन्वय**- इय वधूः पतिम् इच्छन्ती एति यः (अयम् इन्द्रः) ईम् इषिरा महिषी वहाते। अस्य (इन्द्रस्य) रथ· (नः) आ श्रवस्यात् आ घोषात् च (सः) पुरु सहस्रा (धनानि) परि (अस्मान्) वर्तयाते।

**अनुवाद**- यह पत्नी पति की इच्छा करती हुयी जाती है जो (यह इन्द्र) इस गमनशीला महिषी को वहन करता है; इस (इन्द्र) का रथ (हमारी) ओर अन्न लाता है और शब्द करता है (वह) अपरिमित (धन) चारो ओर से (हमे) प्राप्त कराये।

न स राजा व्यथते यस्मिन्निंद्रस्तीव्रं सोमं पिबति गोसखायम्।
आ सत्वनैरजति हंति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन्॥४॥

**अन्वय**- यस्मिन् (यज्ञे) इन्द्रः गोसखायं तीव्र सोम पिबति सः राजा न व्यथते (सः) सत्वनैः आ अजति, वृत्र हन्ति, क्षिती क्षेति, सुभगः (सन्) (इन्द्रस्य) नाम पुष्यन्।

**अनुवाद**- जिसके (यज्ञ) मे इन्द्र दुग्धमिश्रित मधुर सोम पीता है वह राजा व्यथित नही होता (वह) प्रजाओ द्वारा सर्वत्र गमन करता है, शत्रु को मारता है, प्रजाओं की रक्षा करता है, सौभाग्य से युक्त (होकर) (इन्द्र के) स्तोत्र का पोषण करता है।

पुष्यात्क्षेमे अभि योगे भवात्युभे वृतौ संयती सं जयाति।
प्रियः सूर्ये प्रियो अग्ना भवाति य इंद्राय सुतसोमो ददाशत्॥५॥

**अन्वय**- यः इन्द्राय सुतसोमः ददाशत् (सः) सूर्ये प्रियः अग्ना प्रियः भवाति (बन्धून्) पुष्यत्, योगे (धनस्य) क्षेमे अभि भवति। वृतौ सयती उभे (अहोरात्र) सम् जयति।

**अनुवाद**- जो इन्द्र को अभिषुत सोम देता है (वह) सूर्य का प्रिय, अग्नि का प्रिय होता है। (बन्धुओ का) पोषण करता है। अप्राप्त (धन) की रक्षा मे समर्थ होता है वर्तमान नियत दोनों (दिनरात्रि) को जीतता है।

## सूक्त - (३८)

*देवता*- इन्द्र, ***ऋषि***- भौमोऽत्रि, **छन्द**- अनुष्टुप्।

उरोष्टं इन्द्र राधसो विभ्वीरातिः शतक्रतो। अधा नो विश्वचर्षणो द्युम्ना सुक्षत्र मंहय॥१॥

**अन्वय**- शतक्रतो ! इन्द्र ! उरोः ते राधसः रातिः विभ्वी (अस्ति) अध विश्वचर्षणे !सुक्षत्र ! (इन्द्र !) (त्वम्) नः द्युम्ना (धनानि) मंहय।

**अनुवाद**- हे शतक्रतो ! इन्द्र ! महान तुम्हारे धन का दान व्यापक (है) अतः हे सर्वदर्शिन्! सुधन ! (इन्द्र !) (तुम) हमे तेजस्वी (धन दो)।

यदीमिंद्र श्रवाय्यमिषं शविष्ठ दधिषे। पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरम्॥२॥

**अन्वय**- शविष्ठ ! इन्द्र ! यत् (त्व) श्रवाय्यम् इष दधिषे। हिरण्यवर्ण ! दुस्तरं दीर्घश्रुत (तदन्न) पप्रथे।

**अनुवाद**- हे बलशालिन् ! इन्द्र ! जो (तुम) श्रवणीय अन्न धारण करते हो। हे हिरण्यवर्ण ! कठिनाई से प्राप्त होने योग्य प्रख्यात (वह अन्न) फैल रहा है।

शुष्मासो ये ते अद्रिवो मेहना केतसापः। उभा देवावभिष्टये दिवश्च ग्मश्च राजथः॥३॥

**अन्वय**- अद्रिव· ! (इन्द्र !) ये शुष्मासः मेहना केतसापः (मरुतः सन्ति) ते (त्वदीयः) (सन्ति)। उभा देवौ अभिष्टये दिव· च ग्म· च राजथ।

**अनुवाद**- हे वज्रधर ! (इन्द्र !) जो बलवान, महान प्रज्ञापक (मरुद्गण है) वे (तुम्हारे) (है)। दोनो देवता स्वेच्छानुसार द्युलोक और पृथिवीलोक पर शासन करते है।

उतो नो अस्य कस्य चिद्दक्षस्य तव वृत्रहन्।
अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे॥४॥

**अन्वय**- वृत्रहन् ! (वयं) तव अस्य दक्षस्य (स्तुवन्ति) अस्मभ्य नः कस्य चित् नृम्णम् आ भर। (यत· त्वम्) अस्मभ्य नृमनस्यसे।

**अनुवाद**- हे वृत्रहन्ता ! (हम) तुम्हारे इस बल की (स्तुति करते हैं) हमे किसी का भी धन लाकर दो (क्योंकि तुम) हमे धनवान करना चाहते हो।

नू त आभिरभिष्टिभिस्तव शर्मञ्छतक्रतो।
इंद्र स्याम सुगोपाः शूर स्याम सुगोपाः॥५॥

**अन्वय**- शतक्रतो ! (अस्माकम्) अभिः ते अभिष्टिभिः वय सुगोपाः स्याम। शूर ! इन्द्र ! तव शर्मन् (वयम्) सुगोपाः स्याम।

**अनुवाद**- हे शतक्रतो ! (हमारे) प्रति तुम्हारी सहायता से हम शीघ्र समृद्ध हो। हे वीर ! तेरे सुख से (हम) सुरक्षित हो।

## सूक्त - (३६)

***देवता***- इन्द्र, ***ऋषि***- भौमोऽत्रि, ***छन्द***- अनुष्टुप्, ५ पङ्ति।

यदिंद्र चित्र मेहनास्ति त्वादांतमद्रिवः। राधस्तन्नों विदद्वस उभयाहस्त्या भंर।।१।।

**अन्वय**- चित्र ! अद्रिवः इन्द्र ! यत् मेहना, त्वादातं राधः अस्ति। विद्वसो ! तत् नः उभयाहस्ति आ भर।

**अनुवाद**- हे चयनीय ! वज्रवान ! इन्द्र ! जो महान तुम्हारे द्वारा दिया जाने वाला धन है हे लब्धधने ! वह हमे दोनो हाथो से दो।

यन्मन्यंसे वरेंण्यमिंद्र द्युक्षं तदा भंर। विद्याम तस्यं ते वयमकूंपारस्य दावनें।।२।।

**अन्वय**- इन्द्र ! यत् द्युक्ष त्व वरेण्यं मन्यसे तत् नः आ भर ! वयं ते तस्य अकूपारस्य (अन्नस्य) दावने (पात्रा) विद्याम।

**अनुवाद**- हे इन्द्र ! जिस अन्न को तुम वरणीय मानते हो वह हमे प्रदान करो। हम तुम्हारे उस अकुत्सित (अन्न) के दान के (पात्र) हो।

यत्ते दित्सु प्रराध्यं मनो अस्तिं श्रुतं बृहत्। तेनं दृळ्हा चिंदद्रिव आ वाजं दर्षि सातयें।।३।।

**अन्वय**- (इन्द्र !) ते यत् दित्सु प्रराध्य श्रुतं बृहत् मनः अस्ति दृळ्हा चित् तेन (मनसा) (नः) सातये वाजम् आ दर्षि।

**अनुवाद**- (हे इन्द्र !) तुम्हारा जो दानेच्छु, स्तवनीय, विश्रुत महान मन है दृढ उस (मन) से (हमे) लाभ के लिये अन्न प्रदान करो।

मंहिंष्ठं वो मघोनां राजांनं चर्षणीनाम्। इंद्रमुप प्रशंस्तये पूर्वीभिर्जुजुषे गिरंः।।४।।

**अन्वय**- मघोना महिष्ठ, चर्षणीना राजानम् इन्द्र प्रशस्तये वः गिरः पूर्वीभिः (स्तुतीभिः) जुजुषे।

**अनुवाद**- धनवानों मे सर्वाधिक धनवान, मनुष्यो के राजा इन्द्र की तुम्हारे स्तोता पूर्व (स्तुतियो) द्वारा सेवा करते है।

अस्मा इत्काव्यं वचं उक्थमिंद्राय शंस्यम्।
तस्मां उ ब्रह्मवाहसे गिरों वर्धंत्यत्रंयो गिरंः शुंभंत्यत्रंयः।।५।।

**अन्वय**- अस्मै इत् इन्द्राय काव्य वचः उक्थं (च) शस्यम्। ब्रह्मवाहसे तस्मै (इन्द्राय) अत्रयः गिरः वर्धन्ति अत्रयः गिरः शुम्भन्ति।

**अनुवाद**- इस इन्द्र के लिये काव्य, वाणी (और) स्तोत्र उच्चरित हुआ है। स्तोत्र वाहक उस (इन्द्र) को अत्रिगोत्रोत्पन्न स्तोत्रो से बढाते है, अत्रिगोत्रोत्पन्न स्तोत्रो से दीप्त करते है।

## सूक्त - (४०)

**देवता**- १-४ इन्द्र, ५ सूर्य, ६-६ अत्रि, **ऋषि**- भौमोऽत्रि, **छन्द**- १ - ३ उष्णिक्, ५, ६ अनुष्टुप्, ४, ६, ८, त्रिष्टुप्।

आ याह्यद्रिभिः सुतं सोमं सोमपते पिब। वृषन्निंद्र वृषभिर्वृत्रहंतम॥१॥

**अन्वय**- वृषन् ! वृत्रहन्तम ! इन्द्र ! (त्वम्) (अस्मद्यज्ञ) आ याहि। वृषभिः (मरुद्भिः सह) सोमपते ! अद्रिभि सुत सोम पिब।

**अनुवाद**- हे बलवान ! वृत्रहन्ता ! इन्द्र ! (तुम) (हमारे यज्ञ मे) आओ। फलवर्षी (मरुतो के साथ) हे सोमपते ! प्रस्तर से अभिषुत सोम पियो।

वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः। वृषन्निंद्र वृषभिर्वृत्रहंतम॥२॥

**अन्वय**- वृषन् ! वृत्रहन्तम ! इन्द्र ! वृषा ग्रावा वृषा मदः वृषा अय सुतः सोमः (अस्ति) (त्व) वृषभिः (मरुद्भिः सह) (त पिब)।

**अनुवाद**- हे बलवान ! वृत्रहन्ता ! इन्द्र ! अभिषव करने वाले प्रस्तर से अभिषुत, मादक यह अभिषुत सोम (है) (तुम) बलवान (मरुतो के साथ) (उसे पियो)।

वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः। वृषन्निंद्र वृषभिर्वृत्रहंतम॥३॥

**अन्वय**- वज्रिन् ! वृषन् ! वृत्रहन्तम ! इन्द्र ! वृषा (अह) वृषण त्वा चित्राभिः ऊतिभिः वृषभिः (मरुद्भिः सह) हुवे।

**अनुवाद**- हे वज्रिन् ! बलवान ! वृत्रहन्ता ! इन्द्र ! अभिलाषी (मै) बलवान तुम्हारा विचित्र रक्षा वाले, फलवर्षी (मरुतो के साथ) आह्वान करता हूँ।

ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा।
युक्त्वा हरिभ्यामुप यासदर्वाङ्माध्यंदिने सवने मत्सदिंद्रः॥४॥

**अन्वय**- ऋजीषी, वजी, वृषभः, तुराषाट् (शत्रूणा) शुष्मी, राजा, वृत्रहा, सोमपावा इन्द्रः हरिभ्याम् (रथे) युक्त्वा अर्वाङ् उप यासत् (आगत्य च) माध्यन्दिने सवने (सोमेन) मत्सत्।

**अनुवाद**- तीव्रगामी, वज्रवान, कामनासेचक शीघ्रगामी (शत्रु-) सहारक, शासक, वृत्रहन्ता, सोमपायी इन्द्र अश्वों को (रथ मे) युक्त करके हम लोगो के समीप आये (और आकर) माध्यन्दिन सवन मे (सोम द्वारा) मस्त हो।

यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः। अक्षेत्रविद्यथा मुग्धो भुवनान्यदीधयुः॥५॥

**अन्वय**- सूर्य ! यत् त्वा स्वार्भानुः असुरः तमसा अविध्यत् (तदा) यथा अक्षेत्रवित् मुग्धः (भवति) (तथैव विश्वा) भुवनानि अदीधयुः।

**अनुवाद**- हे सूर्य ! जब तुम्हे स्वर्भानु असुर ने अन्धकार से आच्छन्न कर लिया था (तब) जिस प्रकार अपने स्थान को न जानने वाला मूढ (हो जाता है) (उसी प्रकार समस्त) लोक दिख रहा था।

स्वर्भानोरध यदिंद्र माया अवो दिवो वर्तमाना अवाहन्।
गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविंददत्रिः॥६॥

**अन्वय**- इन्द्र ! अद्य यत् स्वर्भानोः दिव. (सूर्यस्य) अवः वर्तमाना· मायाः अवहन् (तदा) अपव्रतेन तमसा गूळ्ह सूर्यं तुरीयेण ब्रह्मणा अत्रि· अविन्दत्।

**अनुवाद**- हे इन्द्र ! इसके अनन्तर जब स्वर्भानु की दिव्य (सूर्य) के नीचे स्थित माया को नष्ट किया (तब) व्रतविधातक अन्धकार से परिच्छिन्न सूर्य को चार ऋचाओ से अत्रि ने प्रकाशित किया।

मा मामिमं तव संतमत्र इरस्या द्रुग्धो भियसा नि गारीत्।
त्व मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा॥७॥

**अन्वय**- अत्रे ! तव सन्तम् इम मा द्रुग्ध (असुरः) इरस्या भियसा (वा) मा निगारीत् (त्व) वरुणः (च) तौ मा इह अवतम्। त्व मित्र सत्यराधा राजा च असि।

**अनुवाद**- हे अत्रे ! तुम्हारे रहते इस मुझे द्रोही (असुर) भोजनच्छा (अथवा) भय के कारण न निगल ले। (तुम) (और) वरुण तुम दोनो मेरी यहाँ रक्षा करो। तुम मित्र, सत्यधनाश्व और पालक हो।

ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन्।
अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत्॥८॥

**अन्वय**- ब्रह्मा अत्रिः ग्राव्णः युयुजानः कीरिणा देवान् सर्पयन्, नमसा उपशिक्षन्, सूर्यस्य चक्षुः (मण्डल) दिवि आ अधात् स्वर्भानो. (च) मायाः अप अघुक्षत्।

**अनुवाद**- ब्रह्मा अत्रि ने पत्थरो को सयुक्त करते हुये स्तोत्र से देवताओ की पूजा करते हुये, नमस्कार से प्रसन्न करते हुये सूर्य के चक्षु (मण्डल) को अन्तरिक्ष मे स्थापित किया (और) स्वर्भानु की माया को दूर किया।

यं वै सूर्यं स्वर्भानुस्तमसाविध्यदासुरः। अत्रयस्तमन्वविंदन्नह्यऽन्ये अशक्नुवन्॥९॥

**अन्वय**- य वै सूर्य स्वर्भानुः असुरः तमसा अविध्यत् तम् (सूर्यम्) अत्रयः अनु अविन्दन् अन्ये (जनाः) (त) नहि अशक्नुवन्।

**अनुवाद**- जिस सूर्य को स्वर्भानु असुर ने अन्धकार से आच्छन्न किया उस (सूर्य) को अत्रियो ने प्राप्त किया अन्य (लोग) (उसे) नही प्राप्त कर सके।

## सूक्त (४१)

***देवता***- विश्वेदेवा. , ***ऋषि***- भौमोऽत्रि, ***छन्द***- जगती, विराट्, त्रिष्टुप्

को नु वां मित्रावरुणावृतायन्दिवो वा महः पार्थिवस्य वा दे।
ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान्॥१॥

**अन्वय** - मित्रावरुणौ ! कः नु वाम् ऋतयन् (शक्नुयाति)। (युवाम्) दिवः वा महः पार्थिवस्य वा ऋतस्य (अन्तरिक्ष्य) वा सदसि न त्रासीथाम्। (हविः) दे यज्ञयते (यजमानाय) (युवा) पशुसः न (पुष्ट) वाजान् (प्रयच्छथः)।

**अनुवाद** - हे मित्रावरुणौ ! कौन तुम्हारे यज्ञ की इच्छा करता हुआ (समर्थ नही होता है।) (तुम दोनो) द्युलोक महान पृथिवीलोक अथवा शाश्वत (अन्तरिक्ष) स्थान से हमारी रक्षा करो। (हवि) - दानी यज्ञ करने वाले (यजमान) को (तुम) पशु की भाँति (पुष्ट) अन्न (देते हो)।

ते नो मित्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा मरुतो जुषंत।
नमोभिर्वा ये दधते सुवृक्ति स्तोमं रुद्राय मीळ्हुषे सजोषाः॥२॥

**अन्वय** - ये मीळहुषे रुद्राय (सह) सजोषाः (स्तोत्रं) दधते। ते मित्रः, वरुणः, अर्यमा, आयुः, इन्द्रः, ऋभुक्षाः, मरुतः नः सुवृक्ति स्तोम (हविः) वा नमोभिः जुषन्त।

**अनुवाद** - जो सुखदायक रुद्र के साथ प्रेमपूवर्क (स्तोत्र को) धारण करते है। वे मित्र, वरुण, अर्यमा, वायु, इन्द्र, ऋभुक्षगण, मरुत हमारे शोभन स्तोत्र अथवा (हवि को) नमस्कार पूर्वक सेवन करे।

आ वां येष्ठाश्विना हुवध्यै वातस्य पत्मन्रथ्यस्य पुष्टौ।
उत वा दिवो असुराय मन्म प्रांधांसीव यज्यवे भरध्वम्॥३॥

**अन्वय** - अश्विना ! येष्ठां वा वातस्य (न) पत्मन् रथस्य पुष्टौ आ हुवध्यै उत वा (ऋत्विजः !) दिवेः असुराय यज्यवे (रुद्राय) अन्धांसि इव मन्म (स्तोत्रम्) प्र भरध्वम्।

**अनुवाद** - हे अश्विनौ ! नियन्त्रक तुम दोनों का वायु (की भाँति) वेगवान रथ के लिये आह्वान करता हूँ (और) (हे ऋत्विजो !) कान्तिवान, प्राणदाता, यजनीय (रुद्र) के लिये अन्न की भाँति मननीय (स्तोत्र) को सम्पादित करो।

प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा वातो अग्निः।
पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः॥४॥

**अन्वय** - सक्षण, कण्वहोता, विश्वभोजा, दिव्य:, त्रित: (लोके व्यापक:) दिव. (सह) सजोषा वात:, अग्नि:, पूषा, भग अश्वतमा (सन्त:) आजि न (गन्तार) प्रभृथे प्र जग्मु:।

**अनुवाद** - सेवक, तेजस्वी, मेधावियो द्वारा आवाहित सर्वरक्षक, तीनो (लोको मे व्यापक) सूर्य (के साथ) प्रीतियुक्त होकर वायु, अग्नि, पूषा, भग, तीव्रगामी अश्वयुक्त (होकर) सग्राम मे (जाने वाले की) भाँति यज्ञ मे जाते है।

प्र वो रयिं युक्ताश्वं राय एषेऽवसे दधीत धीः।

सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणाम्॥५॥

**अन्वय** - मरुत: ! युक्ताश्व रयि व: प्र भरध्वम्। राय: एषे अवसे (च) (स्तोता.) धी: दधीत। (मरुत: !) एवा. ये तुराणाम् (अश्वा सन्ति) एवै: औशिजस्य होता (अत्रि:) सुशेव: (भवतु)।

**अनुवाद**- हे मरुतो ! अश्वयुक्त धन हमे प्रदान करो। धन की प्राप्ति (तथा) रक्षा के लिये (स्तोता) स्तुति धारण करे। (हे मरुतो !) इस प्रकार के जो तीव्रगामी (अश्व है) उनसे उशिजपुत्र होता (अत्रि) सुखी (हो)।

प्र वो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः।

इषुध्यवं ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः॥६॥

**अन्वय** - (ऋत्विज: !) प्र देव, विप्रं, पनितार, वायु व: अर्कै: रथयुज प्र कृणुध्वम्। इषुध्यव:, ऋतसाप:, पुरन्धी:, वर्स्वा (देव) - पत्नी: अत्र (यज्ञे) न: धिये (निष्पत्तये) आ धु:।

**अनुवाद** - (हे ऋत्विजो !) कान्तिवान, मेधावी, स्तवनीय वायु को तुम स्तुतियों से रथयुक्त करो। गमनशीला, यज्ञग्रहणशीला, रूपयुक्त, प्रशसनीय (देव-) पत्नियाँ इस (यज्ञ) में हमारे कर्म की (निष्पत्ति के लिये) आगमन करे।

उप व एषे वंद्येभिः शूषैः प्र यह्वी दिवश्चितयद्भिरर्कैः।

उषासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञम्॥७॥

**अन्वय**- उषानक्ता ! शूषै: चितयद्भि: अर्कै: वन्द्येभि: (देवै: सह) (वयम्) व: (हवि:) उप एषे। यह्वी: (यूय) विदुषी इव विश्व यज्ञ मर्त्याय आ वहत:।

**अनुवाद** - हे उषानक्ता ! सुखकर, ज्ञापक स्तोत्रो द्वारा वन्दनीय (देवो के साथ) (हम) तुम्हे हवि पहुँचाते है। महनीय (तुम) विदुषी की भाँति समस्त यज्ञ की ओर मनुष्य को लाती हो।

अभि वो अर्चे पोष्यावतो नृन्वास्तोष्पतिं त्वष्टारं रराणः।

धन्या सजोषा धिषणा नमोभिर्वनस्पतींरोषधी राय एषे॥८॥

**अन्वय** - नूनं पोष्यवत, वस्तो पति, त्वष्टारम्, धन्या, सजोषा, धिषणा, वनस्पतीन्, ओषधीः व राय एषे (अह) नमोभि रराण अभि अर्चे।

**अनुवाद** - नेता, पोषक, सभी के स्वामी त्वष्टा को, धनदायक, आनन्ददायक वाणी को, वनस्पतियो तथा ओषधियो को तुम सबकी धन - प्राप्ति के लिये (मैं) नमस्कार द्वारा आनन्दित करते हुये अर्चना करता हूँ।

तुजे नस्तने पर्वताः संतु स्वैतवो ये वसवो न वीराः।
पनित आप्त्यो यजतः सदा नो वर्धान्नः शस नर्यो अभिष्टौ॥९॥

**अन्वय** - वसवः न वीराः ये पर्वताः (सन्ति) (ते) नः तने तुजे स्वैतवः सन्तु। नः पनितः आप्त्यः यजतः नर्यः (हितः) (देवा) अभिष्टौ नः शस वर्धात्।

**अनुवाद** - वसुओ की भाँति वीर जो मेघ (है) (वे) हमारे पुत्र की वृद्धि के लिये शोभनगमनशील हो। हमारे द्वारा स्तुत्य, ज्ञानी, यजनीय, मनुष्यो के (हितकारक) (देवता) यज्ञ मे हमारी स्तुति को बढ़ाये।

वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति।
गृणीते अग्निरेतरी न शूषैः शोचिष्केशो नि रिणाति वना॥१०॥

**अन्वय** - (वय) वृष्णः भूम्यस्य गर्भ (स्थित) अपा नपातं सुवृक्ति (स्तोत्रेण) अस्तोषि। त्रितः (व्यापकः) अग्निः (मयि) एतरि शूषैः (रश्मिभिः) न गृणीते (किन्तु) शोचिष्केशः (सन्) वना नि रिणीते।

**अनुवाद** - (हम) वर्षक भूमि के गर्भ (मे स्थित) अपा नपात की शोभन (स्तोत्रो) से स्तुति करते है। तीनो लोको मे (व्यापक) अग्नि (मेरे) गमनकाल मे सुखकर (ज्वालाओ) से हिंसित नही करता (किन्तु) प्रदीप्त ज्वाला-युक्त (होकर) वनो को नष्ट करता है।

कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय।
आप ओषधीरुत नोऽवंतु द्यौर्वना गिरयो वृक्षकेशाः॥११॥

**अन्वय** - (वयमत्रयः) महे रुद्रियाय (मरुद्गणाय) कथा (स्तुतीः) ब्रवाम। राये चिकितुषे भगाय कत् (स्तुतीः ब्रवाम)। आपः, ओषधीः, द्यौ, वना, वृक्षकेशाः गिरयः उत नः अवन्तु।

**अनुवाद** - (हम अत्रि) महान रुद्रपुत्र (मरुद्गण) के लिये ज्ञानवान भग के लिये किस प्रकार (स्तुति बोले)। धन को जानने वाले भग के लिये किस प्रकार (स्तुति बोले)। जल, वनस्पति, द्यौस्, वन, वृक्षरूप पर्वत भी हमारी रक्षा करे।

शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा।
शृण्वंत्वापः पुरो न शुभ्राः परि स्रुचो बबृहाणस्याद्रेः॥१२॥

**अन्वय** - ऊर्जा पतिः, नभः तरीयान्, इषिर, परिज्मा (यः वायुः अस्ति) सः नः गिरः शृणोतु। पुरः न शुभ्राः बबृहीणस्य अद्रेः परि स्रुचः आपः (नः गिरः) शृणवन्तु।

**अनुवाद** - बल का स्वामी, आकाश मे गमन करने वाला (जो वायु है) वह हमारी स्तुति सुने। नगर की भाँति शुभ्र, विशाल पर्वत के चारो ओर बहने वाला जल (हमारी स्तुति को) सुने।

विदा चिन्नु महांतो ये व एवा ब्रवाम दस्मा वार्यं दधानाः।

वयश्चन सुभ्व१आव यंति क्षुभा मर्तमनुयतं वधस्नैः॥१३॥

**अन्वय** - महान्त ! (मरुतः !) नु चित् (नः स्तोत्र) विद। दस्माः ! वः एवाः ये वार्यं (हविः) दधानाः (स्तुतिम्) ब्रवाम। वयश्चन क्षुभा अनुयत मर्त वधस्नैः (परिहरन्तः) (मरुतः) सूभ्वः (सन्) (नः) आ अव यन्ति।

**अनुवाद** - हे महान्! (मरुत!) शीघ्र (हमारे स्तोत्र को) जानो। हे दर्शनीय ! तुम्हारे मार्ग को जानने वाले हम वरणीय (हवि) को धारण करते हुये (स्तुति) बोलते है। अश्वगन्ता, क्षुब्ध होकर आने वाले मनुष्य को शस्त्र से (मारकर) (मरुत) प्रवृद्ध (होकर) (हमारे) समीप आते है।

आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचम्।

वर्धंतां द्यावो गिरश्चंद्राग्रा उदा वर्धतामभिषाता अर्णाः॥१४॥

**अन्वय** - दैव्यानि पार्थिवानि जन्म अपः च अच्छ सुमखाय (मरुद्गणाय) (वय) (गिरः) आ वोचम्। (नः) गिरः चन्द्रग्रा (च) द्याव वर्धन्ताम्। (मरुद्भिः) अभिसाताः अर्णाः उदा वर्धन्ताम्।

**अनुवाद** - देवसम्बन्धी, पृथिवी-सम्बन्धी, जन्म और जललाभ के लिये शोभनयज्ञवाले (मरुद्गण) के लिये (हम) (स्तुति) कहते है। (हमारी) वाणी और आह्लाददायक द्युलोक वर्द्धमान हो। (मरुतो द्वारा परिपुष्ट नदियाँ जलपूर्ण हो।

पदेपदे मे जरिमा नि धायि वरुत्री वा शक्रा या पायुभिश्च।

सिषक्तु माता मही रसा नः स्मत्सूरिभिर्ऋजुहस्त ऋजुवनिः॥१५॥

**अन्वय** - शक्रा पायुभिः च (नः) वरुत्री वा या मे जरिमा (अस्ति) (सा) पदे पदे निधायि। सूरिभिः ऋजुहस्ता, ऋजुवानिः मही माता नः स्मत् रसा भूमिः (नः) सिसक्तु।

**अनुवाद** - समर्थ और रक्षासाधनो से (हमारी) रक्षा करने वाली जो मेरी स्तुति (है) (वह) सर्वत्र व्याप्त है। मेधावियो द्वारा अनुकूल हस्त वाली, कल्याणदायक, विशाल निर्मात्री हमारे द्वारा स्तुत सारभूता (भूमि) (हमे) सीचे

कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ।

मा नोऽहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः॥१६॥

**अन्वय** - सदानूनृ मरुतः (वय) नमसा कथा दशेम। एवया अच्छोक्तैः मरुत (कथा दशेम)। प्रश्रवसः (अहम्) अच्छोक्तैः मरुत. (कथा दशेम)। अहिर्बुध्न्यः (देवः) नः रिषे मा धात् (सः) अस्माकम् उपमातिवानिः धात्।

**अनुवाद** - शोभनदानवाले मरुतो की (हम) नमस्कार द्वारा किस प्रकार परिचर्या करे। इसप्रकार वर्तमान कथन द्वारा (मरुतो की किस प्रकार परिचर्या करे)। प्रभूतअन्न-वाला (मै) वर्तमान कथन द्वारा मरुतो की (किस प्रकार परिचर्या करू)। अहिर्बुध्न्य (देवता) हमसे द्वेष न रखे। (वह) हमारे शत्रुओ का हन्ता हो।

इति चिन्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो वनते मर्त्यो वः।
अत्रा शिवां तन्वो धासिमस्या जरां चिन्मे निर्ऋतिर्जग्रसीत॥१७॥

**अन्वय** - देवासः ! मर्त्यः प्रजायै वः इति नु चित् वनते। देवासः। मर्त्यः वः पशुमत्यै वनते। अत्र (यज्ञे) निऋतिः (देव) शिवा धासि मे अस्याः तन्वः जरा जग्रसीत।

**अनुवाद** - हे देवताओ ! मनुष्य सन्तान के लिये तुम्हारी इस प्रकार शीघ्र स्तुति करते है। हे देवताओ ! मनुष्य तुम्हारी पशुओ के लिये स्तुति करते है। इस (यज्ञ) मे निऋति (देवता) कल्याणकारी अन्न से मेरे इस शरीरे के बुढ़ापे को निगल ले।

तां वो देवाः सुमतिमूर्जयंतीमिषमश्याम वसवः शसा गोः।
सा नः सुदानुर्मृळयंती देवी प्रति द्रवंती सुविताय गम्याः॥१८॥

**अन्वय** - वसवः ! देवाः ! वः ता शसा गोः (वयम्) सुमतिम् ऊर्जयनतीम् इषम् अश्याम् सुदानुः सा देवी नः सुविताय मृळयन्ती द्रवन्ती (नः) प्रति गम्याः।

**अनुवाद** - हे वासयिता ! देव ! तुम्हारी उस स्तवनीय गाय से (हम) सुमतिप्रद पोषक अन्न को प्राप्त करे। शोभनदानशीला वह देवी हमारे सुख के लिये हर्षित होती हुयी गतिशील होती हुयी (हमारे) पास आये।

अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु।
उर्वशी वा बृहद्दिवा गृणानाभ्यूर्ण्वाना प्रभृथस्यायोः॥१९॥

**अन्वय** - यूथस्य माता उर्वशी इळा नदीभिः (सह) नः स्मत् वा अभि गृणातु। बृहाद्दिवा उर्वशी प्रभृथस्थ आयोः गृणाना (तेजसा) (च) अभि ऊर्णवाना (अस्ति)।

**अनुवाद** - गोसघ की माता उर्वशी (माध्यमिकी वाक्) इळा (भूमि) नदियो (के साथ) हमारी स्तुति को गृहण करे। प्रभूतदीप्तिवाली उर्वशी तेजस्वी यजमान की प्रशंसा करने वाली (और) (तेज द्वारा) आच्छादित करने वाली (हैं)।

सिषक्तु न ऊर्जव्यस्य पुष्टेः॥२०॥

**अन्वय** - ऊर्जव्यस्य (राज्ञः) पुष्टेः (देवाः) नः सिसक्तु।

**अनुवाद** - ऊर्जव्य (राजा) के पोषण के लिये (देवता) हमारा साथ दे।

## सूक्त (४२)

***देवता***- विश्वेदेवाः, ***ऋषि***- भौमोऽत्रि, ***छन्द***- त्रिष्टुप्, एकपदा विराट्।

प्र शंतमा वरुणं दीधिती गीर्मित्रं भगमदितिं नूनमश्याः।
पृषद्योनिः पंचहोता शृणोत्वतूर्तपंथा असुरो मयोभुः॥१॥

**अन्वय** - (अस्माकम्) शतमा गीः (हविष्य) दीधती (सह) वरुणम्, मित्रम्, भगम्, अदिम्ं नून प्र अश्याः। पृषद्योनि, पञ्चहोता, अतूर्तपन्थाः, असुरः मयोभु. (वायुः) (स्तोत्रम्) शृणोतु।

**अनुवाद** - (हमारी) सुखकारी स्तुति (हविष्यरूप) कर्म (के साथ) वरुण, मित्र, भग, अदिति को निश्चित रूप से प्राप्त हो। विविध वर्णवाले (अन्तरिक्ष) मे निवास करने वाले, पञ्चवायु के साथ, अप्रतिहतगतिवाले, प्राणदायक, सुखप्रद (वायु) (स्तोत्र को) सुने।

प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न माता हृद्यं सुशेवम्।
ब्रह्म प्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु॥२॥

**अन्वय** - हृद्य सुशेव च मे स्तोमम् अदितिः सूनुं (प्रतिगृहतः) माता न प्रति जगृभ्यात्। यत् ब्रह्मप्रियम्, देवहितम् यत् मयोभुः अस्ति (तत् स्तोत्रम्) अहं मित्रे वरुणे (च) प्रापयामि।

**अनुवाद** - हृदयगम और सुखकर मेरे स्तोत्र को अदिति पुत्र को (ग्रहण करती हुयी) माता की भाँति ग्रहण करे। जो ब्रह्मप्रिय, देवग्राह्य जो सुखकर है (उस स्तोत्र) को मित्र और वरुण को प्रदान करता हूँ।

उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृतेन।
स नो वसूनि प्रयता हितानि चंद्राणि देवः सविता सुवाति॥३॥

**अन्वय** - (ऋत्विजः !) (यूयं) कवीना कवितमम् (सवितारम्) उदीरय। एनम् (देवम्) मध्वा घृतेन अभि उनत्त। सः देव· सविता नः प्रयता, हितानि चन्द्राणि (च) वसूनि सुवाति।

**अनुवाद** - (हे ऋत्विजो !) (तुम) क्रान्तदर्शियो मे सर्वाधिक क्रान्तदर्शी (सविता) को उद्दीप्त करो। इस (देवता) को मधुर घृत से अभिसिञ्चित करो। वह देव सविता हमे प्रवर्द्धक, हितकर (और) आह्लादक धन प्रदान करता है।

समिंद्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः स स्वस्ति।

स ब्रह्मणा देवहितं यदस्ति स देवानां सुमत्या यज्ञियानाम्॥४॥

**अन्वय** - इन्द्र ! (त्वम्) स मनसा नः गोभि· स नेषि। हरिवः ! (त्वम्) सूरिभिः स्वस्ति (च) (नेषि)देवहित यत् अस्ति (तत्) ब्रह्मणा (नः) सम् (नेषि)। यज्ञियाना देवाना सुमत्या (नः) सम् (नेषि)।

**अनुवाद** - हे इन्द्र ! (तुम) शोभन मन से हमे गायो से सयुक्त करो। हे उत्तम अश्वयुक्त ! (तुम) विद्वानो (और) कल्याण से (हमे) सयुक्त (करो) देवहितकर जो है (उस) ज्ञान से (हमे) (सयुक्त करो) यज्ञार्ह देवताओ की सुमति मे (हमे सयुक्त) (करो)।

देवो भगः सविता रायो अंश इंद्रो वृत्रस्य संजितो धनानाम्।

ऋभुक्ष वाजे उत वा पुरंधिरवंतु नो अमृतासस्तुरासः॥५॥

**अन्वय** - देव. भगः, सविता, रायः (स्वामी) अशः, वृत्रस्य (हन्ता) धनाना (च) संजितः इन्द्र, ऋभुक्षा·, वाज·, पुरन्धि. उत् वा (इति) अमृतासः (देवासः) (अस्मद्यज्ञम्) तुरासः (सन्तः) नः अवन्तु।

**अनुवाद** - दिव्य भग, सविता, धन के (स्वामी) त्वष्टा, वृत्र के (हन्ता) (और) धन के सयोजक इन्द्र, ऋभुगण, वाज तथा विभु (आदि) अमर (देवता) (हमारे यज्ञ मे) शीघ्रता से आगमन (करते हुये) हमारी रक्षा करे।

मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्र ब्रवामा कृतानि।

न ते पूर्वे मघवन्नपरासो न वीर्यं नूतनः कश्चनाप॥६॥

**अन्वय** - (वय) मरुत्वत· अप्रतीतस्य जिष्णोः अजुर्यतः (इन्द्रस्य) कृतानि प्र ब्रवाम। मघवन् ! (इन्द्र !) ते वीर्य न पूर्णे न नूतन. (पुरुषः) न अपरासः कश्चन आप।

**अनुवाद** - (हम) मरुतयुक्त, अप्रतिगत, जयशील, अजीर्णमान (इन्द्र) के कार्यो को भलीभाँति कहते है। हे दानी ! (इन्द्र !) तुम्हारे पराक्रम को न पहले न नवीन (पुरुष) नें न अन्य किसी नें प्राप्त किया है।

उप स्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानाम्।

यः शंसते स्तुवते शंभविष्ठः पुरुवसुरागमज्जोहुवानम्॥७॥

**अन्वय** - य स्तुवते शंभविष्ठः, जोहुवन पुरुवसुः आगमत् (त) प्रथमं, रत्नधेयम् धनाना सनितार बृहस्पतिम् (अन्तरात्मन् !) स्तुहि।

**अनुवाद**- जो स्तवन करने वाले स्तोता को सुखप्रदान करने वाला, हवन करने वाले को प्रभूत धन देने वाले है (उस) प्रकृष्टतम, रत्न देने वाले, धन के सरक्षक बृहस्पति की (हे अन्तरात्मन्!) स्तुति करो।

तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः।
ये अश्वदा उत वा संति गोदा ये वस्त्रदाः सुभगास्तेषु रायः॥८॥

**अन्वय-** बृहस्पते ! तव ऊतिभिः सचमानाः (मनुष्याः) अरिष्टाः मघवानः सुवीराः (भवन्ति)। ये (यजमानाः) अश्वदाः उत वा गोदाः वस्त्रदा च सन्ति तेषु सुभगाः रायः (सम्भवन्ति)।

**अनुवाद-** हे बृहस्पते ! तुम्हारी रक्षा से युक्त (मनुष्य) अहिंसित धनवान एवम् उत्तम पुत्र युक्त (होते है)। जो (यजमान) अश्व देने वाले अथवा जो गाय देने वाले और वस्त्र देने वाले है उनमे उत्तम धन (सस्थापित हो)।

विसर्माणं कृणुहि वित्तमेषां ये भुंजते अपृणंतो न उक्थैः।
अपव्रतान्प्रसवे वावृधानान्ब्रह्मद्विषः सूर्याद्यावयस्व॥९॥

**अन्वय-** (बृहस्पते !) ये नः उक्थैः (धनम्) अपृणन्तः (स्वयमेव) भुञ्जन्ते एषा वित्त विसर्माण कृणुहि। अपव्रतान् प्रसवे ववृधानान् ब्रह्मद्विषः (तान्) सूर्यात् यवयस्व।

**अनुवाद-** (हे बृहस्पते !) जो हम स्तोताओ को (धन) न प्रदान करते हुये (स्वय ही) सेवन करते है उनके धन को विसरणशील करो। व्रत न करने वाले मन्त्रद्वेषी (उन) को सूर्य से दूर करो।

य ओहते रक्षसो देववीतावचक्रेभिस्तं मरुतो नि यात।
यो वः शंमी शशमानस्य निंदात्तुच्छ्याकन्कामान्करते सिष्विदान॥१०॥

**अन्वय-** मरुतः ! यः देववीतौ रक्षसः ओहते यः वः शशमानस्य (अस्माकम्) शमी निन्दात् (आत्मानं च) सिस्वदानः तुच्छान् कामान् करते तम् अचक्रेभिः (रथेन) नि यात।

**अनुवाद-** हे मरुतो ! जो यज्ञ मे राक्षसों को बुलाता है, जो तुम्हारी स्तुति करते हुये (हमारी) स्तुति की निन्दा करता है (और स्वय को) क्लेश देता हुआ तुच्छ भोग करता है उसको चक्रहीन (रथ) से नष्ट कर दो।

तमु ष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य।
यक्ष्वा महे सैमनसाय रुद्रं नमोभिर्देवमसुरं दुवस्य॥११॥

**अन्वय-** यः स्विषुः, सुधन्वा (अस्ति) यः विश्वस्य भेषजस्य क्षयति तम् (रुद्रम्) (आत्मन् !) स्तुहि। महे सौमनसाय (आत्मन् !) असुर देव रुद्रं नमोभिः यक्ष्व दुवस्य (च)।

**अनुवाद-** जो शोभन बाण शोभन - धनुष वाला (है) जो समस्त ओषधियो का स्वामी है उस (रुद्र) की (हे अन्तरात्मन् !) स्तुति करो। महान शोभनचित्त के लिये (हे आत्मन् !) प्राणदायक दिव्य रुद्र का नमस्कार द्वारा यजन करो (तथा) सेवा करो।

दमूनसो अपसो ये सुहस्ता वृष्णः पत्नीर्नद्यो विभ्वतष्टाः।

सरस्वती बृहद्दिवोत राका दशस्यंतीर्वरिवस्यंतु शुभ्राः॥१२॥

**अन्वय**- ये दमूनस अपसः सुहस्ताः (ऋभवः) (सन्ति), वृष्णः (इन्द्रस्य) पत्नी, विभ्वतष्टा सरस्वती (इति) नद्य उत शुभ्रा राका (देवीः) दशस्यन्ती (अस्मभ्यम्) वरिवस्यन्तु।

**अनुवाद**- जो दानशील, कर्मनिष्ठ, शोभन हाथो वाले (ऋभुगण) (है), वर्षक (इन्द्र) की पत्नी विभुकृत् सरस्वती (आदि) नदियाँ अथवा शुभ्र राका (देवियाँ) कामना प्रदान करती हुयी (हमे) धन प्रदान करे।

प्र सू महे सुशरणाय मेधां गिरं भरे नव्यसीं जायमानाम्।

य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः॥१३॥

**अन्वय**- य आहना (इन्द्रः) दुहितुः (पृथिव्या हिताय) रूपा वक्षणासु मिमानाः इदम् (जलम्) नः अकरोत्। महे, सुशरणाय (तस्मै) (इन्द्राय) (अह) मेधा नव्यसी जायमाना गिर प्र भरे।

**अनुवाद**- जिस वर्षक (इन्द्र) ने कन्या (पृथिवी) के लिये विविधवर्णी नदियो को प्रकट करते हुये इस (जल) को हमे दिया। महान, शोभन शरणदाता (उस) (इन्द्र) को मै बुद्धिपूर्वक नवीन उत्पन्न वाणी प्रदान करता हूँ।

प्र सुष्टुतिः स्तनयंतं रुवंतमिळस्पतिं जरितर्नूनमश्याः।

यो अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः॥१४॥

**अन्वय** - यः अब्दिमान् उदीनमान् (पर्जन्यः) विद्युता (सह) रोदसी उक्षमाणः प्र इर्यति। स्तनयन्त, रुवन्त (मेघम्) जरितः ! (युष्माक) सुस्तुति नूनं प्र अश्याः।

**अनुवाद**- जो जलदायी, जलयुक्त (मेघ) विद्युत (के साथ) द्युलोक एव पृथिवीलोक को सिञ्चित करते हुये गमन करता है। गर्जन करते हुये, शब्दमान (मेघ) के पास हे स्तोताओ (तुम्हारी) शोभन स्तुति शीघ्र पहुँचे।

एष स्तोमो मारुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः।

कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः॥१५॥

**अन्वय**- (मया सम्पादिता) एषः स्तोमः रुद्रस्य युवन्यून् सूनून् मारुता शर्धः अच्छ उत् अश्याः। (मे मनः) कामः मा स्वस्ति राये हवते। (मन. !) प्रषदश्वान् (यज्ञम्) उप अयासः (देवान्) स्तुहि।

**अनुवाद**- (मेरे द्वारा सम्पादित) यह स्तोत्र रुद्र के तरुण पुत्र मरुतो के बल के पास भलीभाँति पहुँचे। (मेरे मन की) कामना मुझे कल्याणकारी धन के प्रति प्रेरित करती है। (हे मन!) विविधवर्णी अश्वयुक्त (यज्ञ) की ओर आते हुये (देवताओ) की स्तुति करो।

प्रैष स्तोमः पृथिवीमंतरिक्षं वनस्पँतीरोषधी राये अश्याः।

देवादेवः सुहवो भूतु मह्य मा नो माता पृथिवी दुर्मतौ धात्॥१६॥

**अन्वय**- राये (मे) एषः स्तोमः पृथिवीम्, अन्तरिक्षम्, वनस्पतीन् ओषधीः (च) प्र अश्याः। देवोदेवः मह्य सुहवः भूतु। माता पृथिवी दुर्मतौ नः मा धात्।

**अनुवाद**- धनार्थ (मेरा) यह स्तोत्र पृथिवी, अन्तरिक्ष, वनस्पतियो (एवम्) ओषधियो के पास पहुँचे। समस्त देवता मेरे लिये शोभन् आह्वान करने वाले हो। माता पृथिवी दुर्मति मे हमे न स्थापित करे।

उरौ देवा अनिबाधे स्याम॥१७॥

**अन्वय**- देवा ! (वयम्) अनिबाधे उरौ (सुखे) स्याम।

**अनुवाद**- हे देवता ! (हम) निरन्तर निर्विघ्न (सुख) मे रहे।

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम।

आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि॥१८॥

**अन्वय**- (वयम्) अश्विनोः नूतनेन मयोभुवा सुप्रनीती अवसा (च) सम् गमेम। अमृता ! (अश्विनौ !) (युवा) नः रयिम् आ वहतम्, वीरान् आ (वहतम्) विश्वानि उत सौभगानि आ (वहतम्)।

**अनुवाद**- (हम) अश्विनौ की नूतन सुखकर कृपा (और) रक्षा से सयुक्त हो। हे अमर ! (अश्विनौ !) (तुम) हमे धन प्रदान करो, पुत्र (प्रदान करो) और समस्त सौभाग्य (प्रदान करो)।

## सूक्त (४३)

***देवता***- विश्वेदेवाः, ***ऋषि***- भौमोऽत्रि, ***छन्द***- त्रिष्टुप्, १६ एकपदा विराट्

आ धेनवः पयसा तूर्ण्यर्था अमर्धतीरुप नो यंतु मध्वा।

महो राये बृहतीः सप्त विप्रो मयोभुवो जरिता जोहवीति॥१॥

**अन्वय** - तूण्यर्थाः धेनवः मध्वा पयसा अमर्धन्तीः नः उप आ यन्तु। महः रायेः विप्रः जरिता मयोभव. बृहती सप्त (नद्य) जोहवीति॥

**अनुवाद**- द्रुतगामिनी नदियाँ मधुर जल के साथ अहिंसित होती हुयी हमारे समीप आये। महान धन के लिये मेधावी स्तोता कल्याणकारिणी विशाल सात (नदियो) का आह्वान करे।

आ सुष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे।

पिता माता मधुवचाः सुहस्ता भरेभरे नो यशसावविष्टाम्।।२।।

**अन्वय**- (अह) राये (च) अमृधे द्यावा पृथिवी आ वर्तध्यै। मधुवचाः सुहस्ता यशसौ पिता माता (द्यावापृथिव्यौ) भरे भरे न. अविष्टाम्।

**अनुवाद** - (मैं) धन के लिये शोभनस्तुति (तथा) पृथिवी लोक को आवर्तित करने की इच्छा करता हूँ। प्रियवचन बोलने वाले, शोभन हाथो वाले यशस्वी, पालक, निमात्री (द्यावा-पृथिवी) प्रत्येक सग्राम मे हमारी रक्षा करे।

अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रम्।

होतेव नः प्रथमः पाह्यस्य देव मध्वो ररिमा ते मदाय।।३।।

**अन्वय**- अध्वर्यव· ! (यूय) मधूनि (सोमाज्यादीनि) चक्रवासः चारूशुक्र (च सोमम्) वायवे प्र भरत। देव! (वायो !) होता इव न· (अभिषुतस्य) अस्य (सोमस्य) (त्व) प्रथमः पाहि। ते मदाय (वय) मध्वः (सोम) रश्मि।

**अनुवाद**- हे अध्वर्युओ ! (तुम) मधुर (सोमाज्यादि) बनाते हुए सुन्दर दीप्ति (उस सोम) को वायु प्रदान करो। हे देव ! (वायो !) होता की भाँति हमारे द्वारा (अभिषुत) इस (सोम) का (तुम) सर्वप्रथम पान करो। तुम्हारे हर्ष के लिये (हम) मादक सोम देते है।

दश क्षिपो युंजते बाहू आद्र सोमस्य या शमितारा सुहस्ता।

मध्वो रसं सुगभस्तिर्गिरिष्ठां चनिश्चद्दुदुहे शुक्रमंशुः।।४।।

**अन्वय**- (सोमाभिषवे) (अध्वर्योः) दश-क्षिपः अद्रि युन्जन्ते। या सोमस्य शमितारा सुहस्ता बाहू (स्तः) (तौ) (अपि युञ्जेते) चनिश्चदत् गिरिस्थाम् अशुः शुक्र मध्व· (सोमम्) रस दुदुहे।

**अनुवाद**- (सोमाभिषव मे) (अध्वर्युओ की) दस उँगलियाँ प्रस्तर से सयुक्त होती हे। जो सोम को अभिषुत करने वाले शोभनहस्त युक्त भुजाये (हैं) (वे भी संयुक्त होती है)। शोभनहस्त वाले (अध्वर्यु) प्रसन्न होते हुए पर्वत स्थित व्याप्त, निर्मल, मधुर (सोम) रस का दोहन करते है।

असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय।

हरी रथे सुधुरा योगे अर्वागिंद्र प्रिया कृणुहि हूयमानः।।५।।

**अन्वय**- (इन्द्र !) (सोम) जुजुषाणाय ते क्रत्वे, दक्षाय, बृहते मदाय सोमः आसवि। इन्द्र ! हूयमानः (त्वम्) सुधुरा, प्रिया हरी रथे योगे अर्वाड् कृणुहि।

**अनुवाद**- (हे इन्द्र !) (सोम्) पानेच्छु तुम्हारे पराक्रम, बल महान मद के लिए सोम अभिषुत किया जाता है। हे इन्द्र ! आह्वाहित होते हुए (तुम) शोभन धुरियुक्त प्रिय अश्वो को रथ मे सयुक्त कर हमारे अभिमुख करो।

आ नो महीमरमतिं सजोषा ग्ना देवी नमसा रातहव्याम्।

मधोर्मदाय बृहतीमृतज्ञामाग्ने वह पथिभिर्देवयानैः॥६॥

**अन्वय**- महीम् अरमति, बृहतीम् , ऋतज्ञा नमसा रातहव्याम् ग्ना देवीम् अग्ने । सजोषाः (त्वम्) मधोः (सोमस्य) मदाय देवयानैः पथिभिः आ वह।

**अनुवाद**- महती, सर्वगामिनी, प्रवृद्धा, ऋत को जानने वाली, नमस्कार द्वारा प्राप्त हव्य वाली गमनशीला देवियो को हे अग्ने ! प्रीति युक्त होकर (तुम) मधुर (सोम) के मद के लिए देवगामी मार्ग से ले आओ।

अंजति यं प्रथयंतो न विप्रा वपावंतं नाग्निना तपंतः।

पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि॥७॥

**अन्वय**- वपावन्तम् (पशुम्) न अग्निना तपन्तः प्रथयन्तः न यम् (यज्ञकुण्ड) विप्रा· अध्वर्यव· अञ्जन्ति। उपसि प्रेष्ठ पुत्र पितु न (तत्) धर्म· ऋतयन् अग्निम् आ असादि।

**अनुवाद**- प्रवृद्ध (पशु) की भाँति अग्नि द्वारा तप्त मानो विस्तृत हुये जिस (यज्ञकुण्ड) की मेधावी (अध्वर्यु) स्तुति करते है, गोद मे बैठे पुत्र के पिता की भाँति (वह) कुण्ड यज्ञकामना से अग्नि को धारण करता है।

अच्छा मही बृहती शंतमा गीर्दूतो न गंत्वश्विना हुवध्यै।

मयोभुवा सरथा यातमर्वाग्गंतं निधिं धुरमाणिर्न नाभिम्॥८॥

**अन्वय** - अश्विना ! हुवध्यै मही बृहती शतमा (नः) गीः दूतः न (युवाम्) अच्छ गन्तु। गन्त (रथस्य। धुर नाभिम् आणिः न (महत्वपूर्णौ) मयोभुवा सरथा युवाम्(निधिम्)सोमम्(अर्वाक् आ यातम्।

**अनुवाद** - हे अश्विनौ ! आह्वान के लिए महान, विशाल सुखदायक (हमारी) स्तुति दूत की भाँति (तुम्हारे) समक्ष जाये। जाते हुए (रथ) की धुरी की नाभि की कील की भाँति (महत्वपूर्ण) सुखदायक, समान रथ वाले (तुम दोनो) निहित (सोम) के समक्ष आ जाओ।

प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि।

या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन्॥९॥

**अन्वय**- या (पूषावायू) राधसा मतीनां चोदितारा या वाजस्य त्मन् उत द्रविणेदौ (स्तः) तव्यसः तुरस्य पूषणः वायोः उत अह नमोक्ति प्र अदिक्षि।

**अनुवाद**- जो (पूषावायू) धन के लिये बुद्धि को प्ररित करने वाले जो बल अथवा स्वय धनप्रदाता (है) बलवान, वेगवान पूषण और वायु के लिए मै नमस्कारयुक्त वाणी उच्चरित करता हूँ।

आ नामभिर्मरुतो वक्षि विश्वाना रूपेभिर्जातवेदो हुवानः।

यज्ञं गिरो जरितुः सुष्टुति च विश्वे गंत मरुतो विश्व ऊती॥१०॥

**अन्वय**- जातवेदः ! (अग्ने !) हुवाः (त्वम्) (इन्द्रवरुणोयादिः) नामभिः, रूपेभिः विश्वान् (देवान् सह) आ वक्षि। मरुतः ! च विश्वे विश्वे (यूयम्) जरितुः सुस्तुति गिरः यज्ञम् उती (सह) आ गन्त।

**अनुवाद**- हे जातवेदस् ! (अग्ने!) आह्वाहित (तुम) (इन्द्रवरुणादि) नाम के विविध् वर्णी समस्त (देवताओ) को आह्वाहित करते हो। हे मरुतो ! समस्त (तुम) स्तोता की सुस्तुतियुक्त वाणी वाले यज्ञ मे रक्षा के (साथ) आओ।

आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गंतु यज्ञम्।

हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु॥११॥

**अन्वय**- अजता सरस्वती दिवः बृहतः (च) पर्वतात् नः यज्ञम् आ गन्तु। घृताची (सा) देवी नः हव जुजुषाणा (घृतम्) उशती (नः) शग्मा वाचं शृणोतु।

**अनुवाद**- यजनीया सरस्वती द्युलोक (एव) विशाल पर्वत से हमारे यज्ञ मे आये। घृतयुक्त (वह) देवी हमारे आह्वान से प्रसन्न होती हुयी (घृत) सिञ्चित करती हुयी हमारी हमारी वाणी को सुने।

आ वेधसं नीलपृष्ठं बृहंतं बृहस्पतिं सदने सादयध्वम्।

सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम॥१२॥

**अन्वय**- (ऋत्विजः !) यूयम् वेधसम्, नीलपृष्ठम्, बृहन्तम्, बृहस्पति (यज्ञ) सदने आ सादयध्वम्। दमे सादयद्योनिम् आदीदिवासम्, हिरण्यवर्णम्, अरूषं (त बृहस्पतिम्) सपेम।

**अनुवाद**- (हे ऋत्विजों !) (तुम) विविधकर्त्ता, स्निग्धाङ्ग विशाल वृहस्पति को (यज्ञ-) ग्रह मे स्थापित करो, यज्ञग्रह मे स्थपित, सर्वतः दीप्तिवान, स्वर्णिम-वर्ण वाले, तेजस्वी (उस बृहस्पति) की सेवा करो।

आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गंत्वोमभिर्हुवानः।

ग्नां वसान ओषधीरमृध्रस्त्रिधातुशृंगो वृषभो वयोधाः॥१३॥

**अन्वय**- धर्णसिः, बृहत् दिवः ग्नाः (ज्वालाः) ओषधीः (न) वसानः, त्रिधातुशृङ्गः (कामनानाम्) वृषभः, वयोधाः (अग्नि) हुवानः रराण. विश्वेभिः ओमभिः आ गन्तु।

**अनुवाद**- धरक, प्रभूतदीप्ति वाला, गमनशील (ज्वालाओ वाला) ओषधिः (रूप) वस्त्र वाला, त्रिवर्णी ज्वालाओ वाला, (कामना) सेचक, अन्नदाता (अग्नि) आहूत होने पर आनंदित होता हुआ समस्त रक्षणो के साथ आये।

मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पिरासो अग्मन्।
सुशेव्य नमसा रातहव्याः शिशुं मृजत्यायवो न वासे॥१४॥

**अन्वय**- आयो. रास्पिरास. विपन्यवः मातुः (पृथिव्याः) शुक्रे परमे पदे (उत्तरवेद्याम्) अग्मन्। वासे सम्मार्जितः शिशु न आयव. सुशेव्यम् (अग्निम्) नमसा मृजन्ति।

**अनुवाद**- मनुष्य के प्राप्तदान वाले स्तोता माता (प्रथिवी) के दीप्त परम स्थान (उत्तर वेदी) मे आये है। वस्त्र से (सम्मार्जित) शिशु की भाँति मनुष्य सुखकर (अग्नि) को नमस्कार द्वारा सम्मार्जित करते है।

बृहद्वयो बृहते तुभ्यमग्ने धियाजुरो मिथुनासः सचंत।
देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात्॥१५॥

**अन्वय**- अग्ने ! धियाजुरः (अवाम्) मिथुनासः बृहतं तुभ्यं बृहत् वयः सचन्त। देवोदेवः (अग्निः) मह्य सुहवः भूतु। माता पृथिवी न दुर्मतौ मा धात्।

**अनुवाद**- हे अग्ने ! कर्म से जीर्ण (हम) युगल (पति-पत्नी) विशाल तुम्हे प्रचुर अन्न प्रदान करते है। देवताओ का देव (अग्नि) मेरे लिये सरलता से आह्वान योग्य बने। माता पृथिवी हमे दुर्मति मे न लगाये।

उरौ देवा अनिबाधे स्याम॥१६॥

**अन्वय**- देवा ! (वयम्) उरौ अनिबाधे (सुखे) स्याम।

**अनुवाद**- हे देवताओ ! (हम) निरन्तर निर्विघ्न (सुख) मे रहे।

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि॥१७॥

**अन्वय**- (वयम्) अश्विनोः नूतनेन मयोभुवा सुप्रनीति अवसा (च) सम् गमेम्। अमृता ! (अश्विनौ !) (युवाम्) नः रयिम् आ वहत, वीरान् आ (वहतम्) विश्वानि उत सौभगानि आ (वहतम्)।

**अनुवाद**- (हम) अश्विनों की नूतन सुखकर कृपा (और) रक्षा से सयुक्त हो। हे अमर ! (अश्विनौ !) (तुम) हमे धन प्रदान करो, पुत्र (प्रदान करो) और समस्त सौभाग्य (प्रदान करो)।

## सूक्त - (४४)

***देवता***- विश्वेदेवा., ***ऋषि***- काश्यपोऽवत्सारः, ***छन्द***- जगती, १४, १५, त्रिष्टुप्।

तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम्।

प्रतीचीन वृजनं दोहसे गिराशु जयंतमनु यासु वर्धसे॥१॥

**अन्वय**- प्रत्नथा, पूर्वथा, इमथा, विश्वथा (स्तुतम्) ज्येष्ठतातिम्, बर्हसदम्, प्रतीचीनम्, बृजनम्, आशुम्, जयन्तम् तम् (इन्द्रम्) (हे अन्तरात्मन् !) यासु (सः) वर्धसे (तासु) गिरा दोहसे।

**अनुवाद** - प्रचीन, पूर्वज, वर्तमान सभी द्वारा (स्तुत) सबमे ज्येष्ठ, यज्ञस्थ, सुख के ज्ञाता, सनातन, बलवान, शीघ्रता से जीतने वाले उस (इन्द्र) की (हे अन्तरात्मन् !) जिससे (वह) बढे (उस) वाणी से कामना पूर्ण करो।

श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते।

सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते॥२॥

**अन्वय**- इन्द्र ! स्व· विरोचमानः (त्व) अचोदते उपरस्य याः सुदृशीः (आपः सन्ति) (तासा) प्राणिना श्रिये (सर्वासा) ककुभाम् (प्रसरति)। सुक्रतो ! सुगोपाः (त्वम्) (प्राणिनां) दभाय न असि। मायभि· परः ते नाम ऋते (लोके) आस।

**अनुवाद**- (हे इन्द्र !) द्युलोक मे दीप्त होते हुये (तुम) प्रेरक मेघ का जो कान्तियुक्त (जल है) (उसे) प्राणियो के कल्याण के लिए (समस्त) दिशाओ मे (प्रसृत करते हो)। हे शोभनकर्मा ! सुष्ठुरक्षक (तुम) (प्राणियो की) हिसा के लिए नही हो। माया से परे तुम्हारा नाम सत्य (लोक) मे विद्यमान है।

अत्यं हविः सचते सच्च धातु चारिष्टगातुः स होता सहोभरि :।

प्रसर्स्राणो अनु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः॥३॥

**अन्वय**- सत् धातु, अरिष्टगातुः, सहोभरिः बर्हिः अनु प्रसर्स्राण, वृषा, अजरः, शिशु युवा विस्रुहाचमध्ये हितः होता सः (अग्नि·) अत्य हविः सचते।

**अनुवाद**- सत्यधारक, अहिंसित गमन वाल, बलप्रदाता, यज्ञ से प्रसृत होने वाला, बलवान जरारहित, शिशु, युवा एव समस्त औषधियो के मध्य स्थित होता वह (अग्नि) सतत आने वाली हवि को प्राप्त करता है।

प्र वं एते सुयुजो यामन्निष्टये नीचीरमुष्मै यम्य ऋतावृधः।

सुयंतुभिः सर्वशासैरभीशुभिः क्रिविर्नामानि प्रवणे मुषायति॥४॥

**अन्वय**- व· (आदित्यस्य) एते (रश्मयः) सुयुजः इष्टये (यज्ञे) यामन् नीचीः (गच्छन्ती) अमुष्मै (ऐश्वर्यम्) यम्यः ऋतवृधः (सन्ति)। क्रिविः (अयमादित्यः) सुयन्तुभि सर्वशासैः अभीशुभिः प्रवणे नामानि मुषायति।

**अनुवाद**- इस (आदित्य) की ये (किरणें) सुसयुक्त कामनापूर्ति के लिए यज्ञगामिनी, नीचे (जाने वाली) यज्ञकर्ता को (येश्वर्य) प्रदान करने वाली, यज्ञ को प्रवृद्ध करने वाली है। कर्ता (यह आदित्य) शोभन गमन वाली, सब पर शासन करने वाली किरणो से निम्न प्रदेश के जल को चुराता है।

संजर्भुराणस्तरुभिः सुतेगृभं वयाकिनं चित्तगर्भासु सुस्वरुः।

धारवाकेष्वृजुगाथ शोभसे वर्धस्व पत्नीरभि जीवो अध्वरे।।५।।

**अन्वय**- ऋजुगाथ ! (अग्ने !) (त्वम्) तरुभिः संजर्भुराणः, वयाकिन सुतेगृभ चित्तगर्भासु सुस्वारुः (असि) (त्वम्) धारवाकेषु शोभसे। (अग्ने !) अध्वरे जीवः (त्वम्) पत्नी (ज्वालाः) अभि वर्धस्व।

**अनुवाद**- हे शोभनस्तुतिवाले ! (अग्ने !) (तुम) समिधा से प्रदीप्त होते हुए लतावर्ती सोम ग्रहण करते हुए हृदय रूपी गुहा मे विचरण। करने वाले हो। (तुम) स्तुति करने वालो मे शोभित होते हो। (हे अग्ने !) यज्ञ मे जीवनदाता (तुम) पत्नीरूप (ज्वालाओ) को प्रवृद्ध करो।

यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रयाप्स्वा।

महीमस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरमनपच्युतं सहः।।६।।

**अन्वय**- (एषा वैश्वेदेवी) यादृक् ददृशे तादृक् एव उच्यसे। स्रिधया छायया (सह) अप्सु आ (स्वीय रूप) सम् दधिरे। (वैश्वेदेवी ) अस्मभ्य महीम् उरुषां (रयिम्) उरू ज्रयः, बृहत् सुवीरं सहः (च) अनुपच्युतम्।

**अनुवाद**- (यह वैश्वेदेवी) जिस प्रकार दिखती है उसी प्रकार ही कही जाती है। साधिका छाया (के साथ) जल मे (अपने रूप को) भलीभाँति धारण करती है। (वैश्वेदवी) हमे पूज्य, बहुदायक (धन) प्रभूत वेग, बहुत से शोभन पुत्र (और) बल प्रदान करे।

वेत्यग्रुर्जनिवान्वा अति स्पृधः समर्यता मनसा सूर्यः कविः।

घ्रंसं रक्षंतं परि विश्वतो गयमस्माकं शर्म वनवत्स्वावसुः।।७।।

**अन्वय**- अग्रुः जनिवान्, कविः, सूर्यः, समर्यता मनसा स्पृधः (असुरान्) वै अतिवेति। घ्रस गय विश्वतः रक्षन्त (सूर्य वय परिचरेम)। स्ववसुः (सः) अस्माकं शर्म परि वनवत्।

**अनुवाद**- अग्रगामी, उत्पन्न करने वाल, क्रान्तदर्शी सूर्य समरेच्छुक मन से सग्राम मे (असुरो का) अतिक्रमण करता है। दीप्त अन्तरिक्ष की सब ओर से रक्षा करने वाले (सूर्य की हम परिचर्या करे)। श्रेष्ठ धनयुक्त (वह) हमे सर्वतः सुख प्रदान करे।

ज्यायांसमस्य यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते।

यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत्।।८।।

**अन्वय**- यासु ते नाम (अस्ति) (तैः स्तुत्यैः) अस्य यतुनस्य (सूर्यस्य) ज्यायासम् ऋषिस्वरं चरित। (ऋष्यः) यादृश्मिन् धायि तम् अपस्यया विदत्। यः उं (कर्म) अर करत् सः स्वयं (फलम्) वहते।

**अनुवाद**- जिसमे तुम्हारा नाम (है) (उस स्तुतियो द्वारा) इस गमनशील (सूर्य) की प्रवृद्ध ऋषि की वाणी सेवा करती है। (ऋषिगण) जो मन मे धारण करते है उसे कर्म से प्राप्त करते है। जो (कर्म) भलीभाँति करता है (वह) स्वय (फल) प्राप्त करता है।

समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता।
अत्रा न हार्दि क्रवणस्य रेजते यत्रा मतिर्विद्यते पूतबंधनी॥९॥

**अन्वय**- आसा (स्तुतीनाम्) अग्रिमा (अस्मदीयास्तुतिः) समुद्रम् (पर्यन्तम) अव तस्थे। यस्मिन् (यज्ञे) (स्तोत्राणाम्) आयता (क्रयते) (तत्) सवन (सूर्यः) न रिष्यति। यत्र पूतबन्धनी मतिः विद्यते (एतावत्) अत्र (यज्ञगृहे) क्रवणस्य हार्दि (कामना) न रेजते।

**अनुवाद**- इन (स्तुतियो) मे अतिश्रेष्ठ हमारी स्तुति समुद्र (पर्यन्त) अवस्थित होती है। जिस (यज्ञ) मे (स्तोत्रो का) विस्तार (होता है) (उस) यज्ञगृह मे (सूर्य) हिसा नहीं करता। जहाँ सूर्य-द्योतक बुद्धि है (ऐसे) इस (यज्ञगृह) मे स्तोता की हार्दिक (कामना) विचलित नही होती।

स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः।
अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यम्॥१०॥

**अन्वय**- स· हि (सविता सर्वैः स्तुत्यः अस्ति)। क्षत्रस्य, मनस्य, एवावदस्य, यजतस्य सध्रेः अवत्सारस्य रण्वाभिः चित्तिभि· शविष्ठ, वाज विदुषा चित् अर्ध्यम् (सवितार) स्पृणवाम।

**अनुवाद**- वह (सविता सबके द्वारा स्तुत्य है)। क्षत्र, मनस्, एवावद, यजत, सध्रि, अवत्सार की रमणीय स्तुतियो द्वारा बलवान, अन्नदायक विद्वानो द्वारा पूज्य (सविता) की कामना की जाती है।

श्येन आसामदितिः कक्ष्योऽमदो विश्ववारस्य यजतस्य मायिनः।
समन्यमन्यमर्थयन्त्येतवे विदुर्विषाणं परिपानमन्ति ते॥११॥

**अन्वय**- विश्वावारस्य, यजतस्य, मायिनः (ऋषीणाम्) आसा मदः श्येनः अदिति· कक्ष्यः (पूरक· अस्ति)। (विश्वावारादयः ऋषयः) (सोमम्) एतवे अन्यमन्य सम् अर्थयन्ति। ते (च) विषाण परिपानम् (सोमम्) अन्ति विदु·।

**अनुवाद**- विश्वावार, यजत, मायि (ऋषियों) का सोम का मद गमनशील, अतिसमृद्ध, हृदय (पूरक है)। (विश्वावारादि ऋषि) (सोम) प्राप्ति के लिये परस्पर याचना करते है (और) वे विशेष मादक पेय (सोम) को समीप से जानते है।

सदापृणो यजतो वि द्विषो वधीदबवाहुवृक्तः श्रुतवित्तर्यो वः सचा।

उभा स वरा प्रत्येति भाति च यदीं गणं भजते सुप्रयावभिः॥१२॥

**अन्वय**- यत् ईम् (देव-) गण सुप्रयावभिः यजते (ते) सदापृणः यजतः बहुवृक्तः श्रुतवित् तर्यः (ऋषयः) वः (देवैः) सचा द्विषः वि वर्धात्। सः (ऋषि) वरा उभा (इहलोक परलोकौ) प्रति एति भाति च।

**अनुवाद**- जो इस (देव-) गण की उत्तम स्तुति से उपासना करते है (वे) सदापृण, यजत, बहुवृक्त, श्रुतवित्, तर्य, (ऋषि) तुम (देवो) के साथ द्वेषियो का वध करते है। वह (ऋषि) वरणीय दोनो (इहलोक - परलोक) मे गमन करता है और प्रकाशित होता है।

सुतंभरो यजमानस्य सत्पतिर्विश्वासामूधः स धियामुदंचनः।

भरद्धेनू रसवच्छिश्रिये पयोऽनुब्रुवाणो अध्येति न स्वपन्॥१३॥

**अन्वय**- यजमानस्य (अवत्सारस्य) (यज्ञे) सतुभरः सत्पतिः (भवति) सः विश्वासाम् धियाम् ऊधः उदञ्चनः (च) (अस्ति)। धेनु (यज्ञाय) रसवत् पयः शिश्रिये भरत् (च)। अनुब्रवाणः (एन) अधि एति स्वपन् न।

**अनुवाद**- यजमान (अवत्सार) के (यज्ञ मे) सुतभर सत्पति (होता है)। वह समस्त कर्मो का स्रोत (और) प्रकट करने वाला है गाय (यज्ञ के लिये) रसयुक्त दुग्ध धारण करती है (और) वितरित करती है। स्तुति करने वाला (इसे) प्राप्त करता है सोता हुआ नही।

यो जागार तमृचः कामयंते यो जागार तमु सामानि यंति।

यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥१४॥

**अन्वय**- यः (देवः) जगार तम् ऋचः कामयन्ते। यः जगार तं सामानि यन्ति। यः जगार तम् अय सोमः आह (अग्ने !) तव सख्ये अह न्योकाः अस्मि।

**अनुवाद**- जो (देवता) जागृत है उसकी ऋचाये कामना करती है। जो जागृत है उसे साम प्राप्त करते हैं। जो जाग्रत है उससे यह सोम कहता है- '(हे अग्ने !) तुम्हारी मित्रता के लिये मै नियतस्थान पर हूँ। '

अग्निर्जागार तमृचः कामयंतेऽग्निर्जागार तमु सामानि यति।

अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥१५॥

**अन्वय**- अग्निः जागार (अतः) ऋचः तम् कामयन्ते। अग्निः जगार (अतः) सामानि तम् आह तव सख्ये अह न्योकाः अस्मि।

**अनुवाद**- अग्नि जागृत होता है (अतः) ऋचाये उसकी कामना करती हैं। अग्नि जागृत होता है (अतः) साम उसे प्राप्त करते हैं। अग्नि जागृत होता है। यह सोम उससे कहता है - तुम्हारी मित्रता के लिये मै नियतस्थान पर हूँ।

## सूक्त (४५)

***देवता***- विश्वेदेवा., ***ऋषि***- सदापृणात्रेय., ***छन्द***- त्रिष्टुप्

विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः।

अपावृत व्रजिनीरुत्स्वर्गाद्वि दुरो मानुषीर्देव आवः॥१॥

मन्त्र (१) **अन्वय**- (अङ्गिरसां) उक्थैः विदाः (इन्द्रः) दिवः अद्रि विस्यन् आयत्या. उषसः अर्चिन गुः। (तम.) व्रजिनी (निशा) अप अवृत। स्व· (सूर्यः) उत् गात्। (सः) देव मानुषीः दुरः वि आवरित्याव।

**अनुवाद**- (अङ्गिराओ की) स्तुतियो से ज्ञापित (इन्द्र) ने द्युलोक से वज्र फेका। आगमनकारिणी उषा की किरणे फैल गयी। (अन्धकार की) पुञ्जीभूत (रात्रि) दूर हो गयी। सरणशील (सूर्य) उदित हुआ। (उस) देवता ने मनुष्यो के द्वार को व्यावृत किया।

वि सूर्यो अमतिं न श्रियं सादोर्वाद्गवां माता जानती गात्।

धन्वर्णसो नद्य१ः खादोअर्णाः स्थूणेव सुमिता दृंहत द्यौः॥२॥

**अन्वय**- अमति न सूर्यः श्रिय वि सात् गवा माता (कर्त्तव्यम्) जानती (उषा) उर्वात् (अन्तरिक्षात्) आ गात्। धन्वर्णस नद्य खादो अर्णा (वहन्ति) द्यौः सुमिता स्थूणा इव दहृत।

**अनुवाद**- द्रव्य की भाँति सूर्य कान्ति को धारण करता है। किरणों की माता (कर्त्तव्य को) जानने वाली (उषा) विशाल अन्तरिक्ष से आती है। गमनशीला जलयुक्त नदियाँ किनारे तक भरकर (बहती है)। द्युलोक सुष्ठुस्थापित खम्भे की भाँति दृढ होता है।

अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय।

वि पर्वतो जिहीत साधत द्यौराविवासंतो दसयंत भूम॥३॥

**अन्वय**- अस्मै पूर्व्याय उक्थाय महीना जनुषे पर्वतस्य गर्भः (जलम्) वि जिहीत। पर्वतः (वि जिहीत) द्यौः (वृष्टिम्) साधत आविवासन्त· (आङ्गिरसः) (आत्मानं कर्मभि.) भूम दसयन्त।

**अनुवाद**- यह पूर्व स्तोत्र से पृथिवी की उत्पादकता के लिए पर्वत गर्भस्थ (जल) गिरता है। मेघ चलायमान होता है (द्युलोक) (वृष्टि) करता है। सर्वत्र परिचरण करने वाले (आङ्गिरस) (अपने कर्म मे) महत् रूप से लग जाते है।

सूक्तेभिर्वो वचोभिर्देवजुष्टैरिंद्रा न्व१ग्नी अवसे हुवध्यै।

उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासंतो मरुतो यजंति॥४॥

**अन्वय-** इन्द्रा ! अग्नी ! (अहम्) व· देवजुष्टैः सूक्तेभिः वचोभि· अवसे नु हुवध्यै। हि कवय· सुयज्ञा मरुतः उक्थेभि अविवासन्त (युवाम्) यजन्ति स्म।

**अनुवाद-** हे इन्द्र! अग्ने ! (मैं) तुम दोनो को देवताओ द्वारा सेवनीय सूक्त वाणी से रक्षा के लिए शीघ्र बुलाता हूँ। क्योंकि कान्तप्रज्ञ शोभनयज्ञ वाले मरुतो ने स्तोत्र द्वारा परिचर्या करते हुए (तुम्हारा) यजन किया था।

एतो न्वद्य सुध्यो३भवाम प्र दुच्छुना मिनवामा वरीयः।
आरे द्वेषांसि सनुतर्दधामायाम प्राञ्चो यजमानमच्छ॥५॥

**अन्वय-** (देवा !) अद्य नु एतो। (वयम्) सुध्यः भवाम। वरीयः दुच्छुनाः प्र मिनवाम। सुनुतः द्वेषांसि आरे दधाम। प्राञ्च· (वयम्) यजमानम् अच्छ अयाम।

**अनुवाद-** (हे देवो !) आज शीघ्र आओ। (हम) शोभनकर्मा हो। अत्यन्त द्वेषी प्रहिंसित हो। सम्भक्त द्वेषी दूर स्थापित हो। प्रोन्नत (हम) यजमान के अभिमुख गमन करे।

एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः।
यया मनुर्विशिशिप्रं जिगाय यया वणिग्वंकुरापा पुरीषम्॥६॥

**अन्वय-** सखाय· एता। या (धिया) माता (पणिभिः) व्रजम् गोः अप ऋणुत। यया मनुः विशिशिप्रम् (शत्रुम्) जिगाय। याया (धिया) वणिक् (इव अल्पेन कर्मणा बहुफलाकांक्षी कक्षीवान्) (जलेच्छया) वङ्कुः (भूत्वा) पुरीषम् (जलम्) आप (ता) धियम् (वय) कृणवाम।

**अनुवाद-** हे मित्रो ! आओ। जिस (स्तुति) से माता ने (पणियो द्वारा) आपहृत गायो को मुक्त किया। जिससे मनु ने विगतहनु (शत्रु) को जीता जिस (स्तुति) से वणिक् (की भाँति अल्प कर्म से बहुफलाकांक्षी कक्षीवान्) ने (जल की इच्छा से) वनगामी (होकर) पूरक (जल) को प्राप्त किया उस (स्तुति) को (हम) करें।

अनूनोदत्र हस्तयतो अद्रिराचन्येन दश मासो नवग्वाः।
ऋतं यती सरमा गा अविंदद्विश्वानि सत्याङ्गिराश्चकार॥७॥

**अन्वय-** अत्र (यज्ञे) हस्तयतः अद्रिः अनूनोत् येन नवग्वाः (आङ्गिरसः) दशमासः आर्चन। ऋतम् (च) यती सरमा गौः अविन्दत् अङ्गिराः विश्वानि (स्तुत्यानि) सत्या चकार।

**अनुवाद-** इस (यज्ञ) में हस्त संयोजन से प्रस्तर शब्दित होता है जिससे नवग्वु (अङ्गिराओ) ने दशमास पर्यन्त पूजा की। और यज्ञ को प्राप्त करती सरमा ने गायो को ढूँढा। अङ्गिराओ ने समस्त (स्तुतियो) को सत्य कर दिया।

विश्वे अस्या व्युषि माहिनायाः सं यद्गोभिरङ्गिरसो नवंत।

उत्सं आसां परमे सधस्थं ऋतस्य पथा सरमा विद्दगाः॥८॥

**अन्वय**- महिनायाः अस्याः (उषसः) व्युषि विश्वे अङ्गिरसः गोभिः सम् नवन्त। (तदा) परमे सधस्थे आसाम् (गवाम्) उत्स (स्राव· अभवत्)। ऋतस्य च पथाः सरमा गाः विदत्।

**अनुवाद**- महनीय इस (उषा) के उदित होने पर जब समस्त अङ्गिरा गायो से सयुक्त हुए (तब) सहस्थानवर्ती इन (गायों) का (दुग्धस्राव हुआ) और सत्यपथवाली सरमा ने गायों को प्राप्त किया।

आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे।

रघुः श्येनः पतयदंधो अच्छा युवा कविर्दीदयद्गोषु गच्छन्॥९॥

**अन्वय**- सप्ताश्वः सूर्यः (नः) आ यातु यत् (इदम्) उर्विया क्षत्रम् (सूर्यस्य) दीर्घयाथे (अस्ति)। श्येनः (इव) रघुः (गमनः) (सूर्यः) अन्धः (हविः) अच्छ पतयत् युवा कविः (सूर्यः) गोषु गच्छन् दीदयत्।

**अनुवाद**- सप्ताश्व सूर्य (हमारे) समक्ष आये क्योंकि (यह) विशाल क्षेत्र (सूर्य के) दीर्घप्रवास के लिये (है)। श्येन की (भाँति) तीव्र (-गामी) (सूर्य) प्रदत्त (हवि) के अभिमुख आता है। तरूण क्रान्तदर्शिन् (सूर्य) किरणो के मध्य प्रकाशित होता है।

आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्वरितो वीतपृष्ठाः।

उद्न न नावमनयंत धीरा आशृण्वतीरापो अर्वागतिष्ठन्॥१०॥

**अन्वय**- यत् वीतपृष्ठाः हरितः (रथम्) अयुक्त सूर्यः शुक्रम् अर्णः आ अरूहत् (तदा) उद्ना (स्थितम्) नाव न (सूर्यम्) धीरा अनयन्त। (स्तुतिम्) अशृण्वतीः आपः च अर्वाक् अतिष्ठन्।

**अनुवाद**- जब कान्तपृष्ठाश्वों को (रथ में) सयुक्तकर सूर्य दीप्त जल पर चढ़ा (तब) जल मे (स्थित) नाव की भँति (सूर्य) को धैर्यशालियो ने निकाला और (स्तुति को) सुनता हुआ जल निम्नस्थ हो गया।

धियं वो अप्सु दधिषे स्वर्षां ययातरन्दश मासो नवग्वाः।

अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः॥११॥

**अन्वय**- (देवा !) यया नवग्वा· दश-मासः अतरन् वः अप्सु स्वर्षाम् (ताम्) धियं दधिषे। अया धिया (वयम्) देवगोपाः स्याम। अया धिया (वयम्) अहः अति ततुर्याम।

**अनुवाद**- (हे देवो !) जिसके द्वारा नवग्वो ने दस मास तक अनुष्ठान किया था। हम जल के लिये सर्वदात्री (उस) स्तुति को धारण करे। इस स्तुति से (हम) देवों द्वारा रक्षणीय हो जाये। इस स्तुति से (हम) पाप का अतिक्रमण करे।

## सूक्त - (४६)

**देवता**- १-६ विश्वेदेवाः, ७, ८, देवपत्न्य, **ऋषि**- प्रतिक्षत्रात्रेय, **छन्द**- जगती, २, ८, त्रिष्टुप्।

हयो न विद्वाँ अयुजि स्वय धुरि तां वहामि प्रतरणीमवस्युवम्।
नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति॥१॥

**अन्वय**- (शकटे युक्तः) हयः न विद्वान् (यज्ञात्मिका) धुरि स्वयम् अयुजि। (अहम्) प्रतरणीम् अवस्युम् ताम् (धुरम्) वहामि। अस्या· (धुरः) विमुचं न वश्मि न (एव) पुन· आवृतम् (वश्मि)। विद्वान् (देवः) पुरएत (सन्) ऋजुः पथ· नेषति।

**अनुवाद**- (शकट मे युक्त) अश्व की भाँति विद्वान (यज्ञात्मिका) धुरि मे स्वयं को नियोजित करता है। (मैं) प्रतारयित्री रक्षयित्री उस (धुरा) को धारण करता हूँ॥ इस (धुरा) को छोडना नहीं चाहता न (ही) पुन· धारण (करना चाहता हूँ)। विद्वान (देव) आगे जाते हुए सरल मार्ग से ले जाता है।

अग्न इंद्र वरुण मित्र देवाः शर्धः प्र यंत मारुतोत विष्णो।
उभा नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषंत॥२॥

**अन्वय**- अग्ने ! इन्द्र ! वरुण ! मित्र ! मरुत ! विष्णो ! देवो ! उत (नः) शर्धः प्र यन्त। नासत्या उभा (अश्विनौ) रुद्रः ग्नाः पूषा भगः सरस्वती (अस्मदीयम् स्तुतिम्) जुषन्त।

**अनुवाद**- हे अग्ने ! इन्द्र ! वरुण ! देवो ! (तुम सब) (हमें) बल प्रदान करों। सत्यभूत दोनो (अश्विनौ) रुद्र, देवपत्नियाँ, पूषा, भग, सरस्वती (हमारी स्तुति का) सेवन करें।

इंद्राग्नी मित्रावरुणादितिं स्वः पृथिवीं द्यां मरुतः पर्वतौँ अपः।
हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शंसं सवितारमूतये॥३॥

**अन्वय**- (अहम्) ऊतये इन्द्राग्नी, मित्रावरुणा, अदितिम्, स्वः, पृथिवीम्, द्याम्, मरुतः, पर्वतान्, अपः, विष्णुम्, पूषणम्, बृहस्पतिम् नु शस सवितार (च) हुवे।

**अनुवाद**- (मैं) रक्षा के लिए इन्द्राग्नी, मित्रावरुणौ, अदिति, आदित्य, पृथिवी, द्युलोक, पर्वत, जल, विष्णु, पूषन, ब्रह्मणस्पति एव प्रशसनीय सविता का आह्वान करता हूँ।

उत नो विष्णुरुत वातो अस्रिधो द्रविणोदा उत सोमो मयस्करत्।
उत ऋभव उत राये नो अश्विनोत त्वष्टोत विभ्वानु मंसते॥४॥

**अन्वय**- विष्णुः उत अस्रिधः वातः उत द्रविणोदाः सोमः न· मयस्करत्। उत ऋभवः उत अश्विना उत त्वष्टा उत विभ्वा नः राये अनु मसते।

**अनुवाद**- विष्णु और अहिंसित वायु और धनप्रदाता सोम हमे सुख प्रदान करे। और ऋभुगण और अश्विनी ओर त्वष्टा और विभु हमे धन प्रदान करने के लिए स्वीकृति दे।

उत त्यन्नो मारुतं शर्ध आ गमद्दिविक्षयं यजत बर्हिरासदे।

बृहस्पतिः शर्म पूषोत नो यमद्वरूथ्यं१ वरुणो मित्रो अर्यमा॥५॥

**अन्वय**- दिविक्षयम् उत यजत त्यत् मारूतं शर्धः बर्हिः आसदे नः (यज्ञे) आ गमत्। बृहस्पतिः पूषा, मित्रः, वरुणः, अर्यमा उत नः शर्म यमत्।

**अनुवाद**- द्युलोक मे यजनीय मरुतों का समूह बर्हि पर बैठने के लिए हमारे (यज्ञ) में आये। बृहस्पति, पूषा, मित्र, वरुण और अर्यमा हमे सुख प्रदान करे।

उत त्ये नः पर्वतासः सुशस्तयः सुदीतयो नद्य१स्त्रामणे भुवन्।

भगो विभक्ता शवसावसा गमदुरुव्यचा अदितिः श्रोतु मे हवम्॥६॥

**अन्वय**- सुशस्तयः त्ये पर्वतासः सुदीप्तयः उत नद्यः नः त्रामणे भुवन्। (धनानाम्) विभक्ता भगः शवसा अवसा आ गमत्। उरूव्याचा अदितिः मे हव श्रोतु।

**अनुवाद**- शोभनस्तुत्य ये पर्वत और सुदीप्त नदियाँ हमारी रक्षा के लिये हो। (धन) विभजक भग अन्न, रक्षा के साथ आये। बहुव्याप्त अदिति मेरा आह्वान सुने।

देवाना पत्नीरुशतीरवतु नः प्रावंतु नस्तुजये वाजसातये।

याः पार्थिवासो या अपामपि व्रते ता नो देवीः सुहवाः शर्म यच्छत॥७॥

**अन्वय**- देवाना पत्नी (स्तुतिम्) उशतीः नः अवन्तु। तुजये वाजसातये नः प्र अवन्तु। याः पार्थिवासः याः अपि अपाम् व्रते (अन्तरिक्षे सन्ति) सुहवा ताः देवीः नः शर्म यच्छत्।

**अनुवाद**- देवताओ की पत्नियाँ (स्तुति की) कामना करती हुयी हमारी रक्षा करे। पुत्र एव अन्नप्राप्ति के लिये हमारी रक्षा करे। जो पृथिवी एव जल के स्थान (अन्तरिक्ष) पर (हैं) शोभनआह्वनीया वे देवियाँ हमें सुख प्रदान करें।

उत ग्ना व्यन्तु देवपत्नीरिंद्राण्य१ग्नाय्यश्विनी राट्।

आ रोदसी वरुणानी शृणोतु व्यंतु देवीर्य ऋतुर्जनीनाम्॥८॥

**अन्वय**- ग्नाः देवपत्नीः इन्द्राणी अग्नायी राट् अश्विनी उत (नः) (हविः) व्यन्तु। रोदसी वरुणानी (नः स्तुतिम्) आ शृणोतु। यः जनीनाम् ऋतुः (तदाभिमानिनी) देवीः (अस्ति) (सा) (न. हविः) वयन्तु।

**अनुवाद**- देवियाँ, देवपत्नियाँ, इन्द्राणी, अग्निपत्नी और समर्थ अश्विनी (हमारी हवि का) भक्षण करें। द्युलोक एव पृथिवीलोक, वरुण-पत्नी (हमारी स्तुति को) भलीभाँति सुने। जो देवयजन की काल-(-अभिमानिनी) देवी (है) (वह) (हमारी हवि का) भक्षण करे।

## सूक्त - (४७)

***देवता***- विश्वेदेवा:, ***ऋषि***- प्रतिरथात्रेय, ***छन्द***- त्रिष्टुप्।

प्रयुंजती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयंती।
आविवासंती युवतिर्मनीषा पितृभ्य आ सदने जोहुवाना॥१॥

मन्त्र (१) **अन्वय**- मही माता (उषा) ब्रुवाणा दुहितुः (भूम्याः) बोधयन्ती, (प्राणिनः) (कर्मसु) प्रयुञ्जन्ती दिवः एति। युवतिः मनीषा (उषा) पितृभ्यः (देवैः सह) आ जोहुवाना (यज्ञ) सदने आ विवासन्ती।

**अनुवाद**- महती माता (उषा) स्तुत होती हुयी (पृथिवी) को जाग्रत करती हुयी (प्राणियो को) (कर्म मे) लगाती हुयी द्युलोक से आती है। तरूणी स्तुतिमती (उषा) पालक (देवों के साथ) सर्वतः आहूत होती हुयी (यज्ञ) गृह मे आगमन करती है।

अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम्।
अनंतास उरवो विश्वतः सीं परि द्यावापृथिवी यंति पथाः॥२॥

**अन्वय**- अजिरासः पन्थाः (रश्मयः) तत् (प्रकाशरूपं) अपः ईयमानाः अमृतस्तय (सूर्यस्य) नाभिं तस्थिवांसः. अनन्तासः उरवः द्यावापृथिवी सीम् विश्वतः परि यन्ति।

**अनुवाद**- गमनशीला पथदर्शिका (किरणें) उस (प्रकाशरूपे) कर्म मे प्रेरित करती हुयी अमर (सूर्य) की नाभि मे स्थित होती हुयी अनन्त व्यापक द्युलोक एवं पृथिवी के चारो ओर घूमती हैं।

उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश।
मध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यंतौ॥३॥

**अन्वय**- (कामनानाम्) उक्षः (देवानां) समुद्र अरूषः सुपर्णः (सूर्यः) पितु (अन्तरिक्षस्य) पूर्वस्य योनि आ विवेश। पृश्निः अश्मा (सूर्यः) दिवः मध्ये निहितः (सन) चक्रमे रजसः (उभौ) अन्तौ पाति।

**अनुवाद**- (कामनाओ का) सेचक (देवो का) आह्लादक दीप्तिवान गमनशील (सूर्य) पालक (अन्तरिक्ष) के पूर्व स्थान मे प्रविष्ट होता है। विविधवर्णी सर्वव्यापक (सूर्य) द्युलोक के मध्य मे स्थित (होकर) घूमता है (और) अन्तरिक्ष के (दोनो) पूर्वापर भागो की रक्षा करता है।

चत्वार ईं बिभ्रति क्षेमयंतो दश गर्भं चरसे धापयंते।
त्रिधातवः परमा अस्य गावो दिवश्चरंति परि सद्यो अंतान्॥४॥

**अन्वय**- चत्वारः (ऋत्विजः) क्षेमयन्तः ईम् (सूर्यं) बिभ्रति। गर्भम् (इव उत्पादकं) दश (दिशः) चरसे धापयन्ते। अस्य (सूर्यस्य) त्रिधातवः परमाः गावः सद्यः दिवः अन्तान् परि चरन्ति।

**अनुवाद**- चार (ऋत्विज) कल्याण की इच्छा करते हुए इस (सूर्य) को धारण करते है। गर्भ (की भाँति उत्पादक) दश (दिशायें) चलने के लिए गमन करतीं हैं। इस (सूर्य) की त्रिविध उत्कृष्ट किरणे शीघ्र द्युलोक के अन्त मे परिभ्रमण करतीं है।

इदं वपुर्निवचनं जनासश्चरंति यन्नद्यस्तस्थुरापः।
द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्याऽसबंधू॥५॥

**अन्वय**- जनाना! इद वपुः निवचनम् (अस्ति)। यत् नद्यः चरन्ति आपः (च) तस्थुः। मातुः (अन्तरिक्षात्) इहेह अन्ये जाते ईम् (सूर्यम्) सबन्धू द्वे (अहोरात्रे) बिभृतः।

**अनुवाद**- हे लोगो! यह शरीर स्तुत्य (है)। इससे नदियाँ प्रवाहित होती हैं (और) जल स्थिर होता है। माता (अन्तरिक्ष) से यही पृथक् उत्पन्न इस (सूर्य) को नियामक सबन्धु दो (दिनरात) धारण करते हैं।

वि तन्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयंति।
उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यंत्यच्छ॥६॥

**अन्वय**- यथा मातरः पुत्राय वस्त्रा वयन्ति (तथा) अस्मै (सूर्याय) धियः (यज्ञ-) अपांसि (च) वि तन्वते। वृषणः (सूर्यस्य) उपप्रक्षे वध्वः (रश्मयः) मोदमानाः (अस्मद्) अच्छ दिवः पथा (आ) यन्ति।

**अनुवाद**- जिस प्रकार माता पुत्र के लिए वस्त्र बुनती है (उसी प्रकार) इस (सूर्य) के लिए स्तुति (और) (यज्ञ-) कर्म विस्तारित होता है। बलवान (सूर्य) के सम्पर्क मे वधु (किरणें) हर्षित होती हुयी (हमारे) अभिमुख द्युलोक से (आती) है।

तदस्तु मित्रावरुणा तदग्ने शं योरस्मभ्यमिदमस्तु शस्तम्।
अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय॥७॥

**अन्वय**- मित्रावरुणा! (युवा) अस्मभ्य शम् यो (च) (दाः) अस्तु। अग्ने शस्तम् इदम् (सूक्तम्) तत् अस्तु। (वयम्) गाध प्रतिष्ठाम् उत् आशीमहि। (अहं) बृहते सदनाय दिवे (सूर्याय) नमः (करोमि)।

**अनुवाद**- हे मित्रावरुणौ! (तुम) हमे सुख और दुःखनिवृत्ति (देने वाले) होओ। हे अग्ने! स्तुत यह (सूक्त) तुम्हारे लिए है। (हम) सुस्थिति और प्रतिष्ठा को प्राप्त करे। (मैं) विशाल आश्रयभूत तेजस्वी (सूर्य) को नमस्कार (करता हूँ)।

## सूक्त - (४८)

***देवता***- विश्वेदेवाः, ***ऋषि***- प्रतिभान्वात्रेय, ***छन्द***- जगती।

कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम्।
आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी॥१॥

**अन्वय**- वय स्वक्षत्राय स्वयशसे (च) महे प्रियाय धाम्ने कदु मनामहे। यत् मायिनी (इमा आग्नेयी शक्तिः) अमेन्यस्य रजस. वृणाना अभ्रे आ अपः वितनोति।

**अनुवाद**- हम अपने बल (एवं) अपने यश के लिये महान प्रिय विद्युत की कब स्तुति करेगे ? क्योंकि मायिनी (यह आग्नेयी शक्ति) अपरिमित अन्तरिक्ष को आच्छादित कर मेघ के ऊपर जल फैलाती है।

ता अत्नत वयुनं वीरवक्षण समान्या वृतया विश्वमा रजः।
अपो अपाचीरपरा अपेजते प्र पूर्वाभिस्तिरते देवयुर्जनः॥२॥

**अन्वय**- ताः (उषसः) वीररक्षण वयुनम् (च) अत्नत। सामान्या वृतया (दीप्त्या) विश्व रजः आ (वृणोत्) अपराः (उषा) अपाची अप ईजते (तदा) देवयुः जनाः पूर्वाभिः (उषाभिः) अपः प्र तिरते।

**अनुवाद**- उन (उषा) ने वीररक्षण (एवं) प्रजा का विस्तार किया। एकरूप आवरक (दीप्ति) से सम्पूर्ण जगत् को (आवृत किया)। अन्य (उषा) पश्चिम की ओर जाती है (तब) देवकामी लोग पूर्व (उषा) के साथ कार्य करते है।

आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि।
शतं वा यस्य प्रचरन्त्स्वे दमे संवर्तयंतो वि च वर्तयन्नहा॥३॥

**अन्वय- यस्य (इन्द्रात्मक आदित्यस्य)** शतं (रश्मयः) समवर्तयन्तः स्वे दमे (आकाशे) प्रचरन् अहा च वि वर्तयन् (स) अहन्येभिः अक्तुभिः ग्रावभिः (अभिषवैः निर्मितैः) (सोमेन हर्षितः सन्) मायिनी (वृत्रे) वरिष्ठ वज्रम् आ जिघर्ति।

**अनुवाद**- जिस (इन्द्रात्मक आदित्य) की सौ (किरणे) समवर्तित होती हुयी अपने घर (आकाश) मे फैलती हैं और दिन का विस्तार होता है (वह) दिन रात प्रस्तर के (अभिषव से निर्मित) (सोम से हर्षित होकर) मायावी (वृत्र) पर श्रेष्ठ वज्र फेकता है।

तामस्य रीतिं परशोरिव प्रत्यनीकमख्यं भुजे अस्य वर्पसः।

सचा यदि पितुमन्तमिव क्षय रत्नं दधाति भरहूतये विशे॥४॥

**अन्वय**- परशोः इव (तीक्ष्णम्) अस्य (अग्नेः) तां रीतिम् (जानामि)। वर्षसः अस्य (अग्नेः) अनीकं भुजे (सन्ति इति) प्रति अख्यम्। सचा (अयमग्निः) भारहूतये पितुमन्तम् इव क्षय रत्नं विशे दधाति।

**अनुवाद**- परशु की भाँति (तीक्ष्ण) इस (अग्नि) के उस स्वभाव को (जानता हूँ) रूपवान इस (अग्नि) की किरणे कल्याण के लिये (है यह) कहता हूँ। सहायक (यह अग्नि) आह्वाहित होने पर पिता की भाँति निवासप्रद रत्न लोगो को देता है।

स जिह्वया चतुरनीक ऋजते चारु वसानो वरुणो यतन्नरिम्।

न तस्य विद्य पुरुषत्वता वयं यतो भगः सविता दाति वार्यम्॥५॥

**अन्वय**- चारु (तेज) वसानः वरुण· अरिं यतन् सः (अग्निः) जिह्वया (ज्वालायैः) चतुः अनीकः (सन्) ऋञ्जते। यतः भग· सविता (अग्निः) वार्यं धनं दाति (अतः) वय तस्य पुरुषत्वता न विद्य।

**अनुवाद**- सुन्दर (तेज) को धारण करने वाला, आच्छादक, शत्रु को मारने वाला वह (अग्नि) जिह्वा (रूप ज्वालाओ) से चारो ओर प्रसृत ज्वाला वाला (होकर) अलङ्कृत होता है। चूँकि भजनीय प्रेरक (अग्नि) वरणीय धन देता है (अत) हम उसकी पुरुषत्वता नहीं जान पाते।

## सूक्त - (४९)

***देवता***- विश्वेदेवाः, ***ऋषि***- प्रतिभान्वात्रेय, ***छन्द***- त्रिष्टुप्।

देवं वो अद्य सवितारमेषे भगं च रत्नं विभजन्तमायोः।

आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन्॥१॥

**अन्वय**- आयोः भगं रत्नं विभजन्तं, देव सवितारं वः अद्य आ ईषे। नरा ! पुरुभुजा ! अश्विना ! (अहम्) सखियन् वाम् दिवे दिवे चित् आ ववृत्याम्।

**अनुवाद**- मनुष्य को भजनीय रत्नदेने वाले, दिव्य सविता को तुम्हारे लिये आज लाता हूँ। हे नेता ! बहुभोक्ता ! अश्विनौ ! (मैं) मित्रता की इच्छा से तुम दोनो को प्रतिदिन अपनी ओर बुलाता हूँ।

प्रति प्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सवितारं दुवस्य।
उप ब्रुवीत नमसा विजानञ्ज्येष्ठं च रत्नं विभजंतमायोः॥२॥

**अन्वय**- अन्तरात्मन् ! असुरस्य (निरासितुः) (सवितारं) विद्वान सुक्तैः (तं) देव सवितार दुवस्य। आयोः ज्येष्ठ रत्न विभजन्त (सवितारम्) विजानन् नमसा उप ब्रवीता।

**अनुवाद**- हे अन्तरात्मन् ! शत्रु- (निवारक) (सविता) को जानते हुये सूक्तों द्वारा (उस) देव सविता की परिचर्या करो। मनुष्य को श्रेष्ठ रत्न प्रदान करते हुये (सविता) को जानते हुये नमस्कार द्वारा स्तवन करो।

अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्रः।
इंद्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयंत दस्माः॥३॥

**अन्वय**- पूषा, भगः, अदितिः (अग्निः) वर्याणि अदत्रया (अन्नानि) (यजमानाय) दयते। इन्द्रः, विष्णुः, मित्रः, वरुणः, अग्नि दस्माः (देवाः) भद्रा अहानि जनयन्त।

**अनुवाद**- पोषक, भजनीय, अखण्ड (अग्नि) वरणीय खाने योग्य (अन्न) (यजमान को) प्रदान करता है। इन्द्र, विष्णु, मित्र, वरुण, अग्नि दर्शनीय (देव) शोभन दिन उत्पन्न करते हैं।

तन्नो अनर्वा सविता वरूथं तत्सिंधव इषयंतो अनु ग्मन्।
उप यद्वोचे अध्वरस्य होता रायः स्याम पतयो वाजरत्नाः॥४॥

**अन्वय**- यत् अध्वरस्य होता (अहम्) उप वोचे (तेन) अनर्वा सविता (अस्मभ्यम्) (तत) वरुथ (धन दातु) इषयन्तः सिन्धवः (अपि) तत् (धनम्) अनु ग्मन्। (वयं) वाजरत्नाः रायः (च) पतयः स्याम।

**अनुवाद**- जिस कारण यज्ञ का होता (मैं) स्तुति करता हूँ (उससे) अतिरस्कृत सविता (हमे) (वह) वरणीय (धन प्रदान करे) गमनशीला नदियाँ (भी) उस (धन) का अनुगमन करें। (हम) अन्न, बल (और) धन के स्वामी हो।

प्र ये वसुभ्य ईवदा नमो दुर्ये मित्रे वरुणे सूक्तवाचः।
अवैत्वभ्वं कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम॥५॥

**अन्वय**- ये (यजमानाः) वसुभ्यः ईवत् नमः आ प्रदुः ये मित्रे वरुणे सूक्तवाचः (भवन्ति) (देवाः ! तान्) अभ्वं धनम् अव एतु। (तान्) वरीयः (सुखं) कृणुत। (वयम्) दिवः पृथिव्योः अवसा मदेम।

**अनुवाद**- जो (यजमान) वसुओ को गमनशील अन्न प्रदान करते है, जो मित्रावरुणौ के लिये शोभन वचन वाले (होते हैं) (हे देवो ! उन्हे) प्रदीप्त धन प्राप्त हो। (उन्हे) श्रेष्ठ (सुख) मिले। (हम) द्यावापृथिवी की रक्षा मे हर्षित हो।

## सूक्त - (५०)

***देवता***- विश्वेदेवाः, ***ऋषि***- स्वस्त्यात्रेय, ***छन्द***- अनुष्टुप्, ५ पङ्ति।

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम्। विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे॥१॥

**अन्वय**- विश्व मर्त नेतुः देवस्य (सवितुः) सख्य वुरीत। विश्वः (मर्तः) पुष्यसे द्युम्न वृणीत राये (च) इषुध्यति।

**अनुवाद**- सभी मनुष्य नेता देव (सविता) के मित्रता की इच्छा करते है। समस्त (मनुष्य) पुष्टि के लिये तेज का वरण करते है (और) धन के स्वामी बनते हैं।

ते ते देव नेतर्ये चेमाँ अनुशसे। ते राया ते ह्या३पृचे सचेमहि सचथ्यै:॥२॥

**अन्वय**- नेत. ! देव ! ये (यजमानाः) ते ईमान् च (देवान्) अनुशसे (ते वय) ते (सन्ति) ते (यजमानाः) राया हि आपृचे सचथ्यें (च) सचेमहि।

**अनुवाद**- हे नेता ! देव ! जो (यजमान) तुम्हारी और अन्य (देवताओ) की उपासना करते है (वे हम) तुम्हारे (हैं)। वे (यजमान) धन ही प्राप्त करें। (और) सभी कामनाओं से युक्त हों।

अतो न आ नॄनतिथीनतः पत्नीर्दशस्यत। आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः॥३॥

**अन्वय**- नः अतः (यज्ञे) नॄन् अतिथीन् (वत् पूज्यान् देवान्) आ दशस्यत। अतः (यज्ञे) (देवानां) पत्नी (दशस्यत्)। युयुविः (सः देवः) विश्वं पथेस्थानम् द्विषः आरे युयोतु।

**अनुवाद**- हमारे इस यज्ञ मे नेता अतिथि (-वत् पूज्य देवों) की परिचर्या होती है। इस (यज्ञ) मे (देवताअें की) पत्नी की (परिचर्या करो)। विघ्न-विनाशक (वह देवता) समस्त पथ मे वर्तमान शत्रुओं को पृथक् करे।

यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः। नृमणा वीरपस्त्योऽर्णा धीरेव सनिता॥४॥

**अन्वय**- यत्र (यज्ञे) वहिनः द्रोण्यः अभिहितः पशुः दुद्रवत् (तत्र यजमानः) नृमनाः वीरस्पत्यः अर्णा धीरा इव सनिता (भवति)।

**अनुवाद**- जिस (यज्ञ) मे वोढा यूपार्ह यूपाभिहित पशु जाता है (वहाँ यजमान) मनुष्य का मन वीर पुत्रयुक्त समृद्ध (एव) धीर की भाँति सभक्त (होता है)।

एष ते देव नेता रथस्पतिः शं रयिः।

शं राये श स्वस्तयं इषःस्तुतो मनामहे देवस्तुतो मनामहे॥५॥

**अन्वय**- नेतः। देव । (सविता !) ते एषः (रथस्य) रथपतिः शम् रयिः (च) (दातव्यः अस्ति)। शम् राये शम् स्वस्तये (च) वयम् इषः स्तुतः (सवितुः) मनामहे। देवस्तुतः (सवितुः) मनामहे।

**अनुवाद**- हे नेता ! देव! (सविता !) तुम्हारे इस (रथ) का रथपति कल्याण (और) धन (देनेवाला है)। कल्याणकारी धन (और) कल्याणकारी स्वस्ति के लिये (हम) बहुस्तुत (सविता) की स्तुति करते है। देवस्तुत (सविता) की स्तुति करते है।

## सूक्त - (५१)

***देवता***- विश्वेदेवाः, ***ऋषि***- स्वस्त्यात्रेय, ***छन्द***- १-४ गायत्री, ५-१० उष्णिक्, ११-१३ जगती, १४, १५ अनुष्टुप्।

अग्ने सुतस्यं पीतयें विश्वैरूमेभिरा गहि। देवेभिर्हव्यदांतये॥१॥

**अन्वय**- अग्ने । सुतस्य पीतये विश्वैः ऊमेभिः देवेभिः (सह) हव्यदातये (यजमानाय) आ गहि।

**अनुवाद**- हे अग्ने ! सोम पान के लिये समस्त रक्षक देवताओ (के साथ) हव्यदाता (यजमान) के पास आओ।

ऋतंधीतय आ गंत सत्यंधर्माणो अध्वरम्। अग्नेः पिबंत जिह्वयां॥२॥

**अन्वय**- ऋतधीतय. ! (देवः !) (यूयम्) अध्वरम् आगत। सत्यधर्माणः ! (देवाः !) (यूयम्) अग्नेः जिह्वया (आज्यसोमादिक) पिबत।

**अनुवाद**- हे सत्यबुद्धि वाले ! (देवो !) (तुम) यज्ञ में आओ। हे सत्यधर्मा ! (देवों !) (तुम) अग्नि की जिह्वा से (आज्यसोमादि का) पान करों।

विप्रेभिर्विप्र संत्य प्रातर्यावभिरा गंहि। देवेभिः सोमंपीतये॥३॥

**अन्वय**- सन्त्य ! विप्र ! (अग्ने !) (त्वम्) प्रातर्यावभिः विप्रेभिः देवैः (सह) सोमपीतये आ गहि।

**अनुवाद**- हे सेवायोग्य ! मेधावी ! (अग्ने !) तुम प्रातःकाल आने वाले मेधावी देवताओ (के साथ) सोमपान के लिये आओ।

अयं सोमश्चमू सुतोऽमंत्रे परिं षिच्यते। प्रिय इंद्रांय वायवें॥४॥

**अन्वय**- चमू सुतः अयं सोमः अमत्रे परि सिच्यते। (सः च) इन्द्राय वायवे प्रियः अस्ति।

**अनुवाद**- कूटकर निचोड़ा गया यह सोम पात्र में छाना जाता है (और वह) इन्द्र वायु को प्रिय है।

वायवा यांहि वीतयें जुषाणो हव्यदांतये। पिबां सुतस्यांधंसो अभि प्रयः॥५॥

**अन्वय**- वायो ! जुषाणः (त्वम्) (सोम्-) पीतये हव्यदातये (च यजमानाय) प्रय· अभि आ यहि। सुतस्य च अन्धस पिब।

**अनुवाद**- हे वायो ! प्रसन्न होते हुये (तुम) (सोम-) पान के लिये (और) हविप्रदाता (यजमान के लिये) अन्न की ओर आओ। और सोमरूप अन्न का पान करो।

इंद्रंश्च वायवेषां सुतानां पीतिमर्हथः। ताञ्जुषेथामरेपसावभि प्रयः।।६।।

**अन्वय**- इन्द्र ! वायो च (युवाम्) एषा सुताना (सोमरसानाम्) पीतिम् अर्हथः (तदर्थः) अरेपसौ (युवाम्) तान् (सोमरसान्) जुषेथाम् प्रयः अभि (च) (गच्छतम्)।

**अनुवाद**- हे इन्द्र ! और वायो ! (तुम) इस अभिषुत (सोमरस) के पान के योग्य हो (इसलिये) अहिंसिक (तुम) उस (सोमरस) का सेवन करो (और) अन्न की ओर (आओ)।

सुता इंद्राय वायवे सोमासो दध्याशिरः। निम्नं न यंति सिंधवोऽभि प्रयः।।७।।

**अन्वय**- इन्द्राय वायवे (च) दध्याशिरः सोमासः सुताः। प्रयः (च) निम्न (गत) सिन्धवः न (युवाम्) अभि यन्ति।

**अनुवाद**- इन्द्र (और) वायु के लिये दधिमिश्रित सोम अभिषुत किया गया है। (और) अन्य निम्न (जाती हुयी) नदियो की भाँति (तुम दोनो) के पास जाता है।

सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः। आ याह्यग्ने अत्रिवत्सुते रण।।८।।

**अन्वय**- अग्ने ! अत्रिवत् (त्वम्) अश्विनाभ्याम् उषसा सजू विश्वेभिः (च) देवेभिः सजू आ यहि। सुते (च) (सोम-) यज्ञे रण।

**अनुवाद**- हे अग्ने ! अत्रिवत् (तुम) अश्विनौ उषा के साथ (और) समस्त देवताओ के साथ आओ।(और) अभिषुत (सोमयज्ञ) मे आनन्दित हो।

सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना। आ याह्यग्ने अत्रिवत्सुते रण।।६।।

**अन्वय**- अग्ने ! अत्रिवत् (त्वम्) मित्रावरुणाभ्यां सजूः सोमेन विष्णुना सजूः आ यहि। सुते (च) सोमयागे रण।

**अनुवाद**- हे अग्ने ! अत्रिवत् (तुम) मित्रावरुणौ के साथ, सोम, विष्णु के साथ आओ (और) अभिषुत सोमयाग मे आनन्दित होओ।

सजूरादित्यैर्वसुभि सजूरिंद्रेण वायुना। आ याह्यग्ने अत्रिवत्सुते रण।।१०।।

**अन्वय**- अग्ने ! अत्रिवत् (त्वम्) आदित्यैः वसुभिः सजूः इन्द्रेण वायुना सजूः आ यहि। सुते (च) (सोमयागे) रण।

**अनुवाद**- हे अग्ने ! अत्रिवत् (तुम) आदित्य, वसुओ के साथ इन्द्र वायु के साथ आओ। (और) अभिषुत (सोमयोग) मे आनन्दित होओ।

स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः।

स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना॥११॥

**अन्वय**- अश्विना नः स्वस्ति मिमीताम्। भगः देवीः अदितिः स्वस्ति (मिमीतम्)। अनर्वाणः असुरः पूषा स्वस्ति दधातु। सुचेतुना द्यावापृथिवी नः स्वस्ति (मिमीताम्)।

**अनुवाद**- अश्विनौ हमारा कल्याण करे। भग, देवी, अदिति कल्याण करें। अपराजित प्राणदाता पूषा कल्याण प्रदान करे। उत्तम ज्ञानयुक्त पृथिवी हमारा कल्याण (करें)।

स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः।

बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः॥१२॥

**अन्वय**- स्वस्तये (वयम्) वायुम् उप ब्रवामहे यः भुवनस्य पतिः (अस्ति) (तम्) सोमं स्वस्ति (ब्रवामहे)। स्वस्तये (वयम्) सर्वगण (पतिम्) बृहस्पतिम् (स्तुमः)। आदित्यासः नः स्वस्तये भवन्तु।

**अनुवाद**- कल्याण के लिये (हम) वायु की स्तुति करते है। जो ससार का स्वामी (है) (उस) सोम की कल्याण के लिये (स्तुति करता हूँ)। कल्याण के लिये (हम) सर्वगण के (स्वामी) बृहस्पति की स्तुति करते है।

आदित्यगण हमारे कल्याण के लिए हो।

विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये।

देवा अवंत्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः॥१३॥

**अन्वय**- अद्य विश्वे देवाः नः स्वस्तये (आगच्छन्तु)। वैश्वानरः वसु अग्निः स्वस्तये (अवतु)। देवाः ऋभवः स्वस्तये नः अवन्तु। रुद्रः स्वस्ति नः अंहसः पातु।

**अनुवाद**- आज समस्त देवता हमारे कल्याण के लिए (आयें)। वैश्वानर निवासप्रद अग्नि कल्याण के लिए (रक्षा करे)। देव ऋभु कल्याण के लिए हमारी रक्षा करें। रुद्र कल्याण के लिये हमें पाप से बचायें।

स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति।

स्वस्ति न इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि॥१४॥

**अन्वय**- मित्रावरुणौ नः स्वस्ति (कुरूताम्) पथ्ये (-रक्षिके !) रेवति। (देवि !) (नः) स्वस्ति (कृधि)। इन्द्रः अग्निः च नः स्वस्ति (कृधि)। अदितेः च नः स्वस्ति कृधि।

**अनुवाद**- हे मित्रावरुणौ ! हमारा कल्याण (करो)। हे पथ- (रक्षिके!) हे धनवति ! (देवी !) (हमारा) कल्याण (करो)। इन्द्र और अग्नि हमारा कल्याण (करें) और हे अदिते ! हमारा कल्याण करो।

स्वस्ति पंथामनु चरेम सूर्याचद्रमसाविव। पुनर्ददताघ्नता जानता सं गमेमहि॥१५॥

**अन्वय**- (वयम्) सूर्यचन्द्रमसौ इव स्वस्ति पन्थाम् अनु चरेम। पुनः ददता अहता जानता (वयम्) सम् गमेमहि।

**अनुवाद**- (हम) सूर्य चन्द्रमा की भाँति कल्याणकारी मार्ग का अनुगमन करे। पुनः देते हुए, अहिंसित होते हुए जानते हुए (हम) साथ गमन करे।

## सूक्त - (५२)

**देवता**- मरूद्गण, **ऋषि**- श्यावाश्वात्रेय, **छन्द**- अनुष्टुप्, ६, १६, १७, पङ्क्ति।

प्र श्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः। ये अद्रोघमनुष्वधं श्रवो मदंति यज्ञियाः॥१॥

**अन्वय**- ये यज्ञियाः अनुस्वधम् अद्रोघं श्रवः मदन्ति तेभिः मरूद्भिः श्यावाश्वः (ऋषे !) धिष्णुया (त्व) प्र अर्च।

**अनुवाद**- जो यज्ञार्ह अपनी धारक शक्ति से युक्त होकर अहिंसक अन्न से हर्षित होते है उन मरुतो की हे श्यावाश्व ! (ऋषे !) धैर्यशाली (तुम) अर्चना करो।

ते हि स्थिरस्य शवसः सखायः संति धृष्णुया।
ते यामन्ना धृषद्विनस्त्मना पांति शश्वतः॥२॥

**अन्वय**- धिष्णुया तेहि (मरुतः) स्थिरस्य शवसः सखायः सन्ति। ते आ यामन् धृषद्विनः (अस्मान्) शश्वतः त्मना पान्ति।

**अनुवाद**- धैर्यशाली वे ही (मरूद्गण) स्थिर बल के मित्र होते है और वे मार्ग मे विजयशील सामर्थ्य -युक्त (हमारे) पुत्रादि की स्वयम् रक्षा करते हैं।

ते स्यंद्रासो नोक्षणोऽति ष्कंदंति शर्वरीः। मरुतामधा महो दिवि क्षमा च मन्महे॥३॥

**अन्वय**- स्पन्द्रासः उक्षणः न ते (मरुतः) शर्वरीः अति स्कन्दन्ति। अद्य (वयम्) मरुता दिव क्षमा च (वर्तमानम्) महः मन्महे।

**अनुवाद**- स्पन्दनशील और जल-सेचक वे (मरूद्गण) रात्रि का अतिक्रमणकर गमन करते हैं। आज (हम) मरुतो के दिन और रात्रि में (वर्तमान) तेज की स्तुति करते हैं।

मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया। विश्वे ये मानुषा युगा पांति मर्त्यं रिषः॥४॥

**अन्वय**- ये विश्वे मानुषा युगा मर्त्य रिषः पान्ति (तान्) वः मरूत्सु (वयम्) धृष्णुया स्तोम यज्ञ च दधीमहि।

**अनुवाद**- जो समस्त मानुषी काल मे मनुष्यों को हिसको से बचाते है (उन्) तुम मरुतों के लिये (हम) धैर्यपूर्वक स्तोत्र और यज्ञ धारण करते हैं।

अर्हंतो ये सुदानवो नरो असामिशवसः। प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः॥५॥

**अन्वय**- ये अर्हन्तः सुदानवः आसामिशवसः दिवः नरः (सन्ति) यज्ञियेभ्य· (तेभ्यः) मरूद्भ्यः (होता !) यज्ञम् (हविः) प्र अर्च।

**अनुवाद**- जो पूज्य, शोभनदाता, अनल्पबलयुक्त, तेजस्वी नेता (है) यज्ञीय (उन) मरुतो की (हे होता !) यज्ञीय (हवि) से अर्चना करो।

आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत।
अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः॥६॥

**अन्वय**- (वृष्टेः) नरः (ते मरुतः) रूक्मैः (आभरणैः) आयुधैः (च) आ (रोचन्ते)। ऋष्व. (ते मरुतः) (मेघभेदनार्थम्) ऋष्टीः असृक्षत। विद्युतः जज्झती इव एनान् मरुतः अनु अह। दिवः (मरुतः) भानुः त्मना अर्त।

**अनुवाद**- (वृष्टि के) नेता (वे मरूद्गण) आभरणो (एव) आयुधो से (शोभित होते है)। महान (उन मरूद्गणो) ने (मेघभेदन के लिये) भाला फेका। विद्युत शब्द करने वाली की भाँति उन मरुतो का अनुगमन करती है। तेजस्वी (मरुतो) की दीप्ति स्वयम् निकलती है।

ये वावृधंत पार्थिवा य उरावंतरिक्ष आ। वृजने वा नदीनां सधस्थे वा महो दिवः॥७॥

**अन्वय**- ये पार्थिवा ये उरौ अन्तरिक्षे आ (ये) वृजने वा नदीना महः दिवः सधस्थे वा ववृधन्त (ते मरुतः वृष्ट्यर्थम् ऋष्टीः असृक्षत्)।

**अनुवाद**- जो पृथिवी पर, जो विशाल अन्तरिक्ष में, (जो) मैदान पर अथवा नदी में अथवा विशाल द्युलोक के सहस्थान मे बढ़ते है (उन मरुतो नें वृष्टि के लिये भाला फेका)।

शर्धो मारुतमुच्छंस सत्यशवसमृभ्वसम्। उत स्म ते शुभे नरः प्रस्यंद्रा युजत त्मना॥८॥

**अन्वय**- (स्तोतः !) (यूयम्) सत्यशवसम् ऋभ्वसं मारूत शर्धः उत् शंस। नराः स्पन्द्राः ते (मरुतः) शुभे उत् स्म त्मना युजत।

**अनुवाद**- (हे स्तोताओ !) (तुम) सत्यवेगवाले, अतिप्रवृद्ध मरुतो के बल की उत्कृष्ट रूप से स्तुति करो। नेता गमनशील वे (मरूद्गण) कल्याण के लिये भी स्वयम् को समायोजित करते है।

उत स्म ते परुष्ण्यामूर्णा वसत शुंध्यवः। उत पव्या रथानामद्रिं भिंदंत्योजसा॥९॥

**अन्वय**- उत स्म ते (मरुतः) परुष्णयां (नद्या) (वर्तन्ते) शुन्ध्यवः (च) (स्व) ऊर्णाः (सर्वान्) वसत। उत (ते) रथाना पव्या ओजसा (वा) अद्रि भिदन्ति।

**अनुवाद**- और वे (मरूद्‌गण) परुष्णी (नदी) मे स्थित रहते हैं। (और) शोधक (अपनी) दीप्ति से (सबको) आच्छादित करते है। और (वे) रथचक्र (अथवा) बल से पर्वत का भेदन करते है।

आपथयो विपथयोऽतस्पथा अनुपथाः। एतेभिर्मह्यंनामभिर्यज्ञं विष्टार ओहते॥१०॥

**अन्वय**- आपथय:, विपथय:, अन्तपथा:, अनुपथाः एतेभिः नामभिः विस्तारः (मरुतः) मह्य यज्ञम् ओहते।

**अनुवाद**- अभिमुख मार्ग से गमन करने वाले, विभिन्न मार्गो से गमन करने वाले, अन्तः मार्ग से गमन करने वाले इन नामो से विस्तारित (मरूद्‌गण) मेरे लिये यज्ञ-वहन करते है।

अधा नरो न्योहतेऽधा नियुत ओहते।
अधा पारावता इति चित्रा रूपाणि दर्श्या॥११॥

**अन्वय**- अद्य (वृष्ट्यादि-) नरः (मरुतः) नि (जगत्) ओहते। अद्य नियुतः (सन्) ओहते। अद्य परावता· ओहते इति चित्रा (तेषा) रूपाणि दर्श्या (भवन्ति)।

**अनुवाद**- आज (वृष्ट्यादि के) नेता (मरूद्‌गण) सम्पूर्ण (जगत) का वहन करते हैं। आज सम्मिलित (होकर) वहन करते है इस प्रकार नानाविधि (उनका) रूप दर्शनीय (होता है)।

छंदःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः
ते मे के चिन्नतायव ऊमा आसन्दृशि त्विषे॥१२॥

**अन्वय**- छन्दः स्तुभः कुभन्यवः कीरिणः उत्सम् (तृषिताय गोतमाय) (मरुतान्) आ नृतुः। ते केचित् मे तायवः न (अदृश्याः) (केचित्) ऊमाः (केचित्) दृशि (केचित् च) त्विषे आसन।

**अनुवाद**- छन्द द्वारा स्तुति करने वाले, जलाकाक्षी स्तोता कूप में (तृषित गौतम के लिये) (मरुतो को) लाये। उनमे कुछ मेरे लिये चोर की भाँति (अदृश्य) (कुछ) रक्षक, (कुछ) दृश्य (और कुछ) बल के लिये थे।

य ऋष्वा ऋष्टिविद्युतः कवयः संति वेधसः।
तमृषे मारुतं गणं नमस्या रमया गिरा॥१३॥

**अन्वय**- ऋषे ! (श्यावाश्व !) ये ऋष्वाः ऋष्टि विद्युतः कवयः वेधसः सन्ति तम् मारूत गणं रमय गिरा नमस्य।

**अनुवाद**- हे ऋषे ! (श्यावाश्व !) जो दर्शनीय आयुध से द्योतमान, मेधावी, विधाता है उन मरूद्‌गण की रमणीय वाणी से परिचर्या करो।

अच्छ ऋषे मारुतं गणं दाना मित्रं न योषणा।
दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत॥१४॥

**अन्वय**- ऋषे ! (त्वम्) मारूत गणम् अच्छ मित्र न दाना योषणा (च) (अभिगच्छ)। ओजसा धिष्णव ! (मरूद्गण. !) (अस्मदीयाभिः) धीभिः स्तुतः (यूयम्) दिवः वा (यज्ञम्) इषण्यत।

**अनुवाद**- हे ऋषे ! (तुम) मरूद्गणो के समक्ष आदित्य की भाँति दान (एव) स्तुति के द्वारा (जाओ)। बल द्वारा घर्षक ! (हे मरूद्गण !) (हमारी) वाणी द्वारा स्तुत (तुम) द्युलोक से (यज्ञ मे) आओ।

नू मन्वान एषां देवाँ अच्छा न वक्षणा। दाना सचेत सूरिभिर्यामश्रुतेभिरञ्जिभिः॥१५॥

**अन्वय**- (स्तोता) वक्षणा एषा (मरुताम्) नु मन्वानः (अन्यान्) देवान् अच्छ न (मनुते)। (स्तोताः) सूरिभिः यामश्रुतेभि (फलस्य) अञ्जिभिः (मरूद्भ्यः) दाना (सन्) सचते।

**अनुवाद**- (स्तोता) वहन के लिये इन (मरुतो) की शीघ्र स्तुति करते हुये (अन्य) देवताओं की अभिप्राप्ति नही (चाहते)। (स्तोता) मेधावी, शीघ्रगमन के लिये विश्रुत (फल-) व्यञ्जक (मरुतो) के दान से युक्त (होकर) गमन करते हैं।

प्र ये मे बंध्वेषे गां वोचंत सूरयः पृश्निं वोचंत मातरम्।
अधा पितरमिष्मिणं रुद्रं वोचंत शिक्वसः॥१६॥

**अन्वय**- ये सूरयः (मरुतः) में बन्धु एषे गाम् (नः) (मातरम्) वोचन्त पृश्निं (नः) मातर वोचन्त। अद्य इष्मिणं रुद्र (न) पितर वोचन्त (ते मरुतः) शिक्वसः (सन्ति)।

**अनुवाद**- जिन मेधावी (मरुतों) ने मेरे बन्धु- अन्वेषण मे गायो को (हमारी) माता कहा और गतिमान रुद्र को हमारा(पिता कहा (वे मरूद्गण) समर्थ (है)।

सप्त मे सप्त शाकिन एकमेका शता ददुः।
यमुनायामधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे॥१७॥

**अन्वय**- सप्त (सख्यकाः) शाकिनः (मरुतः) एकम् एका (गणः) में शता (गवाश्वयूथानि) ददुः। अधिश्रुतम् (तम्) गव्यम् राधः यमुनायाम् उत् मृजे अश्व राधः (यमुनायाम्) नि मृजे।

**अनुवाद**- सप्त (सख्या) वाले, सामर्थ्यवान (मरुतो) के एक-एक (गण) ने मुझे (गवाश्व समूह) दिया। अभिश्रुत (उस) गोरूप धन को यमुना मे सम्मार्जित करता हूँ। अश्वरूप धन को (यमुना में) सम्मार्जित करता हूँ।

## सूक्त - (५३)

***देवता***- मरुतः, ***ऋषि***- श्यावाश्वात्रेयः, ***छन्द***- १, ५, १०, ११, १५,- ककुभ, २ बृहती, ३ अनुष्टुप्, ४ पुरुष्णिक, ६, ७, ६, १३, १४, १६, सतोबृहती, ८, १२, - गायत्री।

को वैद जानमेषा को वा पुरा सुम्नेष्वास मरुताम्। यद्युयुज्रे किलास्यः॥१॥

**अन्वय**- क एषा (मरुताम्) जान वेद? यत् (एते) किलास्य (रथे) युयुज्रे (तदा) पुरा क· वा मरुता सम्नुषे आस?

**अनुवाद**- कौन इन (मरुतो) के जन्म को जानता है? जब (इन्होने) पृथिवी को (रथ मे) सयुक्त किया (तब) पहले कौन मरुतो के सुख मे रहता था।

ऐतान्रथेषु तस्थुषः कः शुश्राव कथा ययुः।

कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह॥२॥

**अन्वय**- रथेषु तस्थुषः एतान् (मरुतः) (विषये) कः आ शुश्राव ? (ते) कथा ययुः (इति) क· जानाति? कस्मै सुदासे (बन्धुभूताः) आपयः वृष्टयः (मरुतः) इळाभिः सह अनु सस्रुः।

**अनुवाद**- रथ मे स्थित इन (मरुतो के विषय में) किसने सुना है? (वे) कैसे गमन करते है (यह कौन जानता है?) किस शोभनदानी के लिये (बन्धु के समान) व्याप्त वर्षक (मरुत) रत्नों के साथ अवतीर्ण होगे ?

ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे। नरो मर्या अरेपस इमान्पश्यन्निति ष्टुहि॥३॥

**अन्वय**- ये द्युभिः विभिः (अश्वैः) (सोमस्य) मदे उप आययुः ते (मरुतः) मे इति आहुः " ऋषे ! नरः मर्यः अरेपसः इमान् (अस्मान्) पश्य स्तुहि (च)।"

**अनुवाद**- जो द्योतमान गतिमान (अश्वो) द्वारा (सोम के) मद के लिये एकत्र हुये उन (मरुतो) ने मुझसे कहा- " हे ऋषे । नेता मनुष्यों के लिये हितकारक दोषरहित इन (हमे) देखो (और) स्तुति करो।"

ये अंजिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मेषु खादिषु। श्राया रथेषु धन्वसु॥४॥

**अन्वय**- मरुतः! (युष्माक) ये स्वभानवः अञ्जिषु, वाशीषु, स्रक्षु ये (च) रुक्मेषु, खादिषु, (तान् सर्वान् वय स्तुम)।

**अनुवाद**- हे मरुतो! (तुम्हारी) जो स्वदीप्तियाँ आभरणो मे, आयुधों में, मालाओ मे, (और) जो उरोभूषणो मे, कगनों मे, रथो में तथा धनुषो मे स्थित (है) (उन सबकी हम स्तुति करते हैं)।

युष्माकं स्मा रथाँ अनु मुदे दधे मरुतो जीरदानवः। वृष्टी द्यावो यतीरिव॥५॥

**अन्वय**- जीरदानवः मरुत! मदे (अहम्) वृष्टी यतीः द्यावः इव (दृश्यमानान्) युष्माक रथान् अनु दधे स्म।

**अनुवाद**- हे शीघ्रदानी मरुतों! हर्ष के लिये (मै) वृष्टि के लिये, गमनशील दीप्ति की भाँति (दृश्यमान) तुम्हारे रथो का अनुगमन करता हूँ।

आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः।

वि पर्जन्यं सृजंति रोदसी अनु धन्वना यंति वृष्टयः॥६॥

**अन्वय**- नर· सुदानवः (मरुतः) (हवि·) ददाशुषेः (यजमानाय) यम् (अपा) कोशम् (अस्ति) (त मेघम्) दिवः आ अचुच्यवुः। (ते) रोदसी पर्जन्य वि सृजन्ति। वृष्टयः (ते मरुत.) धन्वना (उदकेन सह) अनु यन्ति।

**अनुवाद**- नेता, शोभनदानी (मरुत) (हवि-) प्रदाता (यजमान) के लिये जो (जल का) कोश (है) (उस मेघ को) द्युलोक से गिराते है। (वे) द्युलोक एवं पृथिवीलोक के लिये मेघ को विमुक्त करते हैं। वर्षक (वे मरुत) गतिशील (जल के साथ) गमन करते है।

ततृदानाः सिंधवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा।
स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तंत एन्यः॥७॥

**अन्वय**- ततृदानाः (मेघान्) (विसर्जिताः) सिन्धवः क्षोदना (सह) धेनवः यथा रजः प्र सस्रु। यत् एन्यः अध्वनः विमोचने अश्वाः इव स्यान्नाः (भवन्ति) (तदा ताः) वि वर्तन्ते।

**अनुवाद**- निर्भिद्य (मेघ से निकली) नदियाँ जल के (साथ) धेनु की भाँति द्युलोक से निकलती है। जब नदियाँ मार्ग ढूँढ ने के लिए अश्व की भाँति तीव्रगामिनी होती है (तब वे) विविध प्रकार से सञ्चरण करती हैं।

आ यात मरुतो दिव अंतरिक्षादमादुत। माव स्थात परावतः॥८॥

**अन्वय**- मरुतः ! (यूयं) दिवः आ परावतः अन्तरिक्षात् अमात् उत् (लोकात्) आ यात (अस्मान्) अव मा स्यात।

**अनुवाद**- हे मरुतोः ! (तुम) द्युलोक से, दूरवर्ती देश से, अन्तरिक्ष से अथवा हमारे (लोक) से आओ (हमसे) दूर मत स्थित होओ।

मा वो रसानितभा कुभा क्रुमुर्मा वः सिंधुर्नि रीरमात्।
मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः॥६॥

**अन्वय**- (मरुतः !) अनितभा कुभा, क्रमु (इति) रसा वः मा (निरीरमत्)। सिन्धुः वः मा निरीरमत्। पुरीषिणी सरयुः वः मा परिस्थात्। वः सुम्नम् अस्मे अस्तु।

**अनुवाद**- (हे मरुतों !) अनितमा, कुभा, क्रमु (ये) नदियाँ तुम्हें न (रोकें)। सिन्धु तुम्हे न रोके। प्रकृष्ट जलवाली सरयू तुम्हे न अवरूद्ध करे। तुम्हारा सुख हमारे लिये हो।

तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनाम्। अनु प्र यंति वृष्टयः॥१०॥

**अन्वय**- रथानां वः मारूत गणं तं नव्यसीना शर्ध त्वेषं (च) (अह स्तौमि)। वृष्टयः (युष्मान्) (वृष्टिः) अनुप्रयन्ति।

**अनुवाद**- वेगवान तुम मरूद्गणो के उस नवीन बल (एवं) दीप्ति का (मै स्तवन करता हूँ)। वर्षक (तुम्हारा) (वृष्टि) भलीभाँति अनुगमन करती है।

शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः। अनु क्रामेम धीतिभिः॥११॥

**अन्वय**- (मरुतः!) एषा व. शर्ध शर्ध व्रात व्रातम्. गणम् गणम् (वयम्) सुशस्तिभिः (हविष्यप्रदानादिलक्षणैः) च धीतिभि अनु क्रामेम।

**अनुवाद**- (हे मरुतो !) इन तुम्होरे प्रत्येक बल का, प्रत्येक समूह का, प्रत्येक गण का (हम) सुस्तुति (एव) (हविष्यादि प्रदान लक्षण) कर्मो के द्वारा अनुगमन करेगे।

कस्मा अद्य सुजाताय रातहव्याय प्र ययुः। एना यामेन मरुतः॥१२॥

**अन्वय**- अद्य मरुतः एना यामेन कस्मै सुजाताय रातहव्याम (यजमानाये) प्र ययुः।

**अनुवाद**- आज मरुत इस रथ से किस सुजन्मा हविप्रदाता (यजमान) की ओर जायेगे।

येन तोकाय तनयाय धान्यं१बीजं वहध्वे अक्षितम्।

अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगम्॥१३॥

**अन्वय**- (मरुतः!) येन (मनसा) (यूयम्) तोकाय तनयाय अक्षित धान्यं बीजं (च) वहध्वे (तेन मनसा) अस्मभ्य तत् (सर्वम्) धत्तन। यत् राधः (वयं) वः ईमहे (तत् अस्मभ्यं धत्तन)। विश्वायुः सौभग(च अस्मभ्य धत्तन)।

**अनुवाद**- जिस (मन) से (तुम) पुत्र पौत्रादि के लिये अक्षुण्ण धान्य (और) बीज वहन करते हो (उस मन से) वह सब हमारे लिये धारण करो। जिस धन के लिये (हम) तुम्हारी स्तुति करते है (वह हमारे लिये धारण करो) समस्त आयु (एवम्) शोभन ऐश्वर्य (हमारे लिये धारण करो)।

अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः।

वृष्ट्वी शं योराप उस्रि भेषजं स्याम मरुतः सह॥१४॥

**अन्वय**- (मरुतः !) (वयम्) स्वस्तिभिः अवद्य हित्वा निदः तिरः (च) अरातीः अति स्याम। मरुतः ! (युष्मत् प्रेरितासु) वृष्ट्वी (सतीषु वयम्) शम् (पापाना) योः आपः उस्रि (च) भेषज सह स्याम।

**अनुवाद**- (हे मरुतो!) (हम) कल्याण के द्वारा पाप का परित्याग करके निन्दक (और) गुप्त शत्रुओं का अतिक्रमण करे। हे मरुतो । (तुम्हारे द्वारा प्रेरित) वृष्टि (होने पर) (हम) सुख, पापनिवारक जल और गोयुक्त औषधि एक साथ प्राप्त करे।

सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः। यं त्रायध्वे स्याम ते॥१५॥

**अन्वय**- समह ! नरः मरुत ! यं (यूयम्) त्रायध्वे सः मर्त्यः सुदेवः सुवीरः (च) असति (एव) ते (वयम्) (युष्मदीयः) स्याम।

**अनुवाद**- हे प्रशंसित ! नेता मरुतो ! जिसकी (तुम) रक्षा करते हो वह मनुष्य सुदीप्त (एव) सुपुत्रयुक्त होता है (इस प्रकार के) वे (हम) तुम्हारे हो।

स्तुहि भोजान्त्स्तुवतो अस्य यामनि रणन्गावो न यवसे।
यतः पूर्वां इव सखींरनु ह्वय गिरा गृणीहि कामिनः॥१६॥

**अन्वय**- (ऋषे !) स्तुवतः अस्य (यजमानस्य) यामनि भोजान् (मरुतः) स्तुहि। (अत्र मरुतः) यवसे गावः न रणन्। पूर्वान् सखीन् इव यतः (मरुतः) अनु ह्वय। (स्तुतीः) कामिनः (मरुतः) गिरा गृणीहि।

**अनुवाद**- (हे ऋषे !) स्तुति करते हुये इस (यजमान) के यज्ञ में दानी (मरुतो) की स्तुति करो। (यहाँ मरुत) जाती हुयी गायो की भाँति आनन्दित होते है। पूर्व सखा की भाँति गमनशील (मरुतों) का आह्वान करो। (स्तुति की) कमाना करने वाले मरुतो की वाणी द्वारा स्तुति करो।

## सूक्त - (५४)

***देवता***- मरुतः, ***ऋषि***- श्यावाश्वात्रेय, ***छन्द***- जगती, १४ त्रिष्टुप्।

प्र शर्धाय मारुताय स्वभानव इमां वाचमनजा पर्वतच्युते।
घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत॥१॥

**अन्वय**- स्वभानवे पर्वतच्युते मारुताय शर्धाय इमा वाच प्र वाचम्। धर्मस्तुभे, पृष्ठयज्यवने, द्युम्नश्रवसे दिवः आ (गच्छते) (मरुताय) महि। (हविर्लक्षणम्) नृम्णम् अर्चत।

**अनुवाद**- अपने तेज से पर्वत को विदीर्ण करने वाले मरुतो के बल के लिये यह वाणी प्रेषित करो। धर्मशोषक (रथादि के) पृष्ठ को जानने वाले, द्योतमान अन्न वाले, द्युलोक से आ (गमन) करने वाले(मरुतो) के लिये प्रभूत (हविर्लक्षण) अन्न प्रदान करो।

प्र वो मरुतस्तविषा उदन्यवो वयोवृधो अश्वयुजः परिज्रयः।
सं विद्युता दधति वाशति त्रितः स्वरंत्यापोऽवना परिज्रयः॥२॥

**अन्वय**- मरुतः ! तविषाः, उदन्यवः वयोवृधः, अश्वयुजाः, परिज्रयः वः (गणाः) प्र (भवन्ति)। विद्युता (च) सम् दधति। (तदानीम्) त्रितः(स्थानेषु) वाशति। परिज्रयः (च) आपः अवना स्वरिन्त।

**अनुवाद** - हे मरुतो ! दीप्त, जलाभिलाषी, अन्न-वर्धक, सर्वगमनशील तुम्हारे गण उत्पन्न होते है(और) विद्युत के साथ सम्मिलित होते है (तब) तीनो (स्थनो) मे शब्दायित होते हैं(और) जल भूमि पर गिरता है।

विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वतच्युतः।
अब्दया चिन्मुहुरा ह्रादुनीवृतः स्तनयदमा रभसा उदोजसः॥३॥

**अन्वय**- विद्युन्महसः, नरः, अश्मदिद्यवः, वातत्विषः, पर्वतच्युतः, मुहुः चित् स्तयत् अमाः, रभसाः, उदोजसः मरुत (वृष्ट्यर्थं) (प्रादुर्भवन्ति)।

**अनुवाद**- द्युतिमान तेज वाले, नेता, आयुध वाले, प्राप्त दीप्ति वाले, पर्वतच्यावी, प्रभूत जल (देने) वाले, बज्रक्षेपक, एकत्र शब्द करने वाले, उद्गत बल वाले मरुत (वृष्टि के लिये उत्पन्न होते है)।

व्यक्तून्रुद्रा व्यहानि शिक्वसो व्यन्तरिक्षं वि रजांसि धूतयः।
वि यदज्राँ अजथ नाव॥ई यथा वि दुर्गाणि मरुतो नाह रिष्यथ॥४॥

**अन्वय**- रुद्राः ! (मरुतः) अहानि अक्तन् वि अजथ। शिक्वसः ! अन्तरिक्ष वि (अजथ) रजासि वि (अजथ) धूतयः । (समुद्रे स्थिताम्!) ईम! नावः यथा यत् अज्रान वि (कम्पय) (शत्रुणा) दुर्गाणि वि (नाशय)। मरुत. ! अह न रिष्यथ।

**अनुवाद**- हे यद्रपुत्र ! (मरुतो !) दिन रात्रि को प्रवर्तित करो। हे समर्थ! अन्तरिक्ष को प्र (वर्तित करो)। द्यावापृथिवी को प्र (वर्तित करो)। हे कम्पक ! (समुद्र मे स्थित) इस नौका की भाँति इन मेघो को प्र (कम्पित करो)। (शत्रुओ के) दुर्गों का वि (नाश करो)। हे मरुतो ! हिसा न करो।

तद्वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनम्।
एता न यामे अगृभीतशेचिषोऽनश्वदां यन्ययातना गिरिम्॥५॥

**अन्वय**- मरुतः ! यत् अगृभीतशोचिषः वः अनश्वदां गिरम् नि अयातन (स्थ) (तदा) (वः) तत् वीर्यं यामे (देवानाम्) एताः अश्वाः न सूर्यः (च) योजन न दीर्घं ततान।

**अनुवाद**- हे मरुतों ! जब अहिंसित तेजवाले तुमने अश्व न देने वाले पवर्त को स्थिर किया (तब) (तुम्हारा) वह सामर्थ्य मार्गस्थ (देवताओं) के इन अश्वो की भाँति (और) सूर्य के तेज की भाँति दूर तक फैला।

अभ्राजि शर्धो मरुतो यदर्णस मोषथा वृक्षं कपनेव वेधसः।
अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यंतमनु नेषथ सुगम्॥६॥

**अन्वय**- (वृष्टेः) वेधसः ! मरुतः ! (यूयं) शर्धः यत् अभ्राजि (तदा) (यूयम्) अर्णसम् कपना इव वृक्ष मोषथ। सजोषसः ! चक्षु· इव यन्त (यूयम्) न· सुगम् (मार्गम्) अरमतिम् अध स्म अनु नेषथ।

**अनुवाद**- (हे वृष्टि) धारक! मरुतो! (तुम्हारा) बल जब द्योतमान होता है (तब) (तुम) जलयुक्त काँपते से मेघ को ताडित करते हो। हे समानप्रीतिवाले! नेत्र की भाँति ले जाने वाले (तुम) हमे सुगम (मार्ग) से धन की ओर भी ले जाओ।

न स जीयते मरुतो न हन्यते न स्रेधति न व्यथते न रिष्यति।

नास्य राय उप दस्यंति नोतय ऋषिं वा यं राजानं वा सुषूदथ॥७॥

**अन्वय**- मरुतः ! यम् ऋषिं वा राजानम् वा (यूयम्) (सत्कर्मसु) ससूदथ सः न जीयते न हन्यते न स्रेधति न व्यथते न रिष्यति न अस्य रायः न ऊतयः उप दस्यन्ति।

**अनुवाद**- हे मरुतो ! जिस ऋषि या राजा को (तुम) (सत्कर्मो मे) प्रेरित करते हो वह न पराभूत होता है, न हिंसित होता है,

न नष्ट होता है, न पीडित होता है, न बाधित होता है, न इसका धन, न रक्षा नष्ट होती है।

नियुत्वंतो ग्रामजितो यथा नरोऽर्यमणो न मरुतः कवधिनः।

पिन्वंत्युत्सं यदिनासो अस्वरन्व्युंदंति पृथिवीं मध्वो अंधसा॥८॥

**अन्वय**- नियुत्वतः ग्रामजितः यथा नरः अर्यमणः न (दीप्ताः) मरुतः कवन्धिनः भवन्ति। यत् ते ईनासः भवन्ति (तदा) उत्सम् (उदकेन) पिन्वन्ति। अस्वरन् (च) मध्वः अन्धसा (उदकेन) पृथवीम् वि उन्दन्ति।

**अनुवाद**- नियुतसंज्ञक अश्वो से युक्त, ग्रामजेता की भाँति नेता, अर्यमण की भाँति (दीप्त) मरुत जलयुक्त (होते है) जब ये अधिपति होते हैं (तब) मेघ को (जल से) भर देते हैं। और शब्द करते हुये मधुर सारभूत (जल) से पृथिवी को सिञ्चित करते है।

प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः।

प्रवत्वतीः पथ्या अंतरिक्ष्याः प्रवत्वंतः पर्वता जीरदानवः॥६॥

**अन्वय**- इय पृथिवी मरूद्भ्यः प्रवत्वती (भवति) द्यौः (मरुतानाम्) प्रयत्भ्यः द्यौः प्रवत्वती भवति। अन्तरिक्ष्याः पथ्यः (मरूद्भ्यः) प्रवत्वतीः (भवन्ति) जीरदानवः (मरूद्भ्यः) पर्वताः प्रवत्वन्तः (भवन्ति)।

**अनुवाद**- यह पृथिवी मरुतो के लिये विस्तीर्ण (होती है)। द्युलोक (मरुतो के लिये) विस्तृत होता है। अन्तरिक्ष के मार्ग (मरुतो के लिये) विस्तीर्ण (होते है)। अतिदानी (मरुतो) के लिये मेघ विस्तृत (होते हैं)।

यन्मरुतः सभरसः स्वर्णरः सूर्य उदिते मदथा दिवो नरः।

न वोऽश्वाः श्रथयंताह सिस्रतः सद्यो अस्याध्वनः पारमश्नुथ॥१०॥

**अन्वय**- समरसः ! स्वर्णरः ! दिवः नरः ! मरुतः ! यत् सूर्ये उदिते (तदा) (यूयं) (सोमेन) मदथ (तदा) वः सिस्रतः अश्वाः न श्रथयन्त सद्यः (च) (यूयम्) (देवयजनस्य) अस्य अध्वनः पारम् अश्नुथ।

**अनुवाद**- हे बलशालिन् ! हे सर्वनेता ! हे द्युलोक के नेता ! मरुतो ! जब सूर्य उदित होता है (तब) तुम्हारे गमनशील अश्व परिश्रान्त नहीं होते।(और) शीघ्र ही (तुम) (देवयजन के) इस मार्ग के पार पहुँच जाते हो।

अंसेषु व ऋष्टयः पत्सु खादयो वक्षःसु रुक्मा मरुतो रथे शुभः।
अग्निभ्राजसो विद्युतो गभस्त्योः शिप्राः शीर्षसु वितता हिरण्ययीः॥११॥

**अन्वय**- मरुतः । वः अंसेषु ऋष्टयः (भासन्ते) पत्सु खादयः, वक्षःसु रुक्माः, रथे शुभ्रः (दीप्तिः) गभस्तयोः अग्निभ्राजस विद्युतः शीर्षसु (च) वितताः हिरण्यायीः शिप्राः (भासन्ते)।

**अनुवाद**- हे मरुतो ! तुम्हारे कंधो पर भाले (शोभित होते है), पैर मे कंगन, वक्ष मे हार, रथ मे शुभ (दीप्ति) भुजाओ पर अग्निवत् चमकीले वज्र (और) शीर्ष पर विस्तृत स्वर्णमयी शिरस्त्राण (शोभित होते है)।

तं नाकमर्यो अगृभीतशोचिषं रुशत्पिप्पलं मरुतो वि धूनुथ।
समच्यंत वृजनातित्विषंत यत्स्वरंति घोषं विततमृतायवः॥१२॥

**अन्वय**- मरुतः ! अर्यः (यूयम्) नाकम् अगभीतशोचिश रूशत् तम् पिप्पल वि धूनुथ। यत् (असुरा) वृजना सम अच्यन्त (सन्) अतित्विषः (भवन्ति) (तदा) ऋतयवः (यूयम्) वितत घोषं स्वरन्ति।

**अनुवाद**- हे मरुतो ! गमनशील (तुम) अन्तरिक्ष मे अहिंसित तेजवाले कान्तियुक्त उस जल को चलायमान करो। जब (असुर) बल द्वारा एकत्र होकर अत्यन्त तेजस्वी (होते हैं) (तब) जलाकाक्षी (तुम) विस्तृत गर्जन करते हो।

युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो३वयस्वतः।
न यो युच्छति तिष्यो३यथा दिवो३स्मे रारत मरुतः सहस्रिणाम्॥१३॥

**अन्वय**- विचेतसः ! मरुत ! रथ्यः (वयम्) युष्मादत्तस्य वयस्वस्तः रायः (स्वमिनः) स्याम। दिवः (स्थः) तिष्यः यथा (युष्माभिः दत्ताः) याः (राः) (अस्ति) (सः) न युच्छति। मरुतः ! अस्मे सहस्रिणाम् (रायैः)मरुतः ! अस्मे सहस्रिणाम् (रायैः) ररन्त।

**अनुवाद**- हे विवेचत ! मरुतों ! रथयुक्त (हम) तुम्हारे द्वारा दिये गये अन्न से युक्त ऐश्वर्य के (स्वामी) हो। द्युलोक मे (स्थित) सूर्य की भाँति (तुम्हारा दिया) (जो धान है) (वह) नष्ट नहीं होता। हे मरुतो : हमे अपरिमित (धन) द्वारा आनन्दित करो।

यूयं रयिं मरुतः स्पार्हवीरं यूयमृषिमवथ सामविप्रम्।
यूयमर्वंतं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमंतम्॥१४॥

**अन्वय**- मरुतः ! यूयम् (नः) रयि स्पार्हवीरम् (च) (प्रयच्छ)। सामविप्रम् ऋषिम् अवथ। (मरुतः) यूय (देवान्) भरतया (श्यावाश्वाय) अर्वन्त वाजं (च) धत्थ। यूयं राजान श्रुष्टिमन्तं (कुरु)।

**अनुवाद**- हे मरुतो ! तुम (हमे) धन (और) स्पृहणीय पुत्र प्रदान करो। साम को जानने वाले ऋषि कीरक्षा करो।(हे मरुतो !) तुम (देवताओ) को धारण करने वाले (श्यावाश्व) को अश्व (एव) धन दो। तुम राजा को सुखयुक्त (करो)।

तद्वो यामि द्रविण सद्यऊतयो येना स्व१र्ण ततनाम नूॅरभि।

इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः॥१५॥

**अन्वय**- सद्यः ऊतयः ! मरुतः ! (वयम्) वः तत् द्रविण यामि येन (नः) नॄन् स्वः न अभि ततनाम। (मरुत· !) (यूय) मे इद स वच हर्यत यस्य (वचसः) तरसा (वयम्) शत हिमाः तरेम।

**अनुवाद**- हे शीघ्ररक्षक ! मरुतो ! (हम) तुम्हारे उस धन की याचना करते है जिससे (हमारे) पुत्रादि आदित्य की भाँति विस्तृत हो। (हे मरुतो !) (तुम) मेरे इस सुवचन की कामना करो जिस (वचन) के बल से (हम) सौ वर्ष पार कर ले।

## सूक्त- (५५)

**देवता**- मरुत., **ऋषि**- श्यावाश्वात्रेय, **छन्द**- जगती, १० त्रिष्टुप्।

प्रयज्यवो मरुतो भ्राजदृष्टयो बृहद्वयो दधिरे रुक्मवक्षसः।

ईयन्ते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत॥१॥

**अन्वय**- प्रयज्यवः, भ्राजत् ऋष्टयः, रूक्मवक्षसः मरुतः बृहत् वयःदधिरे। सुयमेभिः आशुभिः अश्वैः (ते) ईयन्त। रथा· (अपि) शुभ यात (मरुतान्) अनु अवत्स।

**अनुवाद**- प्रकृष्ट यष्टा, दीप्त भाले से युक्त, हारयुक्त वक्ष वाले मरुत प्रभूत अन्न धारण करते हैं। सुखपूर्वक ले जाने वाले तीव्रगामी अश्वों द्वारा (वे) गमन करते है। रथ (भी) कल्याण के लिये जाने वाले (मरुतो) का अनुगमन करते है।

स्वयं दधिध्वे तविषीं यथा विद बृहन्महांत उर्विया वि राजथ।

उतांतरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत॥२॥

**अन्वय**- (मरुत· !) (यूय) यथा विद् (तथैव) तविषीं स्वय दधिध्वे। महान्त· ! (मरुतः!) बृहत् उर्विया (सन्तः) वि राजथ। अन्तरिक्षम् उत् ओजसा वि ममिरे। रथाः (अपि) शुभं यातं (मरुतान्) अनु अवृत्सत।

**अनुवाद**- (हे मरुतो !) (तुम) जैसा जानते हो (वैसा ही) बल धारण करते हो। हे महान ! मरुतो(अत्यन्त विशाल (होते हुये) शोभायमान होओ। अन्तरिक्ष में भी बल से व्याप्त होओ। रथ (भी) कल्याण के लिये जाने वाले (मरुतो) काा अनुगमन करते है।

साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चिदा प्रतरं वावृधुर्नरः।

विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत॥३॥

**अन्वय**- (मरुता) साकं जाता साकं सुभ्व. (साकम्) उक्षिता. (भवन्ति)। श्रिये चित् (ते) प्रतरम् आ ववृधुः। नर· (ते) विरोकिण सूर्यस्य रश्मयः इव (सर्वत्र गच्छन्ति)। रथाः (अपि) शुभ यात (मारुतान्) अनु अवृत्सत।

**अनुवाद**- (मरूद्गण) एक साथ उत्पन्न हुये, एक साथ महान हुये (एक साथ) जलयुक्त (होते है)। कल्याण के लिये वे प्रकृष्ट रूप से सर्वत्र बढ़ते है। नेता (वे) प्रकाशमान सूर्य की किरणो की भाँति (सर्वत्र गमन करते है)। रथ (भी) कल्याण के लिये जाने वाले (मरुतो) का अनुगमन करते है।

आभूषेण्यं वो मरुतो महित्वन दिदृक्षेण्य सूर्यस्येव चक्षणम्।
उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सत॥४॥

**अन्वय**- मरुतः ! व· महित्विनम् आभूषेण्यम्। (वः) चक्षण सूर्यस्य इव दिदृक्षेण्यम्। अमृतत्वे उत् अस्मान् दधातन। रथा (अपि) शुभ यात मरुतान् अनु अवृत्सत।

**अनुवाद**- हे मरुतो ! तुम्हारी महिमा स्तवनीय है। तुम्हारा रूप सूर्य की भाँति दर्शनीय है। मोक्ष मे भी हमारी सहायता करो। रथ (भी) कल्याण के लिये जाने वाले (मरुतो) का अनुगमन करते है।

उदीरयथा मरुतः समुद्रतो यूय वृष्टिं वर्षयथा पुरीषिणः।
न वो दस्ना उप दस्यति धेनवः शुभं यातामनु रथा अवृत्सत॥५॥

**अन्वय**- मरुतः ! यूयम् समुद्रतः (अन्तरिक्षात्) वृष्टिम् उत् ईरयथ। पुरीषिणः ! (उदक) वर्षयता। दस्ना ! (मरुतः !) व धेनव न उप दस्यन्ति। रथाः (अपि) शुभ यात (मरुतान्) अनु अवृत्सत।

**अनुवाद**- हे मरुतो ! तुम समुद्रवत् (अन्तरिक्ष) से वृष्टि को प्रेरित करो। हे प्रभूत जलवाले ! (जल की) वर्षा करो। हे दर्शनीय ! (मरुतो !) तुम्हारा मेघ शुष्क नहीं होता। रथ (भी) कल्याण के लिये जाने वाले (मरुतो) का अनुगमन करते है।

यदश्वान्धूर्षु पृषतीरयुग्ध्वं हिरण्ययान्प्रत्यत्काँ अमुग्ध्वम्।
विश्वा इत्स्पृधो मरुतो व्यस्यथ शुभं यातामनु रथाअवृत्सत॥६॥

**अन्वय**- मरुतः ! (यूयम्) यत् धूर्षु पृषतीः अश्वान् अयुग्ध्व हिरण्यान् च उत्कान् प्रति अमुग्धवम् (तदा) विश्वाः इत् स्पृधः वि अस्यथ। रथाः (अपि) शुभं यात (मरुतान्) अनु अवृत्सत।

**अनुवाद**- हे मरुतो ! (तुम) जब रथ में चितकबरे अश्वो को युक्त करते हो (और) स्वर्णमय कवच को उतार देते हो (तब) समस्त सङ्ग्राम मे विजय प्राप्त करते हो। रथ (भी) कल्याण के लिये जाने वाले (मरुतो) का अनुगमन करते है।

न पर्वता न नद्यो वरंत वो यत्राचिध्वं मरुतो गच्छथेदु तत्।

उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सत॥७॥

**अन्वय**- मरुत. ! न पर्वता न (एव) नद्य· व· वरन्त ! (यूयम्) यत्र अचिध्व तत् इत् गच्छथ। (वृष्ट्यर्थम्) (यूयम्) द्यावापृथिवी उत परि याथन। रथा: (अपि) शुभ यात (मरुतान्) अनु अवृत्सत।

**अनुवाद**- हे मरुतो ! न पर्वत न (ही) नदियाँ तुम्हे रोके। (तुम) जहाँ चाहते हो वहाँ जाते हो। (वृष्टि) के लिये, (तुम) द्युलोक एव पृथिवी मे भ्रमण करते हो। रथ (भी) कल्याण के लिये जाने वाले (मरुतो का) अनुगमन करते है।

यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते।

विश्वस्य तस्य भवथा नवेदसः शुभं यातामनु रथा अवृत्सत॥८॥

**अन्वय**- वसव. ! मरुतः यत् पूर्व्यम् यत् च नूतनम् (अनुतिष्ठम्) यत् उद्यते यत् च शस्यते (यूयम्) विश्वस्य तस्य नवेदसः भवथ। रथ (अपि) शुभ यात (मरुतान्) अनु अवृत्सत।

**अनुवाद**- हे निवासप्रद ! मरुतो ! जो पहले और जो नवीन (अनुष्ठित है) जो स्तुति की जाती है और जो उच्चरित होता है। (तुम) उस सबको जानने वाले हो। रथ (भी) कल्याण के लिये जाने वाले (मरुतो) का अनुगमन करते है।

मृळतं नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यंतन।

अधि स्तोत्रस्य सख्यस्य गातन शुभं यातामनु रथा अवृत्सत॥६॥

**अन्वय**- मरुतः ! न मृळत। अस्मभ्य मा वधिष्टन। (अस्मभ्य) बहुल शर्म वि यतन्त। (न·) स्तोत्रस्य सख्यस्य अधि गातन रथा (अपि) शुभ यात (मरुतान्) अनु अवृत्सत।

**अनुवाद**- हे मरुतो ! हमे सुखी करो। हमे मारो नहीं। (हमारे) प्रभूत सुख को व्यापक करो। (हमारे) स्तोत्र की मित्रता को जानो। रथ (भी) कल्याण के लिये जाने वाले (मरुतों) का अनुगमन करते है।

यूयमस्मान्नयत वस्यो अच्छा निरंहतिभ्यो मरुतो गृणानाः।

जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणाम्॥१०॥

**अन्वय**- मरुतः ! यूयम् अस्मान् वस्यः (स्वर्गम्) नयत। गृणनाः (यूयम्) (नः) अहतिभ्यः निः (नयत)। यजत्रा। (मरुतः!) नः हव्यदाति जुषध्वम्। वयम् (बहुविधाना) रयीणा पतयः स्याम।

**अनुवाद**- हे मरुतो ! तुम हमे निवासप्रद (स्वर्ग) में ले आओ। स्तुत होते हुये (तुम) (हमे) पाप से दूर (ले जाओ)। हे यजनीय ! (मरुतों) हमारे द्वारा प्रदत्त हवि से प्रसन्न होओ। हम (बहुविध) धन के स्वामी हो।

## सूक्त - (५६)

*देवता*- मरुत., *ऋषि*- श्यावाश्वात्रेय, **छन्द**- बृहती, ३, ७, सतोबृहती।

अग्ने शर्धन्तमा गणं पिष्टं रुक्मेभिरञ्जिभिः।
विशो अद्य मरुतामव ह्वये दिवश्चिद्रोचनादधि॥१॥

**अन्वय**- अग्ने ! शर्धन्त (मरुताम्) गणम! आ हवे। (अहम्) अद्य रुक्मेभिः अञ्जिभि पिष्ट मरुता विश. रोचनात् दिव अधि अव (अस्मदभिमुखम्) ह्वये।

**अनुवाद**- हे अग्ने ! बलवान (मरुत-) गणो का आह्वान करो। (मै) आज चमकदार आभूषणो से युक्त मरूद्गणो को प्रकाशमान द्युलोक से (हमारी) ओर (आने का) आह्वान करता हूँ।

यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः।
ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः॥२॥

**अन्वय**- (अग्ने ! त्वम्) हृदा चित् यथा (मरुतः) मन्यसे तत् इत् आशसः (मरुतः) मे जग्मुः। ये (मरुतः) नेदिष्ठ ते हवनामि आ गमन्। भीमसंदृशः तान् (हविष्येन) वर्ध।

**अनुवाद**- (हे अग्ने ! तुम) हृदय से जिस तरह (मरुतो) को मानते हो उसी तरह अहिंसक (मरुत) मेरे लिये आये। जो (मरुत) समीपस्थ तुम्हारे आह्वान से आते हैं भयकरदर्शी उनको (हविष्य द्वारा) बढाओ।

मीळ्हुष्मतीव पृथिवी पराहता मदन्त्येत्यस्मदा।
ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुः॥३॥

**अन्वय**- पृथिवी इव मीळहुष्मती पराहता मदन्ती (मरूत्सेना) अस्मात् आ एति। मरुत· ! वः अम· ऋक्षः न (दीप्ताः) गौ. इव शिर्मीवान् भीमयुः द्रुघः च सन्ति।

**अनुवाद**- पृथिवी की भाँति प्रबल स्वामिका अप्रतिहत, हर्षित होती हुयी (मरुत्सेना) हमारी ओर आती है। मे मरुतो ! तुम्हारे गण अग्नि की भाँति (दीप्त) गौ की भाँति कर्मवान् भयकर वृषभों से युक्त (एवम्) दुर्धर (है)।

नि ये रिणन्त्योजसा वृथा गावो न दुर्धुरः।
अश्मानं चित्स्वर्यं पर्वतं गिरिं प्र च्यावयन्ति यामभिः॥४॥

**अन्वय**- गवः न दुर्धुरः ये (मरुतः) (स्वकीयेन) ओजसा वृथा (शत्रून्) नि रिणन्ति। (ते) (स्वकीयेन) यामभिः अश्मान स्वर्यं चित् पर्वत गिरि प्र च्यवयन्ति।

**अनुवाद**- अश्व की भाँति कठिनाई से हिस्य (मरुत) (अपने) बल से अनायास (शत्रुओ) को नष्ट करते है (वो) (अपने) गमन द्वारा व्याप्त, शब्दवान, जलयुक्त पर्वत को विचलित करते है।

उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानाम्। मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये॥५॥

**अन्वय**- (मरुतः !) (यूय) उत् तिष्ठ। नूनम् एषां स्तोमैः समुक्षिताना पुरुतमम् अपूर्व्यम् गवा सर्गम् इव (गणयुक्त) मरुता वय ह्वये।

**अनुवाद**- (हे मरुतो!) (तुम) उठो। निश्चय ही इन स्तोत्रो से वर्धित, समृद्ध, अपूर्व्य, गायो के सघ की भाँति (गणयुक्त) मरुतो का (हम) आह्वान करते है।

युंग्ध्वं ह्यरुषी रथे युंग्ध्वं रथेषु रोहितः।

युंग्ध्वं हरी अजिरा धुरि वोळ्हवे वहिष्ठा धुरि वोळ्हवे॥६॥

**अन्वय**- (मरुतः !) (यूय) रथे अरूषाः (वडवाः) युङ्ध्वम्। रथेषु रोहितः (अश्वः) युङ्ध्वम्। धुरि बोलह्वे अजिरा हरी युङ्ध्वम्। धुरि बोळ्हवे वहिष्ठा (अश्वौ) (युङ्ध्वम्)।

**अनुवाद**- (हे मरुतो !) (तुम) रथ में दीप्त (घोडियो) को युक्त करो। रथ मे लोहित (अश्व) को नियोजित करो। भार-वहन के लिये तीव्रगामी घोडे नियोजित करो। भारवहन के लिये वाहक (अश्व) (नियोजित करो)।

उत स्य वाज्यरुषस्तुविष्वणिरिह स्म धायि दर्शतः।

मा वो यामेषु मरुतश्चिरं करत्प्र तं रथेषु चोदत॥७॥

**अन्वय**- मरुतः ! वाजी, अरूषः, तुविस्वनिः, दर्शतः स्यः (अश्वः अस्ति) (तम्) इह (रथे) धायि स्म। (मरुतः !) रथेषु (युक्तम्) तम् (अश्वम्) प्र चोदत (येन) वः यामेषु (सः) चिरं मा करत्।

**अनुवाद**- हे मरुतो ! वेगवान, कान्तिवान, ध्वनियुक्त, दर्शनीय वह (अश्व) (है) (उसे) यहाँ (रथ मे) नियोजित करो। (हे मरुतो !) रथ मे (युक्त) उस (अश्व) को प्ररित करो (जिससे) तुम्हारे मार्ग मे (वह) विलम्ब न करें।

रथं नु मारुत वयं श्रवस्युमा हुवामहे।

आ यस्मिन्तस्थौ सुरणानि बिभ्रती सचा मरुत्सु रोदसी॥८॥

**अन्वय**- वयम् (आत्रेयः) मारूतं श्रवस्युं (तं) रथं नु आ हुवामहे यस्मिन् सुरणानि बिभ्रती (रुद्रपत्नी) रोदसी मरूत्सु सचा आ तस्थै।

**अनुवाद**- हम (अत्रि) मरुतों के अन्नयुक्त (उस) रथ का आह्वान करते है जिस पर जल धारण करती हुयी (रुद्रपत्नी) रोदसी मरुतो के साथ बैठी है।

त वः शर्धं रथेशुभं त्वेषं पनस्युमा हुवे।

यस्मिन्त्सुजाता सुभगा महीयते सचा मरुत्सु मीळ्हुषी॥६॥

**अन्वय**- यस्मिन् सुजाता सुभगा (रुद्रपत्नी) मीळ्हुषी वः मरुत्सु सचा महीयते। मरुतः ! (वयम्) वः रथे शुभ, त्वेषं, पनस्यु (तम्) शर्धम् आ हुवे।

**अनुवाद**- जिसमे सुजन्मा, ऐश्वर्ययुक्त (रुद्रपत्नी) मीळ्हुषी मरुतो के साथ पूजित होती है। हे मरुतो ! (हम) तुम्हारे रथ मे शोभन, दीप्त, स्तुत्य (उस) गण का आह्वान करते है।

## सूक्त - (५७)

***देवता***- मरुत., ***ऋषि***- श्यावाश्वात्रेय, ***छन्द***- जगती, ७, ८, त्रिष्टुप्।

आ रुद्रास इंद्रवंतः सजोषसो हिरण्यरथाः सुविताय गतन।

इयं वो अस्मत्प्रति हर्यते मतिस्तृष्णजे न दिव उत्सा उदन्यवे॥१॥

**अन्वय**- इन्द्रवन्तः ! सजोषसः ! रुद्रासः ! (मरुतः !) सुविताय (यज्ञाय) (यूय) हिरण्यरथा. आगन्तन। अस्मत् इयम् मति· व प्रति हर्यते। उदन्यवे तृष्णजे (गोतमाय) न (अस्मान्) दिवः उत्साः (आनय)।

**अनुवाद**- हे इन्द्रानुचर ! समान प्रीति वाले ! रुद्रपुत्र ! (मरुतो !) शोभन (यज्ञ) के लिये (तुम) स्वर्णमयरथ मे आओ। हमारी यह सतुति तुम्हारी आकाक्षा करती है। जलाकाक्षी, प्यासे (गौतम) की भाँति (हमारे लिये) द्युलोक से जल लाओ।

वाशीमंत ऋष्टिमंतो मनीषिणः सुधन्वान इषुमंतो निषंगिणः।

स्वश्वाः स्थ सुरथाः पृश्निमातरः स्वायुधा मरुतो याथना शुभम्॥२॥

**अन्वय**- पृश्निमातरः! मरुतः ! (यूयं) वशीमन्तः, ऋष्टिमन्तः, मनीषिणः, सुधन्वानः, इषुमन्त., निषिङ्गिणः, स्वाश्वाः, सुरथाः स्थ स्वायुधा· (च) (भवथ) (एव विधाः यूय) शुभ याथन।

**अनुवाद**- हे पृश्निसज्ञक मातावाले ! मरुतो ! (तुम) कुठारयुक्त भाले से युक्त, मनीषी, शोभन धनुष वाले वाणयुक्त, तूणीर युक्त. शोभन अश्वयुक्त, शोभनरथ पर स्थित (एव) शोभन आयुध वाले (हो)। (इस प्रकार के तुम) कल्याण के लिये गमन करते हो।

धूनुथ द्यां पर्वतान्दाशुषे वसु नि वो वना जिहते यामनो भिया।

कोपयथ पृथिवीं पृश्निमातरः शुभे यदुग्राः पृषतीरयुग्ध्वम्॥३॥

**अन्वय**- (मरुत !) (यूयम्) दाशुषे (यजमानाय) द्याम् पर्वतान् वसु (च) धूनुथ। वः यामन भिया वनाः नि जिहते। पृश्निमातर ! उग्रा ! मरुतः ! यत् (यूयम्) पृषती (अश्वाः) (रथे) अयुग्धवम् (तदा) (रथे) अयुग्धवम् (तदा) पृथिवीम् (अभिवृष्ट्या) कोपयथ।

**अनुवाद**- (हे मरुतो !) (तुम) दानी (यजमान) के लिये द्युलोक से मेघ (और) धन प्रदान करते हो। तुम्हारे आगमन के भय से वन काँपते हैं। हे पृश्निमातर ! उग्र ! (मरुतो !) जब (तुम) पृषती (अश्व) (रथ मे) नियोजित करते हो (तब) पृथिवी को (वृष्टि से) क्षोभित करते हो।

वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः।
पिशंगाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः॥४॥

**अन्वय**- मरुतः वातत्विषः वर्षनिर्णिजः यमाः इव सुसदृशः, सुपेशसः, पिशङ्गश्वाः, अरूणाश्वाः, अरेपसः (द्वेषीणाम्) प्रत्वक्षस. (स्व-) महिना (च) द्यौः इव उरवः सन्ति।

**अनुवाद**- मरुत सप्राप्तदीप्ति वाले, वृष्टि शोधक, युगल की भाँति समान दिखने वाले, शोभनरूप वाले, भूरे अश्व वाले, अरूण अश्व वाले, पाप रहित (द्वेषियों) का विनाश करने वाले (और) (अपनी) महिमर से द्युलोक की भाँति विशाल है।

पुरुद्रप्सा अंजिमंतः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः।
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे॥५॥

**अन्वय**- पुरुद्रप्साः, अञ्जिमन्तः, सुदानवः, त्वेषसदृशः, अनवभ्रराधसः, जनुषा सुजातासः, अर्काः (मरुतः) दिवः अमृत नाम भेजिरे।

**अनुवाद**- प्रभूत जल वाले, आभरणयुक्त, शोभनदानी, समान बल वाले, अक्षुण्ण धन वाले, जन्म से सुकुलोत्पन्न, पूज्य (मरुत) द्युलोक से अमृत जल प्राप्त करते है।

ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम्।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे॥६॥

**अन्वय**- मरुतः ! वः असयोः ऋष्टयः वः बाह्वोः (शत्रूणाम्) अधि सहः ओजः बल हितम्। वः शीर्षस नृम्णा (पट्टोषणीषानि) (निहितानि) वः रथेषु आयुधा (निहितानि) वः तनूषु विश्वा श्री अधि पिपिश्रे।

**अनुवाद**- हे मरुतो ! तुम्हारे कन्धो पर भाले. बाहुओ पर (शत्रुओ को) परास्त करने वाला ओजयुक्त बल स्थित है। तुम्हारे शीर्ष पर स्वर्णमयी (पगडी) (निहित है)। तुम्हारे रथो पर आयुध (निहित है)। तुम्हारे शरीर पर समस्त कान्ति अधिष्ठित है।

गोमदश्वावद्रथवत्सुवीरं चंद्रवद्राधो मरुतो ददा नः।

प्रशस्ति नः कृणुत रुद्रियासो भक्षीय वोऽवसो दैव्यस्य।।७।।

**अन्वय**- मरुतः ! (यूयम्) नः गोमत् अश्ववत् रथवत् सुवीरं चन्द्रवत् राधः दद। रुद्रियासः ! (मरुत.!) नः प्रशस्ति कृणुत। (वयम्) वः दैव्यस्य अवसः भक्षीय।

**अनुवाद**- हे मरुतो ! (तुम) हमे गोयुक्त, अश्वयुक्त, रथयुक्त, सुपुत्रयुक्त, हिरण्ययुक्त धन दो। हे रुद्रपुत्र ! (मरुतो !) हमे समृद्ध करो। (हम) तुम्हारी दिव्य रक्षा का भोग करे।

हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः।

सत्यश्रुतः कवयो युवानो बृहदिगरयो बृहदुक्षमाणाः।।८।।

**अन्वय**- हये नरः ! मरुतः ! नः मृळत्। (यूयम्) तुविमघासः, अमृताः, ऋतज्ञाः, सत्यश्रुतः, कवयः, युवानः, बृहत् (हविभिः) उक्षमाणाः (सन्ति)।

**अनुवाद**- हे नेता ! मरुतो ! हमे सुखी करो। (तुम) प्रभूतधनयुक्त, अमर, ऋत को जानने वाले, सत्य के लिये विख्यात, ज्ञानी, तरूण, अत्यन्त स्तुत्य, प्रभूत (हवि द्वारा) सेवित हो।

## सूक्त - (५८)

***देवता***- मरूद्‌गणः, ***ऋषि***- श्यावाश्वात्रेय, ***छन्द***- त्रिष्टुप्।

तमु नूनं तविषीमंतमेषा स्तुषे गणं मारुतं नव्यसीनाम्।

य आश्वश्वा अमवद्वहंत उतेशिरे अमृतस्य स्वराजः।।१।।

**अन्वय**- आशु अश्वाः ये (मरुतः) अमवत् (सन्) वहन्ते। अमृतस्य उत स्वराजः ईशिरे। एषाम् नव्यसीना मारुतम् त तविषीमन्त गण स्तुषे।

**अनुवाद**- तीव्रगामी अश्व वाले जो (मरुत) बलयुक्त (होकर) गमन करते है और अमर अपनी दीप्ति से ईश्वर हो जाते है। इन स्तुत्य मरुतो के उस बलयुक्त गण की स्तुति करता हूँ।

त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारम्।

मयोभुवो ये अमिता महित्वा वंदस्व विप्र तुविराधसो नॄन्।।२।।

**अन्वय**- विप्र ! ये मयोभुवः महित्वा, अमिताः, तुविराधसः त्वेष, तवस, खादिहस्त, धुनिव्रत, मायिन, दातिवारम् (सन्ति) नॄन् (तान् मरुतान्) गण वन्दस्व।

**अनुवाद**- हे होता ! जो सुखप्रदाता, महिमा से अपरिछिन्न, दीप्त, बलयुक्त, कगनयुक्त, हाथ वाले, कँपाने वाले, प्रज्ञायुक्त और धनदाता (है) (उन मरुतो के) गण की वन्दना करो।

आ वो यंतूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनंति।

अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः।।३।।

**अन्वय**- (यजमानाः !) ये विश्वे वृष्टि जुनन्ति (ते) उदवाहासः मरुतः अद्य वः आ यन्तु। कवयः ! युवान ! मरुत· ! यः अय समिद्धः अग्निः (अस्ति) एतम् जुषध्वम्।

**अनुवाद**- (हे यजमानो !) जो समस्त वृष्टि को प्रेरित करते है (वे) जलवाही मरुत आज तुम्हारे समीप आये। हे ज्ञानी ! तरूण! मरुतो ! जो यह समिद्ध अग्नि (है) इसका सेवन करो।

यूयं राजानमिर्यं जनाय विभ्वतष्टं जनयथा यजत्राः।

युष्मदेति मुष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः।।४।।

**अन्वय**- यजत्रा. ! (मरुतः !) यूय राजान जानाय (च) (शत्रुणा) इर्ययम् विभ्वतष्टम् (पुत्रम्) जनयत। मरुतः ! युष्मत् मुष्टिहा बाहुजूतः युष्मत् (एव च) सदश्वः सुवीरः (पुत्रः) एति।

**अनुवाद**- हे यजनीय (मरुतो !) तुम राजा और (यजमान) के लिये (शत्रु-) सहारक, कुशल कर्त्ता, (पुत्र) को उत्पन्न करने वाले हो। हे मारूतो ! तुमसे मुष्टि द्वारा शत्रुहन्ता, बहुप्रेरक (और) तुमसे (ही) अनेक अश्वो वाला शोभन पुत्र उत्पन्न होता है।

अरा इवेदचरमा अहेव प्रप्र जायंते अकवा महोभिः।

पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः।।५।।

**अन्वय**- (रथस्य) अराः इव इत् अचरमाः, अहा इव अकवाः (मरुतः) महोभिः (तेजोभि) प्र जायन्ते। पृश्ने· पुत्राः उपमास रभिष्ठा मरुतः स्वया मत्या (वृष्ट्या) सम् मिमिक्षुः।

**अनुवाद**- (रथ की) कील की भाँति एक साथ उत्पन्न, दिन की भाँति, अवर्णनीय (मरुत) महान (तेज) से भलीभाँति उत्पन्न होते है। पृश्नि के पुत्र, समान वेगवान मरुत अपनी बुद्धि से (वृष्टि के) द्वारा सिञ्चन करते है।

यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभि·।
क्षोदंत आपो रिणते वनान्यवोस्रियो वृषभः क्रंदतु द्यौः॥६॥

**अन्वय**- मरुत· ! यत् (यूयम्) पृषतीभिः अश्वैः बीळपावेभिः रथेभिः अयासिष्ट (तदा) आपः क्षोदन्ते, वनामि ऋणन्ति। वृषभः द्यौ· उसियः (पर्जन्यः) (वृष्ट्यर्थम्) अव क्रदन्तु।

**अनुवाद**- हे मरुतो ! जब (तुम) चितकबरे अश्वो (और) दृढनेमि वाले रथ से आते हो (तब) जल प्रवाहित होता है, वन नष्ट होते है। वर्षक तेजस्वी जलयुक्त (मेघ) (वृष्टि के लिये) शब्द करते है।

प्रथिष्ट यामन्पृथिवी चिदेषां भर्तेव गर्भ स्वमिच्छवो धुः।
वातान्ह्यश्वान्धुर्यायुयुज्रे वर्ष स्वेदं चक्रिरे रुद्रियासः।.७॥

**अन्वय**- एषा वामन् पृथिवी चित् प्रथिष्ट। (मरुतः) भर्ताइव (भर्यायाःवत् भूम्याः) गर्भ स्वम् इत् शवः धुः। रुद्रियास । यामन् (मरुतः) (यूय) व्रातान् हि अश्वान् (रथस्य) धुरि आयुयुज्रे। स्वेद (च) वर्ष चक्रिरे।

**अनुवाद**- इन (मरुतो) के गमन से पृथिवी उर्वती होती हे) (मरुत्) पति की भाँति (भार्यावत् पृथिवी) के गर्भ मे स्वस्थानीय जल स्थपित करते है। हे रुद्रपुत्र । (मरुतो !) (तुम) गमनशील अश्वो को (रथ की) धुरि मे नियोजित करते हो (और) स्वेदभूत वृष्टि करते हो।

हये नरो मरुतो मृळता नस्तुवीमघासो अमृता ऋतज्ञाः।
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः॥८॥

**अन्वय**- हये नरः ! मरुतः ! नः मृळत् (यूयम्) तुविमघासः, अमृताः, ऋतज्ञाः, सत्यश्रुतः, कवयः, युवानः, बृहत् गिरयः, बृहत् (हविभिः) उक्षमाणाः (सन्तु)।

**अनुवाद**- हे नेता मरुतो ! हमे सुखी करो (तुम) प्रभूतधनयुक्त, अमर, ऋत को जानने वाले, सत्य के लिये विख्यात, ज्ञानी तरूण, अत्यन्त स्तुत्य, प्रभूत (हवि द्वारा) सेवित (हो)।

## सूक्त - (५९)

**देवता**- मरुतः, **ऋषि**- श्यावाश्वात्रेय, **छन्द**- जगती, ८ त्रिष्टुप्।

प्र वः स्पळक्रन्त्सुविताय दावनेऽर्चा दिवे प्र पृथिव्या ऋत भरे।
उक्षते अश्वान्तरुषत आ रजोऽनु स्व भानुं श्रथयंते अर्णवैः॥१॥

**अन्वय**- (मरुत !) सुविताय दावने (च) स्पट् वः प्र अ हन्। (होतः !) दिवे (मरुताय) प्र अर्च। (आत्मन् !) (अहम्) पृथिव्यै ऋत भरे। (ते मरुतः) अश्वान् उक्षन्ते। रज आ तरुषन्त। अर्णवैः (च) (सह) एव भानुम् अनु श्रथयन्ते।

**अनुवाद**- (हे मरुतो !) कल्याण के लिये (और) हविप्रदान करने के लिये होता तुम्हारा भलीभाँति स्तवन करते हैं। (हे होता !) दिव्य (मरुत) की अर्चना करो। (हे आत्मन्) (मै) पृथिवी के लिये स्तोत्र सम्पादित करता हूँ। (वे मरुत्) वृष्टि करते हैं। अन्तरिक्ष मे सर्वत्र सञ्चरण करते है (और) मेघ (के साथ) अपने तेज को फैलाते है।

अमादेषा भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती।
दूरेदृशो ये चितयंत एमभिरंतर्महे विदथे येतिरे नरः॥२॥

**अन्वय**- (यथा) (उदकमध्ये) यती(प्राणिभि.) पूर्णा नौः व्यथिः यती (तथैव) (तत्) (नौः) न अमादेषा (मरुता) भियसा भूमि एजति। दूरेदृशाः ये (मरुतः) (स्व) एमभिः चितयन्ते नरः (ते) विदथे महे (हविर्लक्षणाय) (द्यावापृथिव्योः) अन्ते येतिरे।

**अनुवाद**- (जैसे-) (जल के मध्य) जाती हुयी (प्राणियो से) पूर्ण नौका व्यथित होती हुयी गमन करती है (वैसे ही) (इस नौका की) भाँति इन (मरुतो) के भय से पृथिवी काँपती है। दूर से दर्शनीय जो (मरुत) (अपने) गमन से जाते है नेता (वे) यज्ञ मे महती (हविभक्षण) के लिये (द्यावापृथिवी) के मध्य मे गमन करते है।

गवामिव श्रियसे शृंगमुत्तमं सूर्यो न चक्षू रजसो विसर्जने।
अत्या इव सुभ्वश्चारवः स्थन मर्या इव श्रियसे चेतथा नरः॥३॥

**अन्वय**- (मरुतः ! यूय) श्रियसे गवा शृङ्गम् इव उत्तम् (आभूषण धारयथ) रजसः विसर्जने सूर्यः चक्षुः न (तेजः) (धारयथ) नर. ! (मरुतः !) (यूयम्) अत्याः इव सम्वः चारव (च) स्थन (यूय) मर्याः इव श्रियसे चेतथ।

**अनुवाद**- (हे मरुतो । तुम) कान्ति के लिये गाय की सींग की भाँति उत्तम (आभूषण धारण करते हो।) प्रकाश फैलाने के लिये सूर्य की किरणों की भाँति (तेज धारण करते हो) हे नेता ! (मरुतो !) (तुम) अश्व की भाँति सुगमनशील (एव) दशर्नीय हो। (तुम) मनुष्यो की भाँति ऐश्वर्य के लिये सचेष्ट होओ।

को वो महांति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या।
यूय ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दावने॥४॥

**अन्वय**- मरुतः ! महतां वः महान्ति कः उदश्नवत् ? कः (वः) काव्या (उदश्नवत्) ? कः ह (वः) पौस्या (उदश्नवत्) ? यूय हि भूमि करण न रेजथ यत् यूय सुविताय दावने (वृष्टि) प्र भरध्वे।

**अनुवाद** - हे मरुतो ! महान तुम्हारी महानता को कौन प्राप्त कर सकता है ? कौन(तुम्हारे) स्तोत्रपाठ मे समर्थ है ? कौन (तुम्हारे) पुरुषत्व को प्राप्त कर सकता है ? तुम ही भूमि को किरण की भाँति कम्पित करते हो। जिससे तुम शोभन दान के लिए (वृष्टि) सम्पादित करते हो।

अश्वा इवेदरुषासः सबंधवः शूरा इव प्रयुधः प्रोत युयुधुः।

मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनंति वृष्टिभिः॥५॥

**अन्वय**- अश्वा. इव (शीघ्रगन्तारः) अरुषसः, सबन्धव· (एते मरुतः) प्रयुध शूराः इव प्र युयुधु.। सुवृधः मर्या इव नर (मरुत ) ववृधु। (ते) वृष्टिभि. सूर्यस्य चक्षु· प्र मिनन्ति।

**अनुवाद**- अश्व की भाँति (शीघ्रगामी) दीप्त, सुबन्धुयुक्त (ये मरुत) युद्ध करते हुये वीर की भाँति युद्ध करते है। सुवृद्ध मनुष्य की भाँति नेता (मरुत) प्रवृद्ध होते है। (वे) वृष्टि द्वारा सूर्य के नेत्र (तेज) को हिसित (आवृत) करते है॥

ते अज्येष्ठा अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः।

सुजातासो जनुषः पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन॥६॥

**अन्वय**- (मरुताना मध्ये कोऽपि) अज्येष्ठा., अकनिष्ठासः, (शत्रूणाम्) उद्भिदः अमध्यमास· (न अस्ति)। ते महसा (तेजसा) ववृधुः। जनुषा सुजातासः, पृश्निमातर. दिवः मर्याः (हिताः) (मरुतः) नः अच्छ आ जिगातन।

**अनुवाद**- (मरुतो के मध्य कोइ भी) अज्येष्ठ, अकनिष्ठ (शत्रु) भेदक अमध्यम (नही है)। वे महान (तेज) से बढते है। जन्म से सुजन्मा, पृश्निमाता वाले, दिव्य, मनुष्यों के (हितकारी) (मरुत) हमारी ओर आगमन करें।

वयो न ये श्रेणीः पप्तुरोजसांतान्दिवो बृहतः सानुनस्परि।

अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः॥७॥

**अन्वय**- ये श्रेणी· (सन्तः) वयः न ओजसा दिव· अन्तान् बृहतः (च) (पर्वतस्य) सानुनः परिपप्तुः। एषाम् अश्वास· पर्वतस्य नभनून् (उदकान्) अचुच्यवुः यथा (मनुष्याः देवाः) उभयोः विदुः।

**अनुवाद**- जो पक्ति-युक्त (होकर) पक्षियो की भाँति बल से अन्तरिक्ष-पर्यन्त (और) विशाल (पर्वत) के शिखर को परिव्याप्त करते हैं। इनके अश्व पर्वत के शब्दयुक्त ( जल) को गिराते है यह (मनुष्य और देव) दोनो जानते है।

मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतंता।

आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः॥८॥

**अन्वय**- द्यौ अदितिः नः वीतये (वृष्टि) (नः वीतये) सम् यन्ताम्। ऋषे ! रुद्रस्य (पुत्राः) मरुतः (त्वया) गृणाना· दिव्यम् एने (उदकस्य) कोशम् आ अचुच्यवु·।

**अनुवाद**- द्यावापृथिवी हमारे कल्याण के लिये (वृष्टि) करे। विचित्रप्रकाशदायिनी उषा (हमारे कल्याण के लिये) प्रयत्न करे. हे ऋषे ! रुद्र के (पुत्र) मरुत (तुम्हारे द्वारा) स्तुत होकर दिव्य इस (जल) का कोश गिरा रहे है।

## सूक्त - (६०)

***देवता***- मरुतोऽग्नामरुतौ वा, ***ऋषि***- श्यावाश्वात्रेय, ***छन्द***- त्रिष्टुप्, ७, ८, जगती।

ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः।

रथैरिव प्र भरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्याम्॥१॥

**अन्वय**- (अहं श्यावाश्वः) स्ववसम् अग्निम् नमोभि· इळे। इह (यज्ञे) प्रसृतः (त्वम्) न· कृत (स्तोत्रम्) विचयत्। रथै इव (वयम्) वाजयद्भिः (स्तोत्रैः) (अभ्यहितम्) प्र भरे। (वयम्) प्रदक्षिणात् मरुता स्तोमम् ऋध्याम्।

**अनुवाद**- (मै श्यावाश्व) रक्षक अग्नि की स्तोत्र के द्वारा स्तुति करता हूँ। इस (यज्ञ) मे प्रसन्न (तुम) हमारे कहे (स्तोत्र) को जानो। रथ की भाँति (हम) अन्नेच्छायुक्त (स्तोत्रो) से अपना अभीष्ट सम्पादित करते है। (हम) प्रदक्षिणा से मरुतो के स्तोत्रो का विस्तार करे।

आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु।

वना चिदुग्रा जिहते नि वो भिया पृथिवी चिद्रेजते पर्वतश्चित्॥२॥

**अन्वय**- ये रुद्राः (पुत्राः) मरुतः (सन्ति) (ते) श्रुतासु पृषतीसु (अश्वयुक्तासु) सुखेषु रथासु आ तस्थुः। उग्राः (मरुतः !) व· भिया चित् नि जिहते। पृथिवी चित् रेजते पर्वतः चित् (रेजते)।

**अनुवाद**- जो रुद्र (पुत्र) मरुत (है) (वे) प्रसिद्ध चितकबरे (अश्वों से युक्त) सुखद रथ मे आकर बैठते है। हे उग्र ! (मरुतो !) तुम्हारे भय से वन काँपते है। पृथिवी भी काँपती है। पर्वत भी (काँपता है)।

पर्वताश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः।

यत्क्रीळथ मरुत ऋष्टिमंत आप इव सध्र्यचो धवध्वे॥३॥

**अन्वय**- मरुतः ! व· स्वने महि वृद्ध पर्वत· चित् बिभय। दिवः रेजते सानुः चित् (रेजते) मरुतः ! (यूय) यत् क्रीळथ (तदा) ऋष्टिमन्तः (यूय) आपः इव सध्र्यञ्च धवध्वे।

**अनुवाद**- हे मरुतो ! तुम्हारे गर्जन से अत्यन्त विशाल पर्वत भी भयभीत हो जाते है। अन्तरिक्ष काँप जाता है। विशाल प्रदेश भी (काँपता है)। हे मरुतो ! (तुम) जब क्रीडा करते हो (तब) भालायुक्त (तुम) जल की भाँति एक साथ दौडते हो।

वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे।

श्रिये श्रेयांसस्तवसो रथेषु सत्रा महांसि चक्रिरे तनूषु॥४॥

**अन्वय-** रैवतास· (विवाहयोग्याः) वराः (यथा) हिरण्यैः (आभरणैः) स्वधाभि· (च) तन्वः अभि पिपिश्रे (तम् इव) श्रेयास तवस (मरुत·) तनूषु श्रिये रथेषु सत्रा महांसि (तेजांसि) चक्रिरे।

**अनुवाद-** धनवान (विवाहयोग्य) वर जिस प्रकार सुवर्ण (आभूषणो) से (और) जल से शरीर को अलकृत करते है (उसकी तरह) श्रेष्ठ (और) बलवान (मरुत) शरीर की सुन्दरता के लिये रथ मे एक साथ महान (तेज) धारण करते है।

अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय।

युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः॥५॥

**अन्वय-** अज्ञज्येष्ठास., अकनिष्ठासः भ्रातरः एते (मरुत·) सौभगाय सम् ववृधुः। युवा स्वपा· एवा (मरुताम्) पिता रुद्र सुदुघा (च) (माता) पृश्निः मरूद्भ्यः सुदिना (अकुरूताम्)।

**अनुवाद-** न ज्येष्ठ न कनिष्ठ भाई ये (मरुत) सौभाग्य के लिये साथ बढ़ते हैं। तरुण शोभनकर्मा इन (मरुतो) के पिता रुद्र (और) सुदोग्ध्री (माता) पृश्नि मरुतो के लिये सुन्दर दिन (उत्पन्न करे)।

यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ।

अतो नो रुद्रा उत वा न्वस्याग्ने वित्ताद्धविषो यद्यजाम॥६॥

**अन्वय-** सुभगासः ! मरुतः ! यूय (यत्) उत्तमे यत् वा मध्यमे (यत्) वा अवमे दिवि स्थ। रुद्राः अतः (स्थानत्रयात्) न (आगच्छत्)। अग्ने ! उत वा नु यत् (वय) यजाम (तत्) हविषः (त्वम्) वित्तात्।

**अनुवाद-** हे सौभग्यशाली ! मरुतो ! (तुम) जो उत्तम जो मध्यम अथवा जो निम्न लोक मे स्थित हो। हे रुद्रपुत्रो! उन (तीन स्थान) से हमारे समीप (आओ)। हे अग्ने ! आज जो (हम) यजन करे उस हवि को (तुम) जानो।

अग्निश्च यन्मरुतो विश्ववेदसो दिवो वहध्व उत्तरादधि ष्णुभिः।

ते मंदसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते॥७॥

**अन्वय-** विश्वेदेवसः ! मरुतः ! (यूयम्) अग्निः (च) दिवः उत्तरात् अधि स्नुभिः वहध्वे। मन्दसानाः धुनयः रिशादस ते (यूयम्) सुन्वते यजमानाय वाम (धनम्) धत्त।

**अनुवाद-** हे सर्वज्ञ ! मरुतो ! (तुम) (और) अग्नि द्युलोक के उत्कृष्टतर ऊपर प्रदेश मे रहते हो। हर्षित होते हुये, शत्रुकम्पक, शत्रुहिसक वे (तुम) अभिषावक यजमान को वरणीय (धन) प्रदान करो।

अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मदसानो गणश्रिभिः।

पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः॥८॥

**अन्वय**- वैश्वानर ! अग्ने ! प्रदिवा केतुना सजू (त्वम्) शुभयद्भिः ऋक्कभि, गणश्रिभि पावकेभि, विश्वम् (वृष्टया) इन्वेभि आयुभि मरूद्भि· (सह) मन्दसान सोम पिब।

**अनुवाद**- हे वैश्वानर! अग्ने ! तेजस्वी ज्वालाओ से युक्त (तुम) शोभमान, पूज्य, गणो का आश्रय लेने वाले, पवित्र, सबको (वृष्टि द्वारा) तृप्त करने वाले दीर्घजीवी मरुतों के (साथ) मस्त होते हुये सोम पियो।

## सूक्त - (६१)

**देवता**- मरुत, शशीयसी, पुरुमीळ्ह, तरन्त, रथवीति, **ऋषि**- श्यावाश्वात्रेय, **छन्द**- गायत्री, अनुष्टुप्, बृहती।

के ष्ठा नरः श्रेष्ठतमा य एकएक आयय। परमस्याः परावतः॥१॥

**अन्वय**- नर·। श्रेष्ठतमा· (यूय) के स्थः ? ये एकः एकः परमस्याः परावतः (देशात्) आयया।

**अनुवाद**- हे नेता ! श्रेष्ठतम (तुम) कौन हो ? जो एक एक करके अत्यन्त दूर (देश) से आते हो।

क्वा१वोऽश्वाः३भीशवः कथ शेक कथा यय। पृष्ठे सदो नसोर्यमः॥२॥

**अन्वय**- मरुतः ! (अश्वस्य) पृष्ठे सदः नसोः यमः वः अश्वाः क्व ? अभीशिवः क्व ?(यूय) कथ शेक ? कथा यया ?

**अनुवाद**- हे मरुतो ! (अश्व के) पृष्ठ पर बैठे, नासिका के नियामक तुम्हारे अश्व कहाँ है ? लगाम कहाँ है ? (तुम) कैसे समर्थ हो ? कैसे जाते हो ?

जघने चोद एषां वि सक्थानि नरो यमुः। पुत्रकृथे न जनयः॥३॥

**अन्वय**- एषाम् (अश्वानाम्) जघने चोदः (कशा) (वर्तते)। पुत्रकृक्षे जनयः न अश्वस्य सक्थानि नरः (मरुतः) यमुः।

**अनुवाद**- इन (अश्वो) के जाँघ पर प्रेरक (चाबुक) (पडता है)। पुत्र उत्पन्न करने वाली माता की भाँति नेता (मरुत) (अश्वो के) जाँघो का नियमन करते है।

परा वीरास एतन मर्यासो भद्रजानयः। अग्नितपो यथासथ॥४॥

**अन्वय**- वीरास ! मर्यासः ! भद्रजनयः । (मरुत· !) अग्नितपः (ताम्रादयः) यथा (दीप्ताः) (यूय) परा इतन असथ।

**अनुवाद**- हे वीर ! जनहितकारी ! शोभनजन्मा ! (मरुतो !) अग्नि द्वारा तप्त (ताम्रादि) की भाँति (दीप्त) (तुम) दूर से यहाँ आओ।

सनत्साश्व्यं पशुमुत गव्यं शतावयम्। श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत्॥५॥

**अन्वय**- या श्यावाश्वस्तुताय वीराय तरन्ताय दोः उपबबृहत् सा (देवी तरन्तमहिषी शशीयसी) नः अश्वयम्, पशुम्, गव्यम्, शतावयम् उत् सनत्।

**अनुवाद**- जो श्यावाश्व द्वारा स्तुत वीरतरन्ता के निये भुजाये फैलाती है वह (देवी तरन्तमहिषी शशीयसी) हमे अश्वसमूह, पशुसमूह, गोसमूह, विभिन्न समूह प्रदान करेम्।

उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी। अदेवत्रादराधसः॥६॥

**अन्वय**- अदेवत्रात् अराधसः पुसः उत त्वा शशीयसी वरस्यी भवति।

**अनुवाद**- देवताओ की आराधना न करने वाले, दान न देने वाले पुरुष की अपेक्षा तुम शशीयसी श्रेष्ठ हो।

वि या जानाति जसुरि वि तृष्यंत वि कामिनम्। देवत्रा कृणुते मनः॥७॥

**अन्वय**- या जसुरि वि जानाति (या) तृष्यन्त वि (जानाति) (या) (धनादि-) कामिनं वि (जानाति) (सा देवी शशीयसी) (नः) मन देवत्रा कृणुते।

**अनुवाद**- जो व्यथित को जानती है (जो) तृषित को (जानती है) (जो धनादि) कामी को (जानती है)। (वह देवी शशीयर्सी) (हमारे) मन को देवकामी करे।

उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः। स वैरदेय इत्समः॥८॥

**अन्वय**'- उत घ (शशीयस्याः) नेमः पुमान (तरन्तः) अस्तुतः इति पणः (अहम्) ब्रुवे। सः (तरन्तः) वैरदेये (धन) समः दाति इत्।

**अनुवाद**- और (शशीयसी के) अर्धांग पुरुष (तुरन्त) अस्तुत रहा यह स्तोता (मै) कहता हूँ। वह (तरन्त) दान मे प्राप्त (धन) को समान रूप से देता है।

उत मेऽरपद्युवतिर्ममंदुषी प्रति श्यावाय वर्तनिम्।
वि रोहिता पुरुमीळ्हाय येमतुर्विप्राय दीर्घयशसे॥६॥

**अन्वय**- उत युवतिः (शशीयसी) प्रति ममन्दुषी में श्यावाश्वाय वर्तनिम् अरपत्। (तस्याः) रोहिता (अश्वौ) (मा) विप्राय दीर्घयशसे पुरुमीळ्हाय येमतु·।

**अनुवाद**- और युवति (शशीयसी) प्रसन्न होती हुयी मुझ श्यावाश्व के लिये मार्ग प्रशस्त करती है। (उसके) लोहित अश्व (मुझे) विप्र यशस्वी पुरुमीळ्ह के समक्ष ले जाते है।

यो मे धेनूनां शतं वैददश्विर्यथा ददत्। तरंत इव मंहना॥१०॥

**अन्वय**- वैदत् अश्विः य· (पुरुमीळ्ह) यथा में शत धेनुनां (धनम्) (ददत्) (तथा) इव तरन्तः (मे) महना (धनम्) ददत्।

**अनुवाद**- विददश्व पुत्र जिस (पुरुमीळ्ह) ने जिस प्रकार मुझे सौ गायो का (धन) (दिया) (उसी) प्रकार तरन्त ने (मुझे) महनीय (धन) दिया।

यईं वहंत आशुभिः पिबंतो मदिरं मधुं। अत्र श्रवांसि दधिरे॥११॥

**अन्वय**- ये ईम् (यज्ञे) आशुभिः अश्वैः वहन्ते मधु मदिर (सोमरस) पिबन्तः (ते मरुतः) अत्र श्रवासि दधिरे।

**अनुवाद**- जो इस (यज्ञ) मे तीव्रगामी अश्वो द्वारा लाये जाते है। मधुर मादक (सोमरस) का पान करते हुये (वे मरुत) यहाँ यश प्राप्त करते है।

येषां श्रियाधि रोदसी विभ्राजंते रथेष्वा। दिवि रुक्मा इवोपरि॥१२॥

**अन्वय**- येषा श्रिया रोदसी अधि (इष्ठितः भवथ) (ते मरुतः) उपरि दिवि रुक्मः (आदित्यः) इव रथेषु आ विभ्राजन्ते।

**अनुवाद**- जिनकी कान्ति से द्यावापृथिवी (व्याप्त है) (वे मरुत) ऊपर द्युलोक मे प्रकाशित (आदित्य की) भाँति रथ पर द्योतमान होते हैं।

युवा स मारुतो गणस्त्वेषरथो अनेद्यः। शुभंयावाप्रतिष्कुतः॥१३॥

**अन्वय** स मारूतः गणः युवा, त्वेषरथः, अनेद्यः शुभयावा, अप्रतिस्कुत (अस्ति)।

**अनुवाद**- वह मरुतो का गण युवा, दीप्त, रथयुक्त, अनिन्द्य, शुभगामी, अप्रतिहतगति (है)।

को वेद नूनमेषां यत्रा मदंति धूतयः। ऋतजाता अरेपसः॥१४॥

**अन्वय**- यत्र धूतयः ऋतजाताः अरेपसः (मरुतः) मदन्ति एषा (मरुता) (तत् स्थाने) कः नून वेद ?

**अनुवाद**- जहाँ शत्रुकम्पक, सत्यरक्षक, निष्पाप (मरुत) हर्षित होते है। इन (मरुतो) के (उस स्थान) को कौन जानता है ?

यूयं मर्तं विपन्यवः प्रणेतारं इत्था धिया। श्रोतारो यामहूतिषु॥१५॥

**अन्वय**- विपन्यवः ! (मरुतः !) यूयम् इत्था (अनुग्रहयुक्तम्) धिया मर्त प्रणेतारः (तस्य) यामाहूतिषु श्रोतारः।

**अनुवाद**- हे स्तुतिकामी ! (मरुतो !) तुम इस (अनुग्रहयुक्त) बुद्धि से मनुष्य को प्रेरित करो (उसके) यज्ञाह्वान को सुनो।

ते नो वसूनि काम्या पुरुश्चंद्रा रिशादसः। आ यज्ञियासो ववृत्तन॥१६॥

**अन्वय**- रिशादसः ! यज्ञियासः ! (मरुतः !) पुरुश्चन्द्राः ते (यूयम्) नः काम्या वसूनि आ ववृत्तन।

**अनुवाद**- हे शत्रुहिसक! पूज्य ! (मरुतो !) अत्यन्त आह्लादक वे (तुम) हमे स्पृहणीय धन प्रदान करो।

एतं मे स्तोममूर्म्ये दार्भ्याय परा वह। गिरो देवि रथीरिव॥१७॥

**अन्वय**- उर्म्ये ! देवि ! एत मे स्तोम गिरः दार्भ्याय परा रथी इव (मरूद्भ्यः) वह।

**अनुवाद**- हे रात्रिदेवि ! इस मेरे स्तोत्र की वाणी को श्यावाश्व से दूर रथ की भाँति (मरुतो के लिये) ले जाओ।

उत मे वोचतादिति सुतसोमे रथवीतौ। न कामो अप वेति मे॥१८॥

**अन्वय**- (उर्म्ये !) सुतसोमे रथवीतौ मे इति वोचतात् (यत्) (तत्पुत्रीविषय.) मे काम. न अपवेति।

**अनुवाद**- (हे रात्रिदेवि !) सोमयाग मे रथवीति से मेरा यह निवेदन करना (कि) (उसकी पुत्री विषयक) मेरी कामना कम नहीं हुयी है।

एष क्षेति रथवीतिर्मघवा गोमतीरनु। पर्वतेष्वपश्रितः॥१६॥

**अन्वय**- एषः मघवा रथवीतिः गोमतीः अनु (तीरे) क्षेति (ते) पर्वतेषु अपश्रितः (सन्ति)।

**अनुवाद**- यह दानी रथवीति गोमती के (तट पर) निवास करते है। (उन्होने) पर्वत मे आश्रय (लिया है)।

## सूक्त - (६२)

*देवता*- मित्रावरुणौ, ***ऋषि***- श्रुतविदात्रेय, ***छन्द***- त्रिष्टुप्।

ऋतेन ऋतमपिहित ध्रुवं वा सूर्यस्य यत्र विमुचत्यश्वान्।

दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यम्॥१॥

**अन्वय**- (मित्रावरुणौ !) यत्र (स्तोताः) सूर्यस्य अश्वान् विमुचन्ति यत्र दश शता (रश्मय.) सह तस्थुः। ऋतेन अपिहितम् ऋत देवाना वपुषां वाम् श्रेष्ठम् एक तत् (मण्डलम्) (वयम्) अपश्यम्।

**अनुवाद**- (हे मित्रावरुणौ !) जहाँ (स्तोता) सूर्य के अश्व को मुक्त करते है। जहाँ हजारो (रश्मियाँ) एक साथ स्थित है जल से ढँके सत्यभूत देवताओ मे तेजोमय तुम्हारे श्रेष्ठ अद्वितीय उस (मण्डल) को (हमने) देखा है।

तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुहे।

विश्वाः पिन्वथः स्वसरस्य धेना अनु वामेकः पविरा ववर्त॥२॥

**अन्वय**- मित्रावरुणा ! वाम् तत् महित्व सु (प्रशस्तम्)। त्येन ईर्मा (आदित्यः) अहभिः तस्थुषीः (अप.) दुदुहे (युवाम्) स्वसरस्य (आदित्यस्य) धेनाः पिन्वथः। वा (रथस्य) पवि. अनु आ वर्तते।

**अनुवाद**- हे मित्रावरुणौ ! तुम दोनो का वह महत्व अत्यन्त (प्रशसनीय) हैं। (जिससे) सततगामी (आदित्य) दैनिक गति से स्थावर (जल) का दोहन करता है। तुम दोनो के (रथ का) अद्वितीय चक्र क्रम से परिभ्रमण करता है।

अधारयतं पृथिवीमुत द्या मित्रराजाना वरुणा महोभिः।

वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू॥३॥

**अन्वय**- राजाना ! मित्रावरुणा ! (युवाम्) महोभिः पृथिवी द्याम् उत् अधारयतम्। औषधीः वर्धयतम्। गाः पिन्वतम्। जीरदानू! (युवाम्) वृष्टिम् अव सृजतम्।

**अनुवाद**- हे तेजस्वी ! मित्रावरुणौ ! (तुमने) तेज से पृथ्वी और द्युलोक को धारण किया। ओषधि को बढाया। गाय आदि को पुष्ट किया। हे शीघ्रदानी । (तुम दोनो) वर्षा को नीचे प्रेरित करते हो।

आ वामश्वासः सुयुजो वहतु यतरश्मय उप यंत्वर्वाक्।

घृतस्य निर्णिगनु वर्तते वामुप सिंधवः प्रदिवि क्षरंति॥४॥

**अन्वय**- (मित्रावरुणा !) सुयुजः अश्वासः वाम् आ वहन्तु। यतरश्मयः (अश्वाः) अर्वाक् उप यन्तु। घृतस्य निर्णिक् वाम् अनु वर्तते। (युवरोनुग्रहात्) प्रदिवि सिन्धवः उप क्षरन्ति।

**अनुवाद**- (हे मित्रावरुणौ !) सुनियोजित अश्व तुम्हारा वहन करे। रस्सी खीचे जाने पर (अश्व) हमरी ओर आये। जल का रूप तुम्हारा अनुवर्तन करता है। (तुम्हारे अनुग्रह से) द्युलोक से नदियाँ बहती है।

अनु श्रुताममतिं वर्धदुर्वी बर्हिरिव यजुषा रक्षमाणा।

नमस्वंता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वंतः॥५॥

**अन्वय**- घृतदक्षा ! मित्र ! वरुण ! (युवाम्) श्रुताम् अमतिम् अनु वर्धात्। यजुषा (मन्त्रैः) (रक्षितम्) बर्हिः इव उर्वीम् रक्षमाणा नमस्वन्ता (युवाम्) गर्ते अधि (स्थितौ) इळासु अन्तः आसाथे।

**अनुवाद**- हे बलधारक ! मित्र ! वरुण ! (तुम) विश्रुत रूप को बढाते हो। यजुष् के (मन्त्रो द्वारा रक्षित) यज्ञ की भाँति पृथिवी की रक्षा करते हुये अन्नयुक्त (तुम दोनो) रथ पर (बैठकर) यज्ञ के मध्य बैठते हो।

अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वंतः।

राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ॥६॥

**अन्वय**- (मित्रा !) वरुणा ! अक्रविहस्ता (युवाम्) यम् (यजमानम्) इळासु अन्तः त्रासाथे (तस्मै) सुकृते (यजमानाय) परस्पा (भवथ)। राजाना अहृणीयमाना (युवाम्) द्वौ सह क्षत्रं सहस्रस्थूण (च) (गृह) बिभृथः।

**अनुवाद**- (हे मित्र !) वरुण ! दानीहस्तयुक्त (तुम) जिस (यजमान) की यज्ञ के मध्य रक्षा करते हो (उस) सुकर्ता (यजमान) के पालक (होओ)। दीप्तिवान क्रोध न करते हुए (तुम) दोनो साथ मे धन (और) सहस्रस्तम्भयुक्त (घर) को धारण करते हो।

हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्राजते दिव्य१श्वाजनीव।

भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य॥७॥

**अन्वय**- (मित्रावरुणयोः) (रथः) हिरण्यनिर्णिक् (अस्ति) अस्य स्थूणा अयः (सन्ति) (तादृशः रथः) अश्वाजनी इव दिवि विभ्राजते। (वयम्) तिल्विले भद्रे क्षेत्रे निमिता मध्वः (सोमरसम्) अधिगर्त्यस्य वा सनेम।

**अनुवाद**- (मित्रावरुण का) (रथ) हिरण्यरूप (है) इसके स्तम्भादिहिरण्यमय (है) (ऐसा रथ) व्यापक मेघ की भाँति अन्तरिक्ष मे शोभित होता है। (हम) यज्ञ के कल्याणकर क्षेत्र मे स्थित मधुर (सोमरस) को रथ के ऊपर स्थापित करे।

हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य।

आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च॥८॥

**अन्वय**- मित्र ! वरूण। ! (युवाम्) उषसः व्युष्टौ सूर्यस्य उदिता हिरण्यरूपम् अयः स्थूण गर्तम् आ रोहथः अतः अदिति दिति च चक्षाते।

**अनुवाद**- हे मित्र ! वरुण ! (तुम) उषा के आगमन (एव) सूर्य के उदित होने पर स्वर्णरूप स्वर्णमयी कीलो से युक्त रथ पर आरोहण करते हो। इससे अदिति और दिति को देखते हो।

यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा।

तेन नो मित्रावरुणावविष्टं सिषासंतो जिगीवांसः स्याम॥९॥

**अन्वय**- सुदानू ! भुवनस्य गोपा ! मित्रावरुणौः ! (युवाम्) यत् बंहिष्ठ नातिविधे अच्छिद्रं (सुखम् अस्ति) तत् शर्म (धारयथः)। तेन न अविष्टम्। (वयम्) सिसान्तः जिगीवांस· (च) स्याम।

**अनुवाद**- हे शोभनदानी ! विश्वरक्षक ! मित्रावरुणौ ! (तुम) जो व्याघातरहित, अच्छिन्न बहुतम (सुख है) वह सुख (धारण करो) उससे हमारी रक्षा करो। (हम) धनेच्छुक (और) जयेच्छु हो।

## सूक्त - (६३)

***देवता***- मित्रावरुणौ, ***ऋषि***- अर्चनानात्रेय, ***छन्द***- जगती।

ऋतस्य गोपावधि तिष्ठथो रथं सत्यधर्माणा परमे व्योमनि।

यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः॥१॥

**अन्वय**- ऋतस्य गोपौ ! मित्रावरुणा ! सत्यधर्माणा (युवाम्) परमे व्योमनि रथम् अधि तिष्ठथः। अत्र (यज्ञे) युव यम् अवथ. तस्मै (यजमानाय) दिवः मधुमत् वृष्टिः पिन्वते।

**अनुवाद**- हे सत्यरक्षक ! मित्रावरुणौ ! सत्यधर्म वाले (तुम) निरतिशय आकाश में रथ पर बैठते हो। इस (यज्ञ) मे (तुम) जिसकी रक्षा करते हो उस (यज्ञमान) के लिये द्युलोक से मधुर (जल) वृष्टि करते हो।

सम्राजावस्य भुवनस्य राजथो मित्रावरुण विदथे स्वर्दृशा।

वृष्टिं वां राधो अमृतत्वमीमहे द्यावापृथिवी वि चरंति तन्यवः॥२॥

**अन्वय**- मित्रावरुणा ! स्वर्दृश सम्राजौ (युवाम्) (अस्मद्) विदथे अस्य भुवनस्य राजथः। (वयम्) वाम् वृष्टि राध अमृतत्त्वम् (च) ईमहे। (युवयोः) तन्यव· (रश्मयः) द्यावापृथिवी वि चरन्ति।

**अनुवाद**- हे मित्रावरुणा ! स्वर्गदृष्टा सुदीप्त (तुम) (हमारे) यज्ञ मे इस लोक का शासन करते हो। (हम) तुमसे वृष्टिरूप धन (एव) अमृतत्त्व की प्रार्थना करते है। (तुम्हारे द्वारा) विस्तारित (रश्मियाँ) द्यावापृथिवी मे विचरण करती है।

सम्राजा उग्रा वृषभा दिवस्पती पृथिव्या मित्रावरुणा विचर्षणी।
चित्रेभिरभ्रैरुप तिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया॥३॥

**अन्वय**- मित्रावरुणा ! सम्राजौ उग्रा वृषभा दिवः पती पृथिव्या· (पती) विचर्षणाी (युवाम्) चित्रेभिः। अभ्रैः (सह) रवम् उप तिष्ठथः। (युवाम्) (स्व-) असुरस्य मायया द्याम् वर्षयथः।

**अनुवाद**- हे मित्रावरुणौ ! सुशोभित उग्र, बलवान, द्युलोक के स्वामी, पृथिवी के (स्वामी) सर्वदृष्टा (तुम) चित्रित मेघो (के साथ) गर्जना करते हुये रहते हो। (तुम) (अपने) बल के सामर्थ्य से द्युलोक से वृष्टि करो।

माया वां मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधम्।
तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा मधुमंत ईरते॥४॥

**अन्वय**- मित्रावरुणा ! वाम् माया ज्योतिः सूर्यः दिवि श्रिता (अस्ति)। (तस्य) आयुध चित्र (किरण) (सर्वत्र) चरति। तम् (सूर्यम्) (युवाम्)अभ्रेण वृष्ट्या (च) गूहथः। (तदा) पर्जन्य ! (त्वत्तः) मधुमन्तः (जलस्य) द्रप्साः ईरते।

**अनुवाद**- हे मित्रावरुणौ ! तुम्हारे सामर्थ्य से दीप्त सूर्य द्युलोक मे स्थित (है)। (उसकी) आयुधरूप सुन्दर (किरणे) (सर्वत्र) विचरण करती है। उस (सूर्य) को (तुम) मेघ (और) वृष्टि द्वारा छिपा देते हो (तब) हे पर्जन्य ! (तुमसे) मधुर (जल) की धाराये बहती है।

रथं युंजते मरुतः शुभे सुखं शूरो न मित्रावरुणा गविष्टिषु।
रजांसि चित्रा वि चरंति तन्यवो दिवः सम्राजा पयसा न उक्षतम्॥५॥

**अन्वय**- मित्रावरुणा । शूर. न मरुतः शुभ सुख रथम् (अश्वैः) युञ्जते गविष्टिषु (च) तन्यवः (मरुतः) चित्रा रजासि विचरन्ति। सम्राजा । (मित्रावरुणौ !) (युवा मरुतः च) दिवः पयसा नः उक्षतम्।

**अनुवाद**- हे मित्रावरुणौ ! वीर की भाँति मरुत कल्याण के लिये सुखकर रथ को (अश्वो से) संयुक्त करते है (और) वृष्टि के निमित्त व्यापक (मरूद्गण) विचित्र लोकों मे विचरण करते है। हे सुशोभित ! (मित्रावरुणौ !) (तुम और मरूद्गण) द्युलोक के जल से हमे सिञ्चित करो।

वाचं सु मित्रावरुणाविरावती पर्जन्यश्चित्रां वदति त्विषीमतीम्।

अभ्रा वसत मरुतः सु मायया द्यां वर्षयतमरुणामरेपसम्॥६॥

**अन्वय**- मित्रावरुणौ ! (युवरोरनुग्रहात्) पर्जन्य. सु इरावती चित्रा त्विषिमती वाच वदति। मरुतः मायया अभ्रा सु वसत। (युवा मरूद्‌भि· सह) अरुणाम् अरेपस द्याम् वर्षयतम्।

**अनुवाद**- हे मित्रावरुणौ ! (तुम्हारे अनुग्रह से) मेघ शोभन अन्न प्रदायक विचित्र दीप्त शब्द (गर्जन) करता है। मरूद्‌गण सामर्थ्य से मेघ को सु आच्छादित करते है। (तुम मरूद्‌गणो के साथ) अरुणवर्ण निष्पाप द्युलोक से वृष्टि करो।

धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया।

ऋतेन विश्व भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्य रथम्॥७॥

**अन्वय**- विपश्चिता ! मित्रावरुणा ! (युवाम्!) असुरस्य (मेघस्य) मायया (वृष्ट्यादिरूपेण च) धर्मणा व्रता रक्षेथे। ऋतेन विश्व भवुन वि राजथ.। (यूयम्) चित्र्य, रथ सूर्य दिवि धत्थः।

**अनुवाद**- हे विद्वान ! मित्रावरुणौ ! (तुम) बलशाली (मेघ) के सामर्थ्य (और वृष्ट्यादिरूप) धर्म से यज्ञ की रक्षा करते हो। सत्य से समस्त लोगो को सुशोभित करते हो। (तुम) पूज्य, वेगवान सूर्य को द्युलोक मे धारण करो।

## सूक्त - (६४)

**देवता**- मित्रावरुणौ, **ऋषि**- अर्चनानसात्रेय, **छन्द**- अनुष्टुप्, ६ पंक्ति।

वरुणं वो रिशादसमृचा मित्र हवामहे। परि व्रजेव बाह्वोर्जगन्वांसा स्वर्णरम्॥१॥

**अन्वय**- व्रजा इव बाहवो· परि जगन्वासा स्वर्णर रिशादस मित्र वरुण वः (वयम्) ऋचा हवामहे।

**अनुवाद**- गोयूथ के समान बल से चारो ओर गमन करने वाले, स्वर्ग के नेता, शत्रुहिसक मित्र वरुण तुम दोनो का (हम) मन्त्र द्वारा आह्वान करते है।

ता बाहवा सुचेतुना प्र यंतमस्मा अर्चते। शेवं हि जार्यं वां विश्वासु क्षासु जोगुवे॥२॥

**अन्वय**- (मित्रावरुणौ !) सुचेतुना ता (युवा) बाहवा अर्चते अस्मै प्र यन्तम्। हि वाम् जार्य शेव विश्वासु क्षासु जोगुवे।

**अनुवाद**- (हे मित्रावरुणौ !) सुप्रज्ञापक उन (अपने) बाहुओं को स्तुति करने वाले मेरे लिये फैलाओ। क्योकि तुम्हारा स्तवनीय सुख समस्त स्थान मे व्याप्त है।

यन्नूनमश्यां गतिं मित्रस्य याया पथा। अस्य प्रियस्य शर्मण्यहिंसानस्य सश्चिरे॥३॥

**अन्वय**- यत् (वयम्) नुन गतिम् अश्याम् (तदा) मित्रस्य (प्रदर्शित) पथा यायाम्। अहिसानस्य प्रियस्य अस्य (मित्रस्य) शर्मणि (न·) सश्चिरे।

**अनुवाद**- जब हम इस समय गति प्राप्त करे (तब) मित्र के (प्रदर्शित) मार्ग से गमन करे। अहिसक, प्रिय इस (मित्र) का सुख (हमे) प्राप्त हो।

युवाभ्यां मित्रावरुणोपमं धेयामृचा। यद्ध क्षये मघोनां स्तोतॄणां च स्पूर्धसे॥४॥

**अन्वय**- मित्रावरुणा ! युवाभ्या (प्रदत्तम्) उपमम् (अहम्) ऋचा धेयाम्। यत् ह च (धनेन) मघोना स्तोतॄणा क्षये स्पूर्धसे।

**अनुवाद**- हे मित्रावरुणौ ! तुम्हारे द्वारा (प्रदत्त) धन (मै) स्तुति से धारण करता हूँ। और जिस (धन) से धनी स्तोताओ के घर मे स्पर्धा होगी।

आ नो मित्र सुदीतिभिर्वरुणश्च सधस्थ आ। स्वे क्षये मघोनां सखीनां च वृधसे॥५॥

**अन्वय**- मित्र ! वरुण ! च (युवाम्) स्वे वृधसे मघोना सखीना नः सधस्थे सुदीतिभिः आ (गच्छतम्)।

**अनुवाद**- हे मित्र ! और वरुण ! (तुम) अपनी वृद्धि के लिये धनी सखा हमारे यज्ञ मे सुदीप्ति से (आओ)।

युव नो येषु वरुण क्षत्रं बृहच्च बिभृथः। उरु णो वाजसातये कृत राये स्वस्तये॥६॥

**अन्वय**- वरुणा ! युवम् येषु (यज्ञेषु) नः उरू बृहत् च क्षत्रं बिभृथः (तस्य उपयोगः) नः वाजसातये राये स्वतस्तये च कृतम्।

**अनुवाद**- हे मित्रावरुणौ ! तुम जिस (यज्ञ) मे हमे विशाल और बडा बल धारण करवाते हो। (उसका उपयोग) हमारे अन्नलाभ, धन एव कल्याण के लिये करो।

उच्छंत्यां मे यजता देवक्षत्रे रुशद्गवि।
सुतं सोमं न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसम्॥७॥

**अन्वय**- नरा ! (मित्रावरुणा !) रूशद्गावि अर्चनानस बिभ्रतौ यजता (युवाम्) उच्छन्त्या (च) देवक्षत्रे मे सुत सोम (पातु) हस्तिभि पट्टभिः (च) न (अश्वैः) आ धावतम्।

**अनुवाद**- हे नेता ! (मित्रावरुणौ !) अर्चनानस को धारण करते हुये यजनीय (तुम) उषा काल में किरणो के दीप्त होने पर देवयजन मे मेरे द्वारा अभिषुत सोम का (पान करने के लिये) हाथ (और) पैर के समान (अश्वो) द्वारा दौडकर आओ।

## सूक्त - (६५)

**देवता**- मित्रावरुणौ, **ऋषि**- रातहव्यात्रेय, **छन्द**- अनुष्टुप्, ६ पंक्ति।

यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः। वरुणो यस्य दर्शतो मित्रो वा वनते गिरः।।१।।

**अन्वय**- यः (स्तोता) (मित्रावरुणयोः स्तुतिं) चिकेत सः सक्रतुः (अस्ति)। यस्य गिरः दर्शतः वरुणः मित्र वा वनते सः देवत्रा नः ब्रवीतु।

**अनुवाद**- जो (स्तोता) (मित्रावरुण की स्तुति को) जानता है वह शोभनकर्मा (है) जिसकी स्तुति दर्शनीय वरुण और मित्र ग्रहण करते है वह देवताओ के मध्य हमे उपदेश दे।

ता हि श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा।

ता सत्पतीऋतावृधं ऋतावाना जनेजने।।२।।

**अन्वय**- ता हि (मित्रावरुणा) श्रेष्ठवर्चसा राजाना दीर्घश्रुत्तमा (स्तः) ता सत्पती ऋतवृधा जने जने ऋतावना (स्त)।

**अनुवाद**- वे ही (मित्रावरुण) प्रशस्त तेजस्वी, ईश्वर, दूर से सुने जाने वाले (है)। वे सत्पती, यज्ञवर्धक, प्रत्येक लोगो मे सत्य फैलाने वाले है।

ता वामियानोऽवसे पूर्वा उप ब्रुवे सचा।

स्वश्वासः सु चेतुना वाजाँ अभि प्र दावने।।३।।

**अन्वय**- (मित्रावरुणौ !) ता पूर्वो युवाम् इयान. (अह) अवसे सचा उप ब्रुवे। स्वश्वासः (वयमात्रेयः) वाजान् दावने सुचेतुना (वाम्) अभि प्र (स्तुमः)।

**अनुवाद**- (हे मित्रावरुणौ !) इन पूर्व तुम्हारी गमनशील (मै) रक्षा के लिय एक साथ स्तुति करता हूँ। अश्वयुक्त (हम अत्रि) अन्नदान के लिये सुमति (तुम्हारी) (स्तुति करते है)।

मित्रो अंहोश्चिदादुरु क्षयाय गातुं वनते।

मित्रस्य हि प्रतूर्वतः सुमतिरस्ति विधतः।।४।।

**अन्वय**- मित्रः अहोः चित् आत् उरू क्षयाय गातु वनते। प्रतूर्वतः विधतः मित्रस्य सुमतिः हि अस्ति।

**अनुवाद**- मित्र पापी को भी विशाल घर का उपाय प्रदान करते है। हिसक परिचारक के लिये मित्र की शोभनबुद्धि है।

वयं मित्रस्यावसि स्याम सप्रथस्तमे। अनेहसस्त्वोतयः सत्रा वरुणाशेषसः।।५।।

**अन्वय**- वयम् मित्रस्य सप्रथस्तमे अवसि स्याम। (मित्रः !) त्वा ऊतयः अनेहसः (वयम्) वरुणशेषसः सत्रा (निवसाम)।

**अनुवाद**- हम मित्र के सर्वव्यापी सरक्षण मे हो। (हे मित्र !) तुम्हारे द्वारा रक्षित निष्पाप (हम) वरुण के पुत्रस्वरूप होकर साथ (रहे)।

युव मित्रेमं जन यतथः सं च नयथः।

मा मघोनः परि ख्यत मो अस्माकमृषीणां गोपीथे न उरुष्यतम्॥६॥

**अन्वय**- मित्रा ! युवम् इमम् (मां) जन (प्रति) यतथः। (मां) सम् च नयथः। मघोनः (अस्मान् युवा) मा परिख्ययतम्। अस्माकम् ऋषीणा मा (परिख्यतम्) गोपीतये (यज्ञे) नः उरुष्यतम्।

**अनुवाद**- हे मित्रावरुणौ ! तुम इस (मुझ) स्तोता के (समक्ष) आते हो और (मुझे) भली भाँति ले जाते हो। धनवान (हमारा) (तुम) परित्याग न करना। हमारे पुत्रो का (परित्याग) न (करना)। सुतसोम (याग) मे हमारी रक्षा करना।

## सूक्त - (६६)

***देवता***- मित्रावरुणौ, ***ऋषि***- रातहव्यात्रेय, ***छन्द***- अनुष्टुप्।

आ चिकितान सुक्रतू देवौ मर्त रिशादसा। वरुणाय ऋतपेशसे दधीत प्रयसे महे॥१॥

**अन्वय**- (स्तुति) चिकितान ! मर्त ! (यूय) सक्रतू रिशादसा देवौ (मित्रावरुणौ) आ (ह्वय)। ऋतपेशसे (च) प्रयसे महे वरुणाय (हवि ) दधीत।

**अनुवाद**- हे (स्तुति) जानने वाले ! मनुष्यो ! (तुम) सुज्ञानी शत्रुहिसक देवो (मित्रावरुणौ) का आह्वान (करो)। (और) जलरूप, हवियुक्त, महान वरुण के लिये (हवि) धारण करो।

ता हि क्षत्रमविह्रुतं सम्यगसुर्य१ माशते। अध व्रतेव मानुषं स्व१र्ण धायि दर्शतम्॥२॥

**अन्वय**- (मित्रावरुणौ !) ता हि अविह्रुतम् असुर्य क्षत्र सम्यक् अशाते। अध व्रता मानुषम् इव स्वः न (वा) दर्शत (तत्) (बल) (यज्ञे) धायि।

**अनुवाद**- (हे मित्रावरुणौ !) तुम्हारा अहिस्य असुर विघातक बल सम्यक् व्याप्त होता है। इसलिये कर्मठ मनुष्य की भाँति (अथवा) सूर्य के समान दर्शनीय (उस) (बल को) (यज्ञ मे) धारणा करो।

ता वामेषे रथानामुर्वी गव्यूतिमेषाम्। रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे॥३॥

**अन्वय**- (मित्रावरुणौ !) ता (प्रसिद्धौ) वाम् रथानाम् एषे गव्यूतिम् उर्वीम् (कुरूतम)। रातहव्यस्य सुस्तुति दधक् (युवयोः) (अहम्) स्तोमैः मनामहे।

**अनुवाद**- (हे मित्रावरुणौ !) वह (प्रसिद्ध) तुम रथ के जाने के लिये मार्ग को व्यापक (करो)। रातहव्य की सुस्तुति धारण करने वाले (तुम्हारी) (मै) स्तोत्रो द्वारा स्तुति करता हूँ।

अधा हि काव्या युव दक्षस्य पूर्भिरद्भुता। नि केतुना जनाना चिकेथे पूतदक्षसा॥४॥

**अन्वय**- अद्भुता ! पूतदक्षसा ! (मित्रावरुणा !) दक्षस्य (मम) पूर्भि काव्या (युवाम्) (स्व) केतुना जानाना (स्तोत्रम्) अघ हि नि चिकेथे।

**अनुवाद**- हे अद्भुत ! शुद्धबलयुक्त ! (मित्रावरुणौ !) प्रवृद्ध (मेरी) स्तुतियो द्वारा स्तुत्य (तुम) (अपनी) बुद्धि से लोगो के (स्तोत्र को) भी भलीभाँति जानो।

तदृत पृथिवि बृहच्छ्रवएष ऋषीणाम्। ज्रयसानावरं पृथ्वति क्षरति यामभिः॥५॥

**अन्वय**- पृथिवि । ऋषीणा श्रवः एषे तत् बृहत् ऋत (त्वयि अस्ति)। ज्रयसानौ (मित्रावरुणौ) (स्व) यामभिः पृथु (तत् जलम्) अरम् अति क्षरन्ति।

**अनुवाद**- हे पृथिवि ! ऋषियो को अन्न प्रदान करने के लिये वह विशाल जल (तुझमे है)। वेगवान (मित्रावरूण) (अपने) कर्म से व्यापक (उस जल) की भलीभाँति वर्षा करते है।

आ यद्वामीयचक्षसा मित्र वयं च सूरयः। व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये॥६॥

**अन्वय**- ईयचक्षसा । मित्रा ! वयम् सूरयः च वाम् यत् आ (ह्वयामः) (वयम्) व्यचिष्ठे बहुपाय्ये स्वराज्ये यतेमहि।

**अनुवाद**- हे दूरदर्शी ! मित्रावरुणौ ! हम और स्तोता तुम्हारा आह्वान (करते है)। हम अतिविस्तृत बहुगामी अपने राज्य मे गमन करे।

## सूक्त - (६७)

***देवता***- मित्रावरुणौ, ***ऋषि***- यजतात्रेय, ***छन्द***- अनुष्टुप्।

बळित्था देव निष्कृतमादित्या यजतं बृहत्।
वरुण मित्रार्यमनवर्षिष्ठं क्षत्रमाशाथे॥१॥

**अन्वय**- अर्यमन् ! आदित्या ! देवा ! मित्र ! वरुण! (युवाम्!) इत्था बट्, निष्कृत, यजतम् बृहत् वर्षिष्ठ क्षत्रम् अशाथे।

**अनुवाद**- हे शत्रुनियामक ! अदिति पुत्र ! देव ! मित्र ! वरुण ! (तुम) इस समय सत्य, अबाध्य, यजनीय अति प्रवृद्धतम बल को प्राप्त करते हो।

आ यद्योनिं हिरण्ययं वरुण मित्र सदथः। धर्तारा चर्षणीनां यंतं सुम्नं रिशादसा॥२॥

**अन्वय**- रिशादसा ! मित्र ! वरुण ! चर्षणीना धर्तारा (युवाम्) यत् हिरण्यय योनिम् आसादथः (तदा) (युवाम्) (अस्मभ्यम्) सुम्न यन्तम्।

**अनुवाद**- हे शत्रुहिंसक ! मित्र ! वरुण । मनुष्यो के धारक (तुम) जब स्वर्णिम यज्ञभूमि मे आकर बैठते हो (तब) (तुम)

(हमे) सुख प्रदान करते हो।

विश्वे हि विश्ववेदसो वरुणो मित्रो अर्यमा। व्रता पदेव सश्चिरे पांति मर्त्यं रिषः॥३॥

**अन्वय**- विश्ववेदसः मित्र· वरुणः अर्यमा विश्वे हि (देवाः) (अस्मदीयानि) व्रता पदा इव सश्चिरे। रिषः च मर्त्यम् पान्ति।

**अनुवाद**- सर्वविद् मित्र, वरुण, अर्यमा सभी (देव) हमारे कर्म मे पैर की भाँति सलग्न होते है। और शत्रुओ से मनुष्य की रक्षा करते है।

ते हि सत्या ऋतस्पृश ऋतावानो जनेजने।
सुनीथासः सुदानवोऽंहोश्चिदुरुचक्रयः॥४॥

**अन्वय**- ते हि सत्याः, ऋतस्पृशः जने जने ऋतवानः सुनीथासः सुदानवः अहोः चित् (स्तोतुः) उरूचक्रयः (सन्ति)।

**अनुवाद**- वे सत्यरूप, जलवर्षी, लोगो मे यज्ञ कराने वाले, शोभनमार्गी, शोभनदानी, पापी स्तोता को भी प्रभूतदाता (है)।

को नु वां मित्रास्तुतो वरुणो वा तनूनाम्। तत्सु वामेषते मतिरत्रिभ्य एषते मतिः॥५॥

**अन्वय**- मित्र ! वरुण ! कः नु वाम् वा अस्तुतः। तनूनाम् (अस्माकम्) तत् मतिः वाम् आ सु एषते। अत्रिभ्यः मतिः (वाम्) आ एषते।

**अनुवाद**- हे मित्र ! वरुण ! कौन तुममें से स्तुत नही होता ? अल्पमति (हमारी) स्तुति तुम तक पहुँचती है। अत्रियो की स्तुति (तुम) तक पहुँचती है।

## सूक्त - (६८)

***देवता***- मित्रावरुणौ, ***ऋषि***- यजतात्रेय, ***छन्द***- गायत्री।

प्र वो मित्राय गायत वरुणाय विपा गिरा। महिक्षत्रावृतं बृहत्॥१॥

**अन्वय**- मदीया (ऋत्विजः !) वः मित्राय वरुणाय (च) विपा गिरा प्र गायत। महिक्षत्रौ ! (मित्रावरुणौ !) (युवा) बृहत् ऋतम् (आगच्छतम्)

**अनुवाद**- हे मेरे (ऋत्विक् !) तुम मित्र (और) वरुण के लिये व्याप्त वाणी से गायन करो। हे प्रभूतबलशाली ! (मित्रावरुणौ !) (तुम) विशाल यज्ञ में (आओ)।

सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च। देवा देवेषु प्रशस्ता॥२॥

**अन्वय**- या मित्र. वरुणः च उभा सम्राजा घृतयोनी देवा देवेषु च प्रशस्ता (स्तः) (मदीया ऋत्विजः ! वः तान् स्तुम)।

**अनुवाद**- जो मित्र और वरुण दोनो सबके स्वामी जलोत्पादक, दिव्य और देवताओ मे सुस्तुत (है) (हे मेरे ऋत्विजो ! तुम उनकी स्तुति करो)।

ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वा क्षत्र देवेषु॥३॥

**अन्वय**- ता (देवौ) नः पार्थिवस्य दिव्यस्य (च) महः रायः दातुं शक्तः (स्तः) (देवौः!) वाम् महि क्षत्र देवेषु (प्रसिद्धमस्ति)।

**अनुवाद**- वे दोनो (देवता) हमे पार्थिव (और) दिव्य प्रभूत धन (देने मे) समर्थ (है) (हे देवो !) तुम्हारा महान बल देवताओ मे (प्रसिद्ध है)।

ऋतमृतेन सपंतेषिर दक्षमाशाते। अद्रुहा देवौ वर्धेते॥४॥

**अन्वय**- (ता देवा) ऋतेन सपन्ता इषिर दक्षम् ऋतम् अशाते। अद्रुहा देवौ वर्धेते।

**अनुवाद** - (वे देव) जल के स्पर्श से दीप्त प्रवृद्ध यज्ञ को व्याप्त करते है। द्रोह न करने वाले देवता प्रवृद्ध होते है।

वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः बृहते गर्तमाशाते॥५॥

**अन्वय**- वृष्टिद्यावा रीत्यापा पेषस्पती (मित्रावरुणौ) दानुमत्याः (यागार्थ) बृहन्त गर्तम् आशाते।

**अनुवाद** - द्युलोक मे वर्षक, जल को मुक्त करने वाले, अन्न के स्वामी (मित्रावरुणौ) दानी मन से (यज्ञ के लिये) विशाल रथ पर आते है।

## सूक्त - (६६)

***देवता***- मित्रावरुणौ, ***ऋषि***- उरूचक्रिरात्रेय, ***छन्द***- त्रिष्टुप्।

त्री रोचना वरुण त्रीँरुत द्यून्त्रीणि मित्र धारयथो रजांसि।
वावृधानावमतिं क्षत्रियस्यानु व्रत रक्षमाणावजुर्यम्॥१॥

**अन्वय**- मित्र ! वरुण ! क्षत्रियस्य अमति ववृधानौ व्रत (च यजमानम्) अजुर्य रक्षमाणौ (युवाम्) रोचना त्री (भूलोकान्) त्रीन् द्यून् त्रीणि उत रजांसि धारयथः।

**अनुवाद**- हे मित्र ! हे वरुण ! क्षत्रिय के रूप को बढाने वाले, कर्त्ता (यजमान) की निरन्तर रक्षा करने वाले (तुम) तेजस्वी तीन (भूलोक) तीन द्युलोक और तीन अन्तरिक्ष को धारण करते हो।

इरावतीर्वरुण धेनवो वा मधुमद्वां सिंधवो मित्र दुह्रे।
त्रयस्तस्थुर्वृषभासस्तिसृणा धिषणानां रेतोधा वि द्युमंतः॥२॥

**अन्वय**- मित्र ! वरुण ! वाम् (आज्ञया) धेनवः इरावतीः (भविन्त) वाम् (आज्ञया) सिन्धवः मधुमत् (उदक) दुह्रे।

वृषभासः रेतोधाः द्युमन्त· त्रयः (अग्निवाटवादित्याः) तिसृणा धिषणाना (पृथिव्यन्तरिक्षद्युलोकानाम्) वि तस्थुः।

**अनुवाद**- हे मित्र ! वरुण ! तुम्हारी (आज्ञा) से गाये दुग्धवती (होती है) तुम्हारी (आज्ञा) से नदियाँ मधुर (जल) का दोहन करती है। बलवान जलधारक दीप्तिवान तीनो (अग्नि, वायु आदित्य) तीनो स्थानो (पृथिवी अन्तरिक्ष द्युलोक) मे स्थित होते है।

प्रातर्देवीमदितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य।
राये मित्रावरुण सर्वतातेळे तोकाय तनयाय शं योः॥३॥

**अन्वय**- प्रातः (काले) सूर्यस्य उदिता माध्यन्दिने (सवने) (अहम्) देवीम् अदितिं जोहवामि। मित्रावरुणा ! (वयम्) राये तोकाय तनयाय शम् योः सर्वताता (वाम्) ईळे।

**अनुवाद**- प्रात· (काल) मे सूर्य के उदित होने पर माध्यन्दिन (सवन) मे (मै) देवी अदिति का आह्वान करता हूँ। हे मित्रावरुणौ ! (हम) धन पुत्र पौत्रो के सुख प्राप्ति के लिये यज्ञ मे (तुम्हारी) स्तुति करते है।

या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य।
न वां देवा अमृता आ मिनंति व्रतानि मित्रावरुणा ध्रुवाणि॥४॥

**अन्वय**- या आदित्या (मित्रावरुणा स्तः) (तौ) रोचनस्य रजसः दिव्या पार्थिवस्य उत धर्तारा। मित्रावरुणा ! वाम् ध्रुवाणि व्रतानि अमृता. देवा न आ मिनन्ति।

**अनुवाद**- जो अदितिपुत्र (मित्रावरुण है) (वे) दीप्तिवान अन्तरिक्ष और दिव्य पृथिवी को धारण करने वाले है। हे मित्रावरुणौ ! तुम्हारे स्थिर नियम को अमर देवता नष्ट नही करते।

## सूक्त - (७०)

***देवता***- मित्रावरुणौ, ***ऋषि***- उरूचक्रिरात्रेय, ***छन्द***- गायत्री।

पुरुरुणा चिद्ध्यस्त्यवो नूनं वां वरुण। मित्र वंसि वां सुमतिम्॥१॥

**अन्वय**- मित्र ! वरुण ! वाम् अव नून पुरुरुणा चित् हि अस्ति। (वयम्) वाम् सुमति वासि।

**अनुवाद**- हे मित्र ! वरुण ! तुम दोनो की रक्षा निश्चय ही अत्यन्त व्यापक है। (हम) तुम्हारी सुमति को प्राप्त करे।

ता वां सम्यगद्रुह्वाणेषमश्याम धायसे। वयं ते रुद्रा स्याम॥२॥

**अन्वय**- अद्रुह्वाणा ! (मित्रावरुणौ !) (वयम्) ता वाम् (स्तुम) (वयम्) धायसे इषम् अश्याम। रुद्रा ! वय ते स्याम।

**अनुवाद**- हे अद्रोही ! (मित्रावरुणौ!) (हम) उन तुम्हारी (स्तुति करते है) (हम) भोजन के लिये अन्न प्राप्त करें। हे रुद्रो ! हम तुम्हारे हो।

पात नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा। तुर्याम दस्यून्तनूभिः॥३॥

**अन्वय**- रुद्रा ! (मित्रावरुणौ !) पायुभिः न पातम्। सुत्राता (अस्मान्) त्रायेथाम्। (वयम्) उत् तनूभिः दस्यून् तुर्याम।

**अनुवाद**- हे रुद्रपुत्र ! (मित्रावरुणौ !) रक्षासाधनो द्वारा हमारी रक्षा करो। शोभन रक्षा द्वारा (हमारा) पालन करो। (हम) पुत्रो द्वारा शत्रुओ की हिसा करे।

मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः। मा शेषसा मा तनसा॥४॥

**अन्वय**- अद्भुतक्रतू ! (मित्रावरुणौ !) (वयम्) तनूभिः कस्य (अन्यस्य) यक्ष (धनम्) मा भुजेम। शेषसा सह (वय कस्य अन्यस्य धनम्) मा (भुजेम)। तनसा सह (वय कस्य अन्यस्य धन) मा भुजेम।

**अनुवाद**- हे अद्भुतकर्म करने वाले मित्रावरुणौ (हम) अपने शरीर द्वारा किसी (अन्य के धन का उपभोग) न (करे) पुत्रो के साथ (हम किसी अन्य के धन का उपभोग) नही (करे)। पौत्रादि के साथ (हम किसी अन्य के धन का उपभोग) नही करे।

## सूक्त - (७१)

***देवता***- मित्रावरुणौ, ***ऋषि***- बाहुवृक्तात्रेय, ***छन्द***- गायत्री।

आ नो गंतं रिशादसा वरुण मित्र बर्हणा। उपेमं चारुमध्वरम्॥१॥

**अन्वय**- रिशायदसा ! मित्र ! वरुण ! (शत्रूणा) बर्हणा (युवाम्) नः इम चारुम् अध्वरम् उप आ गन्तम्।

**अनुवाद**- हे शत्रुहिसक ! मित्र ! वरुण! (शत्रु-) नाशक (तुम) हमारे इस रमणीय यज्ञ मे आओ।

विश्वस्य हि प्रचेतसा वरुण मित्र राजथः। ईशाना पिप्यत धियः॥२॥

**अन्वय**- प्रचेतसा ! मित्र ! वरुण ! (युवाम्) विश्वस्य हि राजथः। ईशाना ! (युवाम्!) (नः) धिय. (फलैः) पिप्यतम्।

**अनुवाद**- हे प्रकृष्टज्ञानी ! मित्र वरुण ! (तुम) सबके स्वामी हो। हे ईश्वर ! (तुम) (हमारे) कर्म को (फल द्वारा) तृप्त करो।

उप नः सुतमा गतं वरुण मित्र दाशुषः। अस्य सोमस्य पीतये॥३॥

**अन्वय**- मित्र । वरुण ! (युवां) नः सुतं (सोमम्) उप आगतम्। दाशुषः (मम) अस्य सोमस्य पीतये (आगतम्)।

**अनुवाद** हे मित्र ! हे वरुण ! हमारे द्वारा अभिषुत (सोम) के पास आओ। दानी (मेरे) इस सोम के पान के लिये (आओ)।

## सूक्त - (७२)

*देवता*- मित्रावरुणौ, **ऋषि**- बाहुवृक्तात्रेय, **छन्द**- उष्णिक्।

आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत्। नि बर्हिषि सदत सोमपीतये॥१॥

**अन्वय**- अत्रिवत् वयम् (आत्रेयः) गीर्भिः मित्रे वरुणे जुहुमः। (मित्रावरुणौ !) (युवाम्) सोमपीतये बर्हिषि नि सदतम्।

**अनुवाद**- अत्रि की भाँति हम (आत्रेय) स्तुतियो द्वारा मित्र वरुण का आह्वान करते है। (हे मित्रावरुणौ !) (तुम) सोमपान के लिये कुश के ऊपर बैठो।

व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना। नि बर्हिषि सदतं सोमपीतये॥२॥

**अन्वय**- (मित्रावरुणौ ! युवाम्) (जगतः) धर्मणा व्रतेन ध्रुवक्षेमः स्थः (अतः) यातयज्जनाः (वाम् स्तूयन्ते) (मित्रावरुणौ ! युवाम्) सोमपीतये बर्हिषि नि सदतम्।

**अनुवाद**- (हे मित्रावरुणौ ! तुम) (ससार को) धारण करने वाले कर्म से च्युत न होते हुये स्थिर रहते हो। (अतः) ऋत्विज (तुम्हारी) स्तुति करते है। (हे मित्रावरुणौ ! तुम) सोमपान के लिये कुश के ऊपर बैठो।

मित्रश्च नो वरुणश्च जुषेतां यज्ञमिष्टये। नि बर्हिषि सदतां सोमपीतये॥३॥

**अन्वय**- मित्रः ! वरुणः ! च नः यज्ञम् इष्टये (सोमम्) जुषेताम्। (मित्रावरुणौ ! युवाम्) सोमपीतये बर्हिषि नि सदताम्।

**अनुवाद**- हे मित्र ! और वरुण ! हमारे यज्ञ के अभीष्ट के लिये (सोम का) सेवन करो। (हे मित्रावरुणौ ! तुम) सोमपान के लिये कुश के ऊपर बैठो।

## सूक्त - (७३)

*देवता*- अश्विनौ, **ऋषि**- पौरात्रेय, **छन्द**- अनुष्टुप्।

यदद्य स्थः परावति यदर्वावत्यश्विना। यद्वा पुरु पुरुभुजा यदंतरिक्ष आ गतम्॥१॥

**अन्वय**- पुरुभुजा ! अश्विना ! यत् (युवाम्) अद्य परावति (द्युलोके) स्थः यत् (युवाम्) अर्वावति (स्थः) यत् वा पुरु (प्रदेशे) (स्थ) यत् अन्तरिक्षे (स्थ) (तेभ्यः) आ गतम्।

**अनुवाद**- हे बहुभोक्ता ! अश्विनौ ! यद्यपि (तुम) आज दूरवर्ती (द्युलोक) मे हो। यद्यपि (तुम) गमनशक्य प्रदेश मे (हो) अथवा बहुव्याप्त (प्रदेश) में हो। यद्यपि अन्तरिक्ष मे (हो) (वहाँ से) आओ।

इह त्या पुरुभूतमा पुरु दंसांसि बिभ्रता। वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे॥२॥

**अन्वय**- परूभूतमा पुरु दसांसि बिभ्रता वरस्या (अश्विनौ) यामि। अध्रिगू तुविष्टामा त्या (अश्विनौ) इह (यज्ञे) (हवीना) भुजे (अहम्) (हुवे)।

**अनुवाद**- बहुतो को धारण करने वाले बहुत कर्मो को धारण करने वाले वरणीय (अश्विनौ) के पास आता हूँ। अप्रतिहतगति वाले उन (अश्विनौ) का यहाँ (यज्ञ मे) (हवियो के) उपभोग के लिये (मै) आह्वान करता हूँ।

ईमान्यद्वपुषे वपुश्चक्रं रथस्य येमथुः। पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः॥३॥

**अन्वय**- (अश्विनौ ! युवाम्) वपुषे रथस्य अन्यत् वपुः चक्रम् ईर्मा यमेथुः। अन्या (चक्रेण) नाहुषा युगा मह्ना रजांसि (च) परि दीयथः।

**अनुवाद**- (हे अश्विनौ ! तुम) शोभा के लिये रथ के एक तेजवान चक्र के रूप को नियामित करते हो। अन्य (चक्र) से मनुष्यो के काल (एव) विशाल अन्तरिक्ष को व्याप्त करते हो।

तदू षु वामेना कृते विश्वा यद्वामनुष्टवे। नाना जातावरेपसा समस्मे बंधुमेयथुः॥४॥

**अन्वय**- विश्वा । (अश्विनौ !) यत् (स्तोत्रेण) (अहम्) वाम् अनुस्तवे एना (पौरस्य) तदु (स्तोत्र) वाम् सु कृतम् (भवतु)। नाना जातौ अरेपसा (अश्विनौ) अस्मे बन्धुम् (धनम्) सम् आ ईयथुः।

**अनुवाद**- हे व्यापक (अश्विनौ !) जिस (स्तोत्र) से (मैं) (तुम्हारा) स्तवन करता हूँ इस (पौर) का वह (स्तोत्र) तुम्हारे लिये भलीभाँति सम्पादित हो। पृथक् उत्पन्न निष्पाप (अश्विनौ) मेरे लिये बन्धुरूप (धन) भलीभाँति ले आये।

आ यद्वां सूर्या रथ तिष्ठद्रघुष्यद सदा। परि वामरुषा वयो घृणा वरंत आतपः॥५॥

**अन्वय**- (अश्विनौ!) यत् वा सदा रघुष्यद रथ सूर्या आ तिष्ठत् (तदा) (शत्रूणाम्) आतपः घृणा अरुषाः वयः वाम् परि वरन्ते।

**अनुवाद**- (हे अश्विनौ !) जब तुम्हारे लिये सर्वदा तीव्रगामी रथ पर सूर्या आकर बैठती है (तब) (शत्रुओ को) परितप्त करने वाले तेजस्वी अरूणवर्ण अश्व तुम्हे घेर लेते है।

युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा। घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति॥६॥

**अन्वय**- नरा ! (अश्विनौ !) यत् अत्रिः सुम्नेन चेतसा युवोः चिकेतति (तदा) नासत्या ! वाम् अस्ना धर्मम् अरेपसम् (अग्नि) भुरण्यति।

**अनुवाद**- हे नेता ! (अश्विनौ !) जब अत्रि ने आदरयुक्त मन्त्र से तुम्हे जाना (तब) हे नासत्य ! तुम्हारे स्तोत्र द्वारा दीप्त निष्पाप (अग्नि) को प्राप्त किया।

उग्रो वां ककुहो ययिःशृण्वे यामेषु संतनिः। यद्वा दंसोभिरश्विनात्रिर्नरावर्वर्तति॥७॥

**अन्वय**- (अश्विना !) यत् वाम् उग्रः ककुहः यायिः सतनिः (रथस्य शब्दः) यामेषु शृण्वे (तदा) नरा ! अश्विना ! वाम् दसोभि अत्रि. आववर्तति।

**अनुवाद**- (हे अश्विनौ !) जब तुम्हारा उग्र, महान गन्ता, सततगामी (रथ का शब्द) यज्ञ मे सुनायी पडता है (तब) हे नेता ! अश्विनौ ! तुम्हारे कर्मो द्वारा अत्रि परावर्तित होते हैं।

मध्वं ऊ षु मधूयुवा रुद्रा सिषक्ति पिप्युषी।
यत्समुद्राति पर्षथः पक्वाः पृक्षो भरंत वाम्॥८॥

**अन्वय**- मधूयुवा ! रुद्रा (अश्विनौ !) (नः) मध्वः सु पिप्युषी (युवाम्) सिसक्ति। यत् (युवाम्) समुद्रा (अन्तरिक्षाणि) अति पषथ (तदा) पक्वाः पृक्ष वाम् भरन्त।

**अनुवाद**- हे मधुर सोम के मिश्रयिता ! रुद्र ! (अश्विनौ!) हमारी मधुर सुस्तुति का (तुम) सेवन करते हो। जब (तुम) व्यापक (अन्तरिक्ष) का अतिक्रमण करते हो (तब) पका हुआ अन्न तुम्हारा पोषण करता है।

सत्यमिद्वा उ अश्विना युवामाहुर्मयोभुवा।
ता यामन्यामहूतमा यामन्ना मृळयत्तमा॥९॥

**अन्वय**- अश्विना ! (पुराविदः) युवा मयोभुवा आहुः इत् वै सत्यम् (अस्ति)। ता (युवाम्) यामहूतमा यामन् आ यामन् मृळयत्तमा (भवतम्)।

**अनुवाद**- हे अश्विनौ ! (प्राचीनपण्डित) तुम्हे सुखप्रदाता कहते थे यह निश्चय ही सत्य (है)। वह (तुम) आने के लिये आह्वाहित होने पर यज्ञ मे आगमन करते हुये अतिसुखप्रदाता (होओ)।

इमा ब्रह्माणि वर्धनाश्विभ्यां संतु शंतमा। या तक्षाम रथाँ इवावोचाम बृहन्नमः॥१०॥

**अन्वय**- रथान् इव या (स्तुतिः) (अस्माभिः) तक्षाम (सा) बृहत् नमः (वयम्) अवोचम। इमा ब्रह्माणि अश्विभ्या वर्धना शतमा (च) सन्तु।

**अनुवाद**- शिल्पी की भाँति जो (स्तुति) (हमारे द्वारा) बनायी गयी है (वह) व्यापक स्तुति (हम) बोलते है। ये स्तोत्र अश्विनौ के लिये वर्धक (एव) सुखकर हो।

## सूक्त - (७४)

***देवता***- अश्विनौ, ***ऋषि***- पौरात्रेय, ***छन्द***- अनुष्टुप्, ८ निचृत।

कूष्ठोदेवावश्विनाद्या दिवो मनावसू। तच्छ्रवथो वृषण्वसू अत्रिर्वामा विवासति॥१॥

**अन्वय**- मनावसू ! वृषण्वसू ! देवौ ! अश्विना ! (युवाम्) दिवः अद्य कूस्थ तत् (स्तोत्र) श्रवथः (येन) अत्रि वाम् आ विवासति।

**अनुवाद**- हे स्तुतिरूप धन वाले। हे वर्षा रूप धन वाले। देव ! अश्विनौ ! (तुम) द्युलोक से आज पृथिवी पर स्थित होकर वह (स्तोत्र) सुनो (जिससे) अत्रि तुम्हारी परिचार्या करते है।

कुह त्या कुह नु श्रुता दिवि देवा नासत्या।
कस्मिन्ना यतथो जने को वां नदीनां सचा॥२॥

**अन्वय**- नासत्या ! देवा ! (अश्विना !) कुह त्या (तिष्ठतः) ? श्रुता दिवि (त्या) नु कुह (निवसत) ? कस्मिन् जने (त्या) आ यतथ ? कः वाम् नदीना सचा (स्यात्) ?

**अनुवाद**- हे नासत्य ! देव ! (अश्विनौ!) तुम कहाँ (स्थित हो) ? विश्रुत द्युलोक मे (तुम) आज कहाँ निवास (कर रहे हो) ? किस यजमान के पास (तुम) आये हो ? कौन तुम्हारी स्तुति में सहायक (है)?

कं याथः कं ह गच्छथः कमच्छा युंजाथे रथम्।
कस्य ब्रह्माणि रण्यथो वयं वामुश्मसीष्टये॥३॥

**अन्वय**- (अश्विना!) कम् (यजमान प्रति) याथः? कम् ह (प्रति) गच्छथः ? कम् अच्छ रथम् (अश्वैः) युञ्जाथे ? कस्य ब्रह्माणि रण्यथः ? वयम् वाम् इष्टये उश्मसि।

**अनुवाद**- (हे अश्विनौ !) किस (यजमान के पास) जाते हो ? किसके पास गमन करते हो ? किसके अभिप्राय से रथ को (अश्वो से) युक्त करते हो ? किसके स्तोत्रो से आनन्दित होते हो ? हम तुम्हारे आगमन की कामना करते है।

पौरं चिद्धयुदप्रुतं पौर पौराय जिन्वथः। यदीं गृभीततातये सिंहमिव द्रुहस्पदे॥४॥

**अन्वय**- पौर (-सम्बन्धिनौ ! अश्विनौ !) (युवाम्) उदप्रतु पौर पौराय जिन्वथः। दुहः पदे (अरण्ये) सिहम् इव (गर्जन्तम्) ईम् (मेघम्) गृभीततातये (पौराय) यत् (युवा) (जिन्वथ)।

**अनुवाद**- हे पौर (-सम्बन्धी ! अश्विनौ !) (तुम) जलप्लावक मेघ को पौर के लिये प्रेरित करो। द्रोह के स्थान (अरण्य) मे सिह की भाँति (गरजते हुये) इस (मेघ) को गृहीत (यज्ञ) से घिरे (पुरु) के लिये वो (तुम) (प्ररित करो)।

प्र च्यवानाज्जुजुरुषो वव्रिमत्कं न मुंचथः। युवा यदीं कृथः पुनरा काममृण्वे वध्वः॥५॥

**अन्वय**- (अश्विनौ !) (युवा) जुजुरुषः वव्रिं (रूपम्) च्यवानात् अत्क न प्र मुञ्चथः यदि पुनः युवा कृथः (तदा) (सः) वध्वः (स्त्रियः) (न) काम (रूपम्) ऋण्वे।

**अनुवाद**- (हे अश्विनौ !) (तुमने) जीर्ण हेय (रूप) को च्यवन से कवच की भाँति अलगकर जब पुनः युवा किया (तब) (उसने) सुरूपा (स्त्री की भाँति) कमनीय (रूप) प्राप्त किया।

अस्ति हि वामिह स्तोता स्मसि वां सदृशि श्रिये।

नू श्रुत म आ गतमवोभिर्वाजिनीवसू।।६।।

**अन्वय**- (अश्विनौ!) इह (यज्ञे) वाम् स्तोता (पौरः) हि अस्ति। श्रिये (वयम्) वाम् सदृशि स्मसि। मे (आह्वानम्) नु श्रुतम्। वाजिनीवसू ! (श्रुत्वा) अवोभिः आ गतम्।

**अनुवाद**- (हे अश्विनौ !) इस (यज्ञ) मे तुम्हारा स्तोता (पौर) निश्चय ही है। समृद्धि के लिये (हम) तुम्हारे समीप रहे। मेरे (आह्वान) को आज सुना। हे अन्न के स्वामी ! (सुनकर) रक्षा साधनो के साथ आओ।

को वामद्य पुरुणामा वन्वे मर्त्यानाम्। को विप्रो विप्रवाहसा को यज्ञैर्वाजिनीवसू।।७।।

**अन्वय**- विप्रवाहसा! वाजिनीवसू ! (अश्विनौ!) पुरुणा मर्त्याणा कः वाम् अद्य आ वन्वे ? क· विप्रः (वाम् आ वन्वे ?) कः यज्ञैः (वाम् आ वन्वे ?)।

**अनुवाद**- हे विप्रो द्वारा आह्वनीय ! हे अन्नयुक्त धन वाले । (अश्विनौ !) बहुत से मनुष्यो मे कौन तुम्हारी भलीभाँति परिचर्या करेगा ? कौन मेधावी (तुम्हारी परिचर्या करेगा ?) कौन यज्ञों द्वारा (तुम्हारी परिचर्या करेगा ?)।

आ वा रथो रथानां येष्ठो यात्वश्विना। पुरु चिदस्मयुस्तिर आंगूषो मर्त्येष्वा।।८।।

**अन्वय**- अश्विना !(इतरदेवाना) रथानां येष्ठः वाम् रथः पुरुचित् (शत्रूणां) तिरः अस्मयुः मर्त्येषु आङ्गूषा (युवाम्) आ यातु।

**अनुवाद**- हे अश्विनौ ! (अन्य देवो के) रथो मे तीव्रगामी तुम्हारा रथ बहुत (शत्रुओ के) हिसक, हमारे आकांक्षी, मनुष्यो मे स्तुत्य (तुम्हे) लाता है।

शमू षु वां मधूयुवास्माकमस्तु चर्कृतिः।
अर्वाचीना विचेतसा विभिः श्येनेव दीयतम्।।९।।

**अन्वय**- मधुयुवा ! (अश्विना !) वाम् चकृतिः (स्तोत्रम्) अस्माक सु शम् अस्तु। विचेतसा ! (अश्विना !) (युवाम्) श्येना इव विर्भिः (अश्वैः) अर्वाचीना (आ) दीयतम्।

**अनुवाद**- हे मधुयुक्त (अश्विनौ !) तुम्हारे लिये बार-बार बनाया (स्तोत्र) हमारे लिये अत्यन्त सुखकर हो। हे [illegible] (अश्विनौ !) तुम बाज की भाँति गमनशील (अश्वो) द्वारा हमारी ओर आओ।

अश्विना यद्ध कर्हि चिच्छुश्रूयातमिमं हवम्।
वस्वीरू षु वां भुजः पृंचति सु वां पृचः।।१०।।

**अन्वय**- अश्विना ! (युवाम्) यत् ह कर्हि चित् (स्थितवन्तौ भवतः) (मे) इम हव शुश्रूयताम्। वाम् सु प्रचः (कामयमान) वस्वी· (हवि) भुज. वाम् सु पृञ्चन्ति।

**अनुवाद**- हे अश्विनौ ! (तुम) जहाँ कही भी (स्थित हो) (मेरे) इस आह्वान को सुनो। तुम्हारे सम्पर्क की (कामना करने वाला) प्रशस्त (हविर्लक्षण) धन तुम्हे भलीभाँति प्राप्त हो।

## सूक्त- (७५)

***देवता***- अश्विनौ, ***ऋषि***- अवस्युरात्रेय, ***छन्द***- पङ्क्ति।

प्रति प्रियतमं रथं वृषण वसुवाहनम्।

स्तोता वामश्विनावृषिः स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवम्।।१।।

**अन्वय**- अश्विनौ ! वाम् स्तोता ऋषि : (अवस्यु:) (वाम्) प्रति प्रियतम वृषण वसुवाहन रथ प्रति स्तोमेन भूषति। मध्वी ! (अश्विनौ !) मम हव श्रुतम्।

**अनुवाद**- हे अश्विनौ ! तुम्हारे स्तोता ऋषि (अवस्यु) (तुम्हारे) अतिप्रिय, फलवर्षक, धनवाहक रथ को स्तोत्र के द्वारा अलङ्कृत करता है। हे मधुरतायुक्त ! (अश्विनौ !) मेरे आह्वान को सुना।

अत्यायातमश्विना तिरो विश्वा अहं सना।

दस्ना हिरण्यवर्तनी सुषुम्ना सिंधुवाहसा माध्वी मम श्रुत हवम्।।२।।

**अन्वय**- दस्ना ! हिरण्यवर्तनी ! सुषुम्ना ! सिन्धुवाहसा ! अश्विना। विश्वाः (यजमानान्) अति तिरः (कृत्वा) (युवाम्) अहम् (प्रति) सना आयातम्। मध्वी ! अश्विनौ ! मम हव श्रुतम्।

**अनुवाद**- हे शत्रुपीडक ! सुवर्णरथवाले ! हे शोभनधन वाले ! हे नदियो के प्रावाहक ! अश्विनौ ! समस्त (यजमानो) का तिरस्कार (करके) (तुम) मेरे (प्रति) सदा आओ। हे मधुयुक्त ! (अश्विनौ !) मेरे आह्वान को सुनो।

आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम्।

रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवम्।।३।।

**अन्वय**- रुद्रा ! हिरण्यवर्तनी ! (यज्ञ) जुषाणा ! वाजिनीवसू! रत्नानि बिभ्रतौ ! अश्विना! युवम् न आ गच्छतम्। मध्वी ! अश्विना ! मम हवम् श्रुतम्।

**अनुवाद**- हे शत्रुरोदक ! हिरण्यरथ वाले ! हे (यज्ञ मे) आनन्दित होने वाले ! अश्वयुक्त धन वाले ! रत्नधारक ! अश्विनौ ! तुम हमारी ओर आओ ! हे मधुयुक्त (अश्विनौ !) मेरे आह्वान को सुनो।

सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता।

उत वां ककुहो मृगः पृक्षः कृणोति वापुषो माध्वी मम श्रुतं हवम्।।४।।

**अन्वय**- वृषण्वसू ! अश्विना ! सुष्टुभः (मम) वाणीची रथे (स्थितौ) वाम् आहिता। उत ककुहः मृगः वापुषः (यजमान) वाम् पृक्षः कृणोति। मध्वी (अश्विना !) मम हवम् श्रुतम्।

**अनुवाद**- हे धनवर्षक ! अश्विनौ ! सुस्तोता (मेरी) वाणीरूप स्तुति रथ मे (स्थित) तुम्हारे लिये की गयी है और महान सुदर्शन (यजमान) तुम्हे अन्न देता है। हे मधुयुक्त!(अश्विनौ !) मेरे आह्वान को सुनो।

बोधिन्मनसा रथ्येषिरा हवनश्रुता।

विभिश्च्यवानमश्विना नि याथो अद्वयाविनं माध्वी मम श्रुतं हवम्॥५॥

**अन्वय**- अश्विना! बोधिन्मनसा रथ्या इषिरा, हवनश्रुता (युवाम्) अद्वयाविनं च्यवान विभिः नियाथः। मध्वी ! (अश्विनौ !) मम हव श्रुतम्।

**अनुवाद**- हे अश्विनौ ! बुद्धियुक्त मनवाले, रथयुक्त, दीप्त आह्वान को सुनने वाले (तुम) मायारहित च्यवन के पास अश्वो द्वारा ले जाते हो। हे मधुयुक्त ! (अश्विनौ) मेरे आह्वान को सुनो।

आ वां नरा मनोयुजोऽश्वासः प्रुषितप्सवः।

वयो वहंतु पीतये सह सुम्नेभिरश्विना माध्वी मम श्रुतं हवम्॥६॥

**अन्वय**- नरा ! अश्विना ! वाम् मनोयुजः प्रुषितप्सवः वयः अश्वासः (सोम-) पीतये सुम्नेभिः सह आ वहन्तु। मध्वी ! (अश्विनौ !) मम हव श्रुतम्।

**अनुवाद**- हे नेता ! अश्विनौ ! तुम्हे मन के समान वेगवान, विचित्ररूप वाले, शीघ्रगामी अश्व (सोम-) पान के लिये सुख के साथ लाये। हे मधुयुक्त ! (अश्विनौ !) मेरे आह्वान को सुनो।

अश्विनावेह गच्छतं नासत्या मा वि वेनतम्।

तिरश्चिदर्यया परि वर्तिर्यातमदाभ्या मध्वी मम श्रुतं हवम्॥७॥

**अन्वय**- अश्विनौ ! (युवाम्) इह (यज्ञे) आ गच्छतम्। नासत्या ! विनेतं मा (भवतम्) अदाभ्या ! अर्यया (युवाम्) हिरः चित् (प्रदेशात्) (अस्माक) वर्तिः परि यातम्। मध्वी ! (अश्विना !) मम हवम् श्रुतम्।

**अनुवाद**- हे अश्विनौ ! (तुम) यहाँ (यज्ञ मे) आओ। हे नासत्यौ ! प्रतिकूल न (होओ)। हे अहिंस्य ! स्वामी (तुम) अन्तर्हित (प्रदेश) से (हमारे) घर आओ। हे मधुयुक्त (अश्विनौ !) मेरे आह्वान को सुनो।

अस्मिन्यज्ञे अदाभ्या जरितारं शुभस्पती।

अवस्युमश्विना युव गृणंतमुप भूषथो माध्वी मम श्रुतं हवम्॥८॥

**अन्वय**- अदाभ्या ! शुभः पती! अश्विना ! अस्मिन् यज्ञे युव गृणन्त जरितार (मम) अवस्युम् उप भूषथः। मध्वी ! (अश्विनौ !) मम हवम् श्रुतम्।

**अनुवाद**- हे अहिस्य ! जलाधिपति ! अश्विनौ ! इस यज्ञ मे तुम स्तुति करते हुये स्तोता (मुझ) अवस्यु को अनुगृहीत करो। हे मधुयुक्त ! (अश्विनौ!) मेरे आह्वान को सुनो।

अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः।

अयोजि वां वृषण्वसू रथो दस्नावमर्त्यो माध्वी मम श्रुतं हवम्॥६॥

अन्वय- उषा (उदिता) अभत्। ऋत्वियः रूशत्पशुः अग्निः (वेद्याम्) आ आधायि। वृषण्वसू ! दस्नौ ! वाम् आमर्त्यः रथः (अश्वै ) अयोजि। मध्वी! (अश्विनौ !) मम हव श्रुतम्।

**अनुवाद**- उषा (उदित) हो गयी है। कालानुसार दीप्त ज्वाला वाला अग्नि (वेदी पर) सस्थापित हुआ है। हे धनप्रदाता ! शत्रुसहारक ! तुम्हारा अक्षय्य रथ (अश्वो से) युक्त हो गया है। हे मधुयुक्त ! (अश्विनौ !) मेरे आह्वान को सुनो।

## सूक्त- (७६)

***देवता***- अश्विनौ, ***ऋषि***- भौमोऽत्रि, **छन्द**- त्रिष्टुप्।

आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः।

अर्वाञ्चा नून रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ॥१॥

**अन्वय**- उषसाम् अनीकम् अग्निः आ भाति। विप्राणा (स्तोतॄणाम्) देवयाः वाचः अस्थु.। रथ्या ! अश्विना ! युवाम् अर्वाञ्च धर्म पीपिवासम् इह (यज्ञे) अच्छ नूनं यातम्।

**अनुवाद**- उषाकाल मे ज्वालायुक्त अग्नि प्रदीप्त होता है। मेधावी (स्तोताओ) की देवकामी वाणी उच्चरित होती है। हे रथयुक्त अश्विनौ ! तुम हमारी ओर प्रदीप्त परिवृद्ध इस (यज्ञ) मे निश्चित रूप से आओ।

न संस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह।

दिवाभिपित्वेऽवसागमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठा॥२॥

**अन्वय**- अश्विना ! गमिष्ठा उपस्तुता (युवाम्) इह सस्कृत (यज्ञम्) अन्ति नूनं न प्र मिमीतः। तौ (अश्विनौ) दिवा अभिपित्वे अवर्तिं प्रति अवसा आगमिष्ठा दाशुषे (च) यजमानाय शभविष्ठा (स्तः)॥

**अनुवाद**- हे अश्विनौ ! गमनशील, सुस्तत (तुम) यहाँ सुसस्कृत (यज्ञ) के समीप निश्चय ही हिसा नही करो। वे (अश्वनौ) दिन के प्रारम्भ मे अन्नरहित के पास रक्षा के साथ आने वाले (और) दानी यजमान को सुख प्रदान करने वाले (है)।

उता यातं संगवे प्रातरन्हो मध्यंदिन उदिता सूर्यस्य।
दिवा नक्तमवसा शंतमेन नेदानी पीतिरश्विना ततान॥३॥

**अन्वय**- (अश्विनौ !) संगवे प्रातः अहः मध्यन्दिने सूर्यस्य उदिता दिवा नक्तम् उत शतमेन अवसा आ यातम्। अश्विना (अतिरिक्तः अन्यदेवाः) इदानी (सोम-) पीतिः न आ ततान।

**अनुवाद**- (हे अश्विनौ !) रात्रि के शेष मे प्रातः, दिन, दोपहर मे सूर्य के उदित होने पर दिन और रात मे सुखकर रक्षा के साथ आते है। अश्विनौ (के अतिरिक्त अन्य देवता) इस समय (सोम-) पान के लिये प्रवृत्त नही होते।

इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणम्।
आ नो दिवो बृहतः पर्वतादाद्भ्या यातमिषमूर्जं वहंता॥४॥

**अन्वय**- अश्विना ! इदम् हि प्रदिवि (वेद्याम्) स्थान वाम् ओकः (स्तः) इमे गृहाः (वाम् स्त·) इदम् दुरोणम् (वाम् स्तः)। दिव. बृहत पर्वतात् अदभ्यः (अन्तरिक्षात्) नः आ यातम्। इषम् ऊर्जम् (च) वहन्ता।

**अनुवाद**- हे अश्विनौ ! यह उत्तर (वेदी) का स्थान तुम्हारा (है) ये घर (तुम्हारे है)। यह देवयजनगृह (तुम्हारा है)। द्युलोक से विशाल पर्वत से जलयुक्त (अन्तरिक्ष) से हमारी ओर आओ। अन्न (और) बल वहन करो।

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम।
आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि॥५॥

**अन्वय**- वयम् अश्विनो· नूतनेन अवसा मयोभुवा (च) सुप्रणीति सम् गमेम। अमृता ! (अश्विना !) (युवाम्) नः रयिम् आ वहतम् वीरान् आ (वहतम्) उत् विश्वानि सौभगानि आ (वहतम्)।

**अनुवाद**- (हम) अश्विनों की नूतन रक्षा (एवम्) सुखकर सुष्ठु गमन से युक्त हो। हे अमर ! (अश्विनौ !) (तुम) हमारे लिये धन लाओ पुत्र प्रदान करो और समस्त सौभाग्य प्रदान (करो)।

## सूक्त - (७७)

***देवता***- अश्विनौ, ***ऋषि***- भौमोऽत्रि, ***छन्द***- त्रिष्टुप्।

प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबातः।

प्रातर्हि यज्ञमश्विना दधाते प्र शंसंति कवयः पूर्वभाजः॥१॥

**अन्वय**- (ऋत्विज !) प्रातर्यावाणा प्रथमा गृधात् अररूषः पुरा पिबात· (अश्विनौ) यजध्वम्। अश्विना प्रातः हि यज्ञ दधाते। पूर्वभाज कवय (तौ) प्रशसन्ति।

**अनुवाद**- (हे ऋत्विजो !) प्रातः काल गमन करने वाले, अद्वितीय, हिसक न देने वाले राक्षसो से पूर्व पान करते हुये (अश्विनौ) का यजन करो। अश्विनौ प्रातः काल यज्ञ धारण करते है। पूर्वकालीन मेधावी (उनकी) प्रशसा करते है।

प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम्।

उतान्यो अस्मद्यजते वि चावः पूर्वःपूर्वो यजमानो वनीयान्॥२॥

**अन्वय**- (ऋत्विजः!) प्रातः अश्विना यजध्वम्। (हविषा) हिनोत। साय (हविः) देवया· न अस्ति। अजुष्ट (भवति) उत अस्मत् अन्यः यजते (हविषा) वि चावः पूर्वः पूर्वः (सः) यजमानः (देवैः) वनीयान् भवति।

**अनुवाद**- (हे ऋत्विजो !) प्रातःकाल अश्विनौ का यजन करो। (हवि द्वारा) प्रेरित करो। सायंकालीन (हवि) देवगामी नही होती, असेवनीय (हो जाती है) और हमारे अतिरिक्त अन्य यजन करता है और (हवि द्वारा) विशेष तृप्त करता है (वह) यजमान (देवो द्वारा) सेवनीय हो जाता है।

हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वाम्।

मनोजवा अश्विना वातरंहा येनातियाथो दुरितानि विश्वा॥३॥

**अन्वय**- अश्विना ! वा हिरण्यत्वक् मधुवर्णः घृतस्नु पृक्षः वहन् मनोजवः वातरहाः रथः आ वर्तते। येन (युवाम्) विश्वा दुरितानि (मार्गानि) अतियाथ·।

**अनुवाद**- हे अश्विनौ । तुम्हारा हिरण्यरूप त्वचा वाला, मधुरवर्णी, जलवर्षक, अन्नवाहक, मन की भाँति वेगवान, वायुसदृश वेगवान रथ हमारी ओर आता है। जिसके द्वारा (तुम) समस्त दुर्गम (मार्ग) का अतिक्रमण कर गमन करते हो।

यो भूयिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे।

स तोकमस्य पीपरच्छमीभिरनूर्ध्वभासः सदमित्तुतुर्यात्॥४॥

**अन्वय**- य· (यजमानः) विभागे (यागे) नासत्याभ्यां भूयिष्ठ चरिष्ठ विवेश पित्वः (च) ररते। सः अस्य (आत्मन·) तोक शमीभि पीपरत्। अनूर्ध्वभासः (यष्टा) सदम् इत् तुतुर्यात।

**अनुवाद**- जो (यजमान) हविर्भाग (यज्ञ) मे अश्विनो मे प्रभूत अन्नरूप कर्म स्थापित करता है (और) अन्न प्रदान करता है। वह इस (अपने) पुत्र का कर्म द्वारा पालन करता है। अनुन्नत तेज वाला (यष्टा) सर्वदा हिंसित होता है।

समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम।

आ नो रयिं वहतमोत वीराना विश्वान्यमृता सौभगानि॥५॥

**अन्वय**- (वयम्) अश्विनो . नूतनेन अवसा मयोभुवा (च) सुप्रणीति सम् गमेम। अमृता! (अश्विना !) (यूवाम्) नः रयिम् आ वहतम्, वीरान् आ (वहतम्), उत् विश्वानि सौभगानि आ (वहतम्)।

**अनुवाद**- (हम) अश्विनो की नूतन रक्षा (एव) सुखकर सुष्ठु गमन से युक्त हो। हे अमर ! (अश्विनौ !) (तुम) हमारे लिये धन लाओ पुत्र (प्रदान करो) और समस्त सौभाग्य प्रदान (करो)।

## सूक्त (७८)

***देवता***- अश्विनौ, ***ऋषि***- सप्तवध्रिरात्रेय, ***छन्द***- अनुष्टुप्, १-३ उष्णिक्, ४ त्रिष्टुप्।

अश्विनावेह गच्छतं नासत्या मा वि वेनतम्। हंसाविव पततमा सुताँ उप॥१॥

**अन्वय**- अश्विनौ ! इह (यज्ञे) आ गच्छतम् नासत्या ! मा विनेतम्। हसौ इव (युवाम्) सुतान् (सोमान्) उप आ पततम्।

**अनुवाद**- हे अश्विनौ ! इस (यज्ञ) मे आओ। हे नासत्या ! स्पृहाशून्य मत होओ। हस की भाँति (तुम दोनो) अभिसुत (सोम) के समीप आओ।

अश्विना हरिणाविव गौराविवानु यवसम्। हंसाविव पततमा सुताँ उप॥२॥

**अन्वय**- अश्विना ! यवसम् अनु (धावतः) हरिणौ इव गौरौ इव हसौ इव (च) (युवाम्) सुतान् (सोमान्) उप आ पततम्।

**अनुवाद**- हे अश्विनौ ! घास के समीप (दौडते हुये) हरिण गौरमृग की भाँति (और) हस की भाँति (तुम) अभिषुत (सोम) के समीप आओ।

अश्विना वाजिनीवसू जुषेथां यज्ञमिष्टये। हंसाविव पततमा सुतां उप॥३॥

**अन्वय**- वाजिनीवसू ! अश्विना ! (युवाम्) इष्टये यज्ञं जुषेथाम्। हसौ इव (युवाम्) सुतान् (सोमान्) उप आ पततम्।

**अनुवाद**- हे अन्नार्थ निवासप्रद ! अश्विनौ ! (तुम) अभीष्टसिद्धि के लिये यज्ञ का सेवन करो। हस की भाँति (तुम) अभिषुत (सोम) के समीप आओ।

अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा।

श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना शंतमेन॥४॥

**अन्वय**- (अश्विनौ!) नाधमाना योषा इव अत्रिः ऋजीसम् अवरोहन् वाम् अजोहवीत्। अश्विना ! (युवाम्) श्येनस्य चित् नूतनेन अवसा शतमेन (रथेन) आ गच्छतम्।

**अनुवाद**- (हे अश्विनौ !) याचक स्त्री की भाँति अत्रि ने तप्ताग्निकुण्ड से छुड़ाते हुये तुम्हे मुक्त किया था। हे अश्विनौ । (तुम) बाज की भाँति नूतन वेगयुक्त सुखकर (रथ) से आओ।

वि जिहीष्व वनस्पते योनिः सूष्यन्त्या इव।
श्रुतं मे अश्विना हवं सप्तवध्रिं च मुंचतम्॥५॥

**अन्वय**- वनस्पते । सूष्यन्त्या : (स्त्रियाः) योनि. इव वि जिहीष्व। अश्विना । मे हव श्रुतम्। सप्तवध्रिम् च मुञ्चतम्।

**अनुवाद**- हे वनस्पते । प्रसव करने वाली (स्त्री) की योनि की भाँति विवृत होओ। हे अश्विनौ । मेरे आह्वान को सुनो। और सप्तवध्रि को मुक्त करो।

भीताय नाधमानाय ऋषये सप्तवध्रये।
मायाभिरश्विना युवं वृक्षं स च वि चाचथः॥६॥

**अन्वय**- अश्विना ! युवम् भीताय नाधमानाय सप्तवध्रये ऋषये मायाभिः वृक्षं (पेटिकाम्) सम् च (अचथ·) वि च अचथ·।

**अनुवाद**- हे अश्विनौ ! तुम भयभीत याचक सप्तवध्रि ऋषि के लिये माया से वृक्ष की (पेटिका को) सम्भक्त (एव) विभक्त करते हो।

यथा वातः पुष्करिणीं समिंगयति सर्वतः।
एवा ते गर्भ एजतु निरैतु दशमास्यः॥७॥

**अन्वय**- वातः यथा पुष्करिणी सर्वतः समिङ्गयाति (तथा) एव ते गर्भः एजतु दशमास्याः (गर्भस्थः जीव·) निरैतु।

**अनुवाद**- वायु जिस प्रकार सरोवर आदि सर्वत्र गमन करती है उसी प्रकार तुम्हारा गर्भ गतिशील गतिशील हो। दसवे मास (गर्भस्थ जीव) निकले।

यथा वातो यथा वनं यथा समुद्र एजति।
एवा त्वं दशमास्य सहावेहि जरायुणा॥८॥

**अन्वय**- यथा वात यथा वनम् यथा (च) समुद्रः एजति (तथा) एव त्वम् दशमास्या (गर्भस्थ· जीवः) जरायुणा सह अवेहि।

**अनुवाद**- जिस प्रकार वायु जैसे वन (तथा) जैसे समुद्र कम्पित होते हैं (वैसे) ही तुम्हारा दसवे मास में (गर्भस्थ जीव) जरायु के साथ निकले।

दश मासाञ्छशयानः कुमारो अधि मातरि।
निरैतु जीवो अक्षतो जीवो जीवन्त्या अधि॥९॥

**अन्वय**- दश मासान्। मातरि (जठरे) अधि शशयानः कुमार जीवः अक्षत जीव· जीवन्त्याः (जनन्याः) अधि निरैतु।

**अनुवाद**- दश मास माता के (जठर मे) अवस्थित कुमार रूप जीव अक्षत जीव के रूप मे जीवित (जननी) से उत्पन्न हो।

## सूक्त- (७६)

*देवता*- उषस्, *ऋषि*- सत्यश्रवात्रेय, **छन्द**- पङ्क्ति।

महे नो अद्य बोधयोषो राये दिवित्मती।

यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते॥१॥

**अन्वय**- दिवित्मती ! उषः! यथा चित् (त्वम्) नः अबोधय· (तथैव) महे राये (प्राप्तये) नः अद्य बोधय। सुजाते ! अश्वसूनृते ! (देवि!) वाय्ये सत्यश्रवसि। (अनुग्रहाण)।

**अनुवाद**- हे दीप्तिमती ! उषा ! जिस प्रकार (तुमने) हमे जागृत किया था (उसी प्रकार) प्रभूत धन (-प्राप्ति) के लिए हमे जागृत करो। हे सुजन्मा ! अश्वार्थस्तुतिवाक् ! (देवि!) वाय्यपुत्र सत्यश्रविस पर (अनुग्रह करो)।

या सुनीथे शौचिद्रथे व्यौच्छो दुहितर्दिवः।

सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते॥२॥

**अन्वय**- दिव· दुहितः ! या (त्वम्) शौचिद्रथे सुनीथे (तमांसि) व्यौच्छः सुजाते। अश्वसूनृते ! सा (त्वम्) सहीयसि वाय्ये सत्यश्रवसि (तम.) व्युच्छ।

**अनुवाद**- हे सूर्यपुत्री ! जिस (तुमने) शौचिद्रथपुत्र सुनीथ के लिये (अन्धकार का) निवारण किया था हे सुजन्मा! अश्वार्थ स्तुतिवाक्! वह (तुम) अतिबलशाली वाय्यपुत्र के लिये (अन्धकार को) दूर करो।

सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः।

यो व्यौच्छः सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते॥३॥

**अन्वय**- दिव· दुहित.! आभरद्वसुः सा (त्वम्) अद्य नः (तमः) व्युच्छ। सुजाते ! अश्वसूनृते! या (त्वम्) सहीयसि वाय्ये सत्यश्रवसि (तम.) व्यौच्छः।

**अनुवाद**- हे सूर्यपुत्री ! आह्वानधनवाली वह तुम आज हमारे (अन्धकार) का निवारण करो। हे सुजन्मा ! अश्वार्थस्तुतिवाक् जो (तुम) बलशाली वाय्यपुत्र सत्यश्रवसि के लिये (अन्धकारका) दूर करो।

अभि ये त्वा विभावरि स्तोमैर्गृणन्ति वह्नयः।

मघैर्मघोनि सुश्रियो दामन्वंतः सुरातयः सुजाते अश्वसूनृते॥४॥

**अन्वय**- विभावरि! ये वह्नयः (स्तोतारः) त्वा स्तोमैः गृणन्ति सुजाते । अश्वसूनृते ! मघोनि! (ते) मघैः (युक्ताः) दामवन्तः सुरातय (भवन्ति)।

